दीनांज्ञपादीनांचणौउपधायाह्रस्वः·घटयति·ज्ञपज्ञाने·ज्ञपयति·अजीघटत्·अजि
ज्ञपत्·रभेरशब्लिटोः·नुमागमः·लभेश्च·अररंभत्·अललंभत्·ईर्ष्ययति·ईर्ष्यतेस्तृ
तीयस्येतिवक्तव्यं·तृतीयव्यंजनस्यतृतीयैकाचइतिवार्थः·आद्येयस्यद्वित्वंवारयितु
मिदं·द्वितीयेतुअजादेर्द्वितीयस्येत्यस्यापवादस्तथासन्नंतेप्रवर्त्तते·ऐर्ष्यियत्·ऐर्ष्यि
ष्यत्·द्वितीयस्याख्यायांणिजंताच्चङि·घस्रवाभ्यासेऽहूयतेहलादिःशेषात्·द्वित्वंतु

द्वितीयेत्विति-तृतीयस्यैकाच इतिपक्षे·

यस्येति·रेफस्यतुनन्द्राः इति निषेधाद्वि

कर्मणः २ कर्मणः १

नि
म

तीयस्यैव · न तृतीयाभावे नगृह्णन्त माणिकागह्नते: ॥ इति हेतुमणि ॥ धातोः समानक-
र्तृकादिच्छायांवा · इषिकर्मणो [illegible] रिषिणैककर्तृकात्सन्नैच्छायां · पठव्यक्तायांवाचि
॥ सन्यङोः · सन्नंतस्य यङंतस्यच प्रथमस्यैकाचो द्वे स्तोऽजादेस्तु द्वितीयस्य · सन्य-
तः · पठितुमिच्छति पिपठिषति · कर्मणः किं · गमनेनैच्छति · समानकर्तृकात्किं · शिष्याः
पठंत्वितीच्छतिगुरुः · वाग्रहणाद्वाक्यमपि · स्तोषिकामनुवर्थिया स्तैषिकोमनुवर्थ-
कः · सरूपप्रत्ययो नेष्टः सन्नंतान्नसनिष्यते · तेन पिपठिषितुमिच्छतीति वाक्यमेव · लु-
ङ्सनोर्घस्लृ · सः स्यार्द्धधातुके · सस्य तः स्यात् सादावार्द्धधातुके · अत्तुमिच्छति जिघ-
त्सति · एकाच इति नेट् · अज्झनगमां सनि · अजंतानां हंतेरजादेशगमेश्च दीर्घो झला-
दौ सनि · इको झल् · इगंताज्झलादिः सन्कित् · कर्तुमिच्छति चिकीर्षति · जिघांसति · सनि
च · इणो गमिर्नतु बोधने · जिगमिषति · बोधमेतुप्रतीषिषति · इङश्च · गमिः सनि · अ-
धिजिगांसते · रुदविदमुषग्रहिस्वपिप्रच्छः संश्च · एभ्यः संक्त्वा च कितौ स्तः · रुरुदिषति ·

९८

इङश्च १ २ सा.

९८ ८

१ण्णन्तो १ प्र॰ ३ पा॰ ८ न [illegible]

विदिर्विदारणे १ कृ: ४ ... मतेर्ग्रं १ हृ। ... गृहु निगरणे १   कृ विक्षेपणे ३

विविदिषति · मुमुक्षिषति · सनिग्रहगुहोश्च · ग्रहेर्गुहेरुगन्ताच्च सनइण्न · जिघृक्षति · हृलं
ताखं · इकस्थिपाढलः परो झलादिः सन्कित् · गुहू संवरणे · जुघुक्षति · बुभुक्षति · किरश्च प
ञ्चभ्यः · कृगृदृङ्धृङ्प्रछेभ्यः सनइट् · पिपृच्छिषति · चिकरिषति · जिगरिषति · जिगलिषति ·
अत्रेटोदीर्घोन ॥ पूर्ववत्सनः · सनः पूर्वो यो धातुस्तेन तुल्यं सनन्तादप्यात्मनेपदं स्यात् · दिदरिषते ·
दिधरिषते · शुश्रूषति · सनीवन्तर्द्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनां · इवंतेभ्यऋधादिभ्यश्च
सनइड्वा · ध्रुवः सुस्तनुनामसि केवल · मनुष्यामुष्यस्य पयस्य पच्छु ट एतावादेशो लोनुनासिके श्रौ
फलादेर्दिधूति · यण् · हिलं · दुद्यूषति · दिदेविषति · लोपितण्योरेव यण्व्भ्यासात् · अभ्यासेषण: ·
परस्य लोति ण्यन्तयोरेवसस्यषः षभूतेसनि नान्यस्य · तुष्टूषति · सिषाधयिषति · लोपितण्योः ·
सुस्यूषति · सिसेविषति · आपज्ञप्यृधामीत् · ९ धामवईस्तादेः सनि · अत्र लोपोऽभ्यासस्य · सनि
मिमेत्यारभ्य पदुं तत्राभ्यासलोपः · आप्तुमिच्छति · ईप्सति · आर्धितुमिच्छति · ईर्त्सति ॥ आदि

पं ४

कृगृदृङ्तौ ... २   गृधंनाम ... ३ ... २

धीप्सति २

ऊर्णुनूषति ४

धिषति· बिभ्राज्जिषति· बिभ्रार्डिषति· बिभ्रक्षति बिभर्क्षति· दंभ इच्च· दंभेरच इत्स्यात्· ईप्स
सति· [illegible] हलंतादित्यत्र हल्ग्रहणं जातिपरं· तेन सनः कित्वान्न लोपः· धी[illegible]
ति· दिदंभिषति· शिश्रीषति· शिश्रयिषति· सुस्वूर्षति· सिस्वरिषति· युयूषति· यियविषति·
ऊर्णुनुविषति· ऊर्णुनविषति· बुभूर्षति· बिभरिषति· ज्ञीप्सति· जिज्ञपयिषति· सिषासति·
सिसनिषति· आशंकायां सन्वक्तव्यः· श्वा मुमूर्षति· [illegible]पतति दरिद्राति [illegible] मनो वे हू[illegible]:·
तनोतेर्विभाषा· उपधायादीर्घो झलादौ सनि· तितांसति· तितंसति· तितनिषति· कूलं पिपतिषति·
सनि मीमाघुरभलभशकपतपदामच इस्· लोपे· अभ्यासलोपः· पित्सति· दिदरिद्रिषति·
दिदरिद्रासति· मुचोऽकर्मकस्य गुणो वा· अभ्यासलोपः· मोक्षते· मुमुक्षते· वा वत्सः स्वय
मेव अकर्मकस्य किं· मुमुक्षति वत्सं कृष्णः· इट् सनि वा· वृंवृभ्यां मृदंताच्च सन इड्वा·
विवरिषते· विवरीषते· वुवूर्षते· विवरिषति· विवरीषति· वुवूर्षति· तितरिषति· तितरीषति·

म·
कि
श्री
श्री
प
श्री
श्री
क२

का॰ले॰
च॰

तितीर्षति· स्मिपूङ्‌रंञ्ज्वशां सनि· स्मि पूङ् ऋ अंञ्जू अश् एभ्यः सन इट्· सिस्मयिषते· पिप
विषते· अरिरिषति· अंजिजिषति· अशिशिषति· गुप गोपने· तिज निशाने· कित निवासे रोगा
पनयने च· मान पूजायां· बध बंधने· दान खंडने· शान तेजने· गुप्तिज्किद्भ्यः सन्· मान्बध
दान्शान्भ्यो दीर्घश्चाभ्यासस्य· सूत्रद्वयोक्तेभ्यः सन् मानादीनामभ्यासस्य दीर्घश्च· गुपे
र्निंदायां· तिजेः क्षमायां· कितेर्व्याधिप्रतीकारे निग्रहे अपनयने नाशने संशये च· मानेर्जि
ज्ञासायां· बधेश्चित्तविकारे· दानेरार्जवे· शानेर्निशाने· गुपिप्रभृतयः· कितभिन्ना निंदाद्य
र्थकाः एवानुदात्तेतौ दानशानौ च स्वरितेतौ· एते नित्यसनंताः· अर्थांतरे त्वनुबंधकप्र
रादयः· अनुबंधस्य केवलो चरितार्थत्वात्सनंतात्परमवस्था· धातोरित्यविहितत्वात्सनो नार्ध
धातुकत्वं तेन गुणो न· जुगुप्सते· तितिक्षते· चिकित्सति· मीमांसते· बीभत्सते· दीदांसति· दी
दांसते· शीशांसते· ति खिजु गोपयति· गोपयते इत्यादि· इति सनंताः· धातोरेकाचो ह

आङ्भपजादेर्वौचगरेअगौरेङ् ईदृशाः । अकृष्ठकारेमशार्व धातोरेकाचो हलादे- नदि ५

म. लादेः क्रियासमभिहारे यङ् · पौनःपुन्ये भृशार्थे च द्योत्ये [redacted] रे यङ् · गुणो यङ्लु

५८ कोः · अभ्यासस्य · ङि · दंतस्या तन्मने प ६ · पुनः पुनरतिशयेन वा भवति वोभूयते · वोभूयावक्रे ·

अवोभूयिङ · धातोः किं · आर्द्धधातुकत्वे यथा स्यात् · नेनवुवोवयिरित्यादि · एकाचः किं · पुनः पुन

र्जागर्ति · हलादेः किं · भृशम् ईक्षते · नित्यं कौटिल्ये गतौ · गत्यर्थात् कौटिल्ये एव यङ् · न क्रियासम

भिहारे · दीर्घोऽकितः · अकितोऽभ्यासस्य दीर्घो यङ्लुकोः · कुटिलं व्रजति वाव्रज्यते · यस्य हलः ·

हलः परस्य यस्य लोप आर्द्धधातुके · आदेः परस्य · अतो लोपः · वाव्रजांचक्रे · वाव्रजिता · री

गृदुपधस्य च · धातोरभ्यासस्य रीगागमो यङ्लुकोः · वरीवृत्यते · वरीवृत्तांचक्रे · वरीवृत्ति

ता · शुभ्रादिभ्यश्च · नरीनृत्यते · जरीगृह्यते · रीगृत्वत इति वाच्यम् · वरीवृश्च्यते · लुपसदचर

जपजभदहदशगृभ्यो भावगर्हायां · एभ्यो भावगर्हायामेव यङ् · गर्हितं लुम्पति लोलु लभः

प्यते · सासद्यते · चरफलोश्च · अनयोरभ्यासस्यातो नुक् यङ्लुकोः · नुगित्यनेनानुस्वारोप ८

वावदांतस्येति प्रथमस्यात्‌· उरत्स्यात्तः· वरफलौ अभ्यासात्परे स्यातं स्यात् यङ्लुकौ:
ते· सवपदान्तवद्वाच्यः· हलि चेति दीर्घः· वञ्चूर्यते· वंवूर्यते· पम्फुल्यते· पंफुल्यते·
जपजभदहदशभञ्जपशां च· एषामभ्यासस्य नुक् स्यात् यङ्लुकोः· गर्हितं जपति जंजप्यते·
इत्यादि· ग्रो यङि· गिरते रेफस्य लत्वं यङि· गर्हितं गिलति जेगिल्यते· सूचिसूत्रिमूत्र्य-
ट्यर्त्यशूर्णोतीनां यङ्वाच्यः· सोसूच्यते· सोसूत्र्यते· मोमूत्र्यते· अटाट्यते· यङि च· अ-
र्तेः संयोगादेश्च अतो गुणो यङि· यकारपरो रेफस्य न द्वित्वनिषेधः· अरार्यते· अशाश्य-
ते· ऊर्णोनूयते· सिचो यङि· सस्य षो न· निसेसिच्यते· न कवतेर्यङि· अभ्यासचुत्वं·
कोकूयते· कौतिकुवत्योस्तु· चोकूयते· हन्तेर्हिंसायां यङि घ्नीभावो वाच्यः· जेघ्नीयते·
हिंसायां किं· नुगतोऽनुनासिकान्तस्य· अदन्ताभ्यासस्य यङ्लुकोः· जंघन्यते· अयङ्
यि क्ङिति· शीङः शाशय्यते· स्वपिस्यमिव्येञां यङि· संप्रसारणं· सोषुप्यते· सेसि-
म्यते· वेवीयते· न वशः संप्रसारणं· वावश्यते· चायः की· चेकीयते· ई घ्राध्मोः· जेघ्री-

उ.४

अदप्र:भतिमश:राय:॥८६

सितिसिंचनो ऋनप्रअंजरो ३

सी
१४

इतियङन्तप्रक्रिया पत्र ४

यते · नीग्वंचुस्रंसुध्वंसुभ्रंसुकसपतपदस्कंदां · एषामभ्यासस्यनीगयङ्लुकोः ·
आःकृत्नाइत्यकोनदीर्घः · वनीवञ्च्यते · सनीस्रस्यते · दनीध्वस्यते · बनीभ्रस्यते · चनी
कस्यते · पनीपत्यते · कनीस्कद्यते · यङोऽचिच · यङोऽचिप्रत्ययेलुक्स्यात् · चर्करीतं च वि
नापिक्ष्वित् अनैमित्तिकोयमन्तरंगत्वादादौभवति · ततःप्रत्ययलक्षणेन यङन्तत्वात् द्वि
त्वं · अभ्यासकार्यं · धातुत्वात् लडादयः · शेषात्कर्तरिपरस्मैपदं · [illegible] चर्करीतंचेत्यदादौपाठा
च्छपोलुक् · यङोवा · यङ्लुगन्तस्य हलादेःपितःसार्वधातुकस्य ईड्वास्यात् · भूसुवोरि
ति निषेधोयङ्लुकिभाषायांन · बोभूतुतेतिक्ते इति छन्दसि निपातनात् · बोभवीति ·
बोभोति · बोभूतः · बोभुवति · बोभवीषि · बोभोषि · बोभूथः · बोभूथ · बोभवीमि · बोभो
मि · बोभूवः · बोभूमः · बोभवांचकार · बोभवांबभूव · बोभवामास · बोभविता · बोभविष्य
ति · बोभवीतु · बोभोतु · बोभूतात् · बोभूतां · बोभुवतु · बोभूहि · बोभवानि · अबोभवीत् · [illegible]

अनुहानाङ्ङितइतितुन · ङि · व्लस्यप्रत्ययाप्रत्ययसाधारणत्वेनप्रत्ययलक्षणाप्रवृत्तेः ॥ यत्रहि प्रत्ययसाधारणं रूपमाश्रीयते ॥

अत्रप्रकरणे [illegible] रूपाणि

नाभ्यस्येति गुण . गुणिसेति गुणः
३ गुणोऽनुनासिकानां सेति वुक् या ८

कृग्रहणं नप्रसंगो यो विधिः सन्नितः २

अबोभोत् . अबोभूतां . अबोभवुः . बोभूयात् . बोभूयास्तां . बोभूयासुः .
गा[illegible]केति सिचो लुक् . यङो वेतीट् . पक्षे गुणो बाधित्वा नित्यत्वाद्वुक् . अबोभूवीत् . अबो
भोत् . अबोभूतां . अबोभूवुः . अबोभविष्यत् . जंगमीति . जंगंति . अनुदात्तोपदेशेत्यनुनासिक
लोपः . जंगतः . गमहनेत्युपधालोपः . जंग्मति . म्वोश्च . मस्य नः स्यात् . जंगन्मि . जंग
न्वः . जंग[illegible]न्मः . श्तिपा शपानुबंधेनानिर्दिष्टं यङ्लुकेन च . यत्रैकाच्ग्रहणं चैव पंचैता
नि न यङ्लुकि इति वचनात् न गुणनिषेधः . जंगमिता . अनुनासिकस्याभीयत्वेनासिद्ध
त्वान्न हे[illegible]र्लुक् . जंगहि . मो नो धातोः . अजंगन् . अनुबंधनिर्देशान्न च्लेरङ् . अजंग
मीत् . रुग्रिकौ च लुकि . ऋदुपधस्य धातोरभ्यासस्य रुक्रिक्रीकः [illegible]यङ्लुकि . अ
तश्च . ऋदिताद्धातोरुपितथा . वर्वृतीति . वरिवृतीति . वरीवृतीति . वर्वर्ति . वरिवर्ति .
वरीवर्ति . वर्वृतः . वर्वृतति . वर्वर्तामास २ . वर्वर्तिता २ . गणनिर्दिष्टत्वान्न वृद्भ्य
श्चतुर्भ्य इति न . वर्वर्तिष्यति २ . अवर्वृतीत् २ . अवर्वर्त् . २ सिपि दश्चेति रुत्वपक्षे . [illegible]
तोः . ढ्रलोपे इति दीर्घः . गणनिर्दिष्टत्वान्नाङ् . अवर्वर्तीत् . २ चर्क[illegible]ति . चरिकरीति . चरी
अपवर्गः॥ री २

जंगमी
मि ४

म॰ करीति॰ चर्कर्ति॰ चरिकर्ति॰ चरीकर्ति॰ चर्कृतः॰ चर्क्रति॰ चर्करांचकार॰ चर्करिता॰ अचर्करीत्॰
अचर्कः॰ चर्क्रियात्॰ आशिषि॰ चाक्रियात्॰ अचर्कारीत्॰ ऋत इद्धातोरिति परगान्येत्॰ कॄ विक्षेपे॰ चा
६१ कर्ति॰ चाकरीति॰ चाकीर्तः॰ चाकिरति॰ चाकीर्हि॰ चाकराणि॰ अचाकरीत्॰ अचाकः॰ अचाकी
र्ता॰ अचाकरुः॰ अचाकिरा[illegible]॰ तातर्ति॰ तातरीति तातरी[illegible]त्यादि॰ इति यङ्लुगन्ताः॰
सुप आत्मनः क्यच्॰ इषिकर्मण एषितुः सम्बन्धिनः सुबन्तादिच्छायामर्थे क्यच् वा॰ सुपो
धातुप्रातिपदिकयोः॰ एतयोरवयवस्य सुपो लुक्॰ क्यचि च॰ अवर्णस्य ईः॰ आत्मनः पुत्रमि
च्छति पुत्रीयति॰ मान्तप्रकृतिकसुबन्तादव्ययाच्च क्यज् न॰ किमिच्छति॰ स्वरिच्छति॰
अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु॰ क्यजन्ता निपात्यन्ते॰ अशनायति॰ उ
दन्यति॰ धनायति॰ बुभुक्षादौ किम्॰ अशनीयति॰ उदकीयति॰ धनीयति॰ अश्वक्षीरवृषल
वणानामात्मप्रीतौ क्यचि॰ एषां क्यचि सुक्॰ अश्ववृषयोर्मैथुनेच्छायाम्॰ अश्वस्यति व
डवा॰ वृषस्यति गौः॰ क्षीरलवणयोर्लालसायां॰ क्षीरस्यति बालः॰ लवणस्यति उष्ट्रः॰
सर्वप्रातिपदिकानां क्यचि लालसायां॰ सुगसुकौ॰ दधिस्यति॰ दध्यस्यति॰ नः क्ये॰ क्य
चि क्यङि॰ नान्तमेव पदं नान्यत्
इति [illegible]॰ ६

नैपेद्रु जोपदेशेषु मवेद्जार्द्धः ॥११॥ गृधुञ्भिर्कां [illegible]यां॥

राजीयति· नांतमेवेति किं· वाच्यति· हलि च· गीर्यति· पूर्यति· धातोरित्येव· नेह· दिवमिच्छ
ति दिव्यति· क्यस्य विभाषा· हलः परयोः क्यच् क्यङोर्लोपो वा आर्द्धधातुके· आदेः परस्य·
अतो लोपः· तस्य स्थानिवद्भावाद्लघूपधगुणो न· समिधिता· समिध्यिता· काम्यच्· उक्त
विषये काम्यच्· पुत्रमात्मन इच्छति· पुत्रकाम्यति· पुत्रकाम्यिता· उपमानादाचारे· उ
पमानात्कर्मणः सुबंतादाचारेर्थे क्यच्· पुत्रमिव आचरति पुत्रीयति· विष्णूयति द्विजं·
सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः· अतो गुणे· कृष्ण इव आचरति· कृष्णति· स्व इव आच
रति स्वति· सस्वौ· अनुनासिकस्य क्विझलोः क्ङिति· अनुनासिकांतस्योपधाया दीर्घः
क्वौ झलादौ क्ङिति· इदमिव आचरति इदामति· राजेवाचरति राजानति· इंन्हान्नातिषि
षमान्नेलोपधाया दीर्घः· पंथा इव पाथीनति· कर्तुः क्यङ् सलोपश्च· उपमानात्कर्तुः सु
बंतादाचारे क्यङ् वा· सांतस्य कर्तृवाचकस्य लोपो वा· क्यङ्· वेत्युक्तेः पक्षे वाक्यं· संनि
योभसित्यनांसहवाप्रवृत्तिः सहयायितृतिरिति क्यङ्सलोपयोः सहैव प्रवृत्तिः· लोप

म
६२
मनु
म

च्व्यर्थेभ्यो भृशादिभ्यो लोहितादिभ्यो डाजन्तेभ्यश्च क्यष्वा

श्च्व्यन्तवर्जितः · ओजसोऽप्सरसो नित्यमितरेषां विभाषया · भृशायते · ओजायते · अप्सर
यते · पशायते · पशास्यते · विठस्यते · आचारेऽवगल्भक्लीबहोडेभ्यः क्विब्वा · वाग्रहणात्
क्यङ्ङपि · अवगल्भादयः पचाद्यजन्ताः · क्विप्प्रनियोगेनानुदात्तत्वमनुनासिकत्वं चाप्र
प्रत्ययस्य प्रतिज्ञायते · तेन तङ् · अवगल्भते · क्लीबते · होडते · भूतपूर्वगतिरप्यनेकार्थे आ
म् · एतद्वार्त्तिकारम्भसामर्थ्यात् · अवगल्भां चक्रे · क्लीबां चक्रे · होडां चक्रे · उपसर्गसमासका
र्ं पूर्वपदं धातुसंज्ञाप्रयोजकप्रत्यये चिकीर्षिते तत्प्रक्रियते · तेनगल्भिष्टा प्रागल्भत · अ
प्रागल्भत · अवागल्भिष्ट · लोहितादिडाज्भ्यः क्यष् · वा क्यषः · क्यषन्तात्परस्मैपदं · अ
लोहितो लोहितो भवति लोहितायति · लोहितायते · ननु कारणसामर्थ्यात्कामवद्दृष्टं च
लौकिकः कारः कुतो न श्रूयते · तस्य भाष्ये प्रत्याख्यानात् · पटपटायते · पटपटायति ·
कष्टाय क्रमणे · चतुर्थ्यन्तात्कष्टशब्दादुत्साहेऽर्थे क्यङ् · कष्टाय क्रमते कष्टायते ·
पापं कर्तुमुत्सहत इत्यर्थः · सत्रकक्षकष्टकृच्छ्रगहनेभ्यः कण्वचिकीर्षायां · कण्व

राम
६०

कर्म्मणोर०॥ चा

पापं · पापं चिकीर्षति सत्रायते · कक्षायते · कर्म्मणोरोमंथतपोभ्यां वर्त्तिचरोः · रोमंथ
तपोभ्यां क्रमेण वर्त्ति[illegible]रोयां चरणेर्थे क्यङ् स्यात् · रोमंथं वर्त्तयति रोमंथायते · हनु
चलनेति वक्तव्यं · चर्वितस्याकृष्य पुनश्चर्वणे इत्यर्थः · नेह कीटो रोमंथं वर्त्तयति · तपसः
परस्मैपदं च · तपश्चरति तपस्यति · बाष्पोष्मभ्यामुद्वमने · १ बाष्पमुद्वमति बाष्पायते
ऊष्मायते · फेनाच्चेति वक्तव्यं · फेनायते · शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे · एभ्यः क
र्मभ्यः करोतीत्यर्थे क्यङ् स्यात् · शब्दं करोति शब्दायते · सुदिनदुर्दिननीहारेभ्यश्च · सुदिना
यते · दुर्दिनायते · प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च · प्रातिपदिकाद्धात्वर्थे णिच् स्या
दिष्ठे यथा प्रातिपदिकस्य पुंवद्भावरभावटिलोपविन्मतुब्लोपयणादिलोपप्रस्थस्फा
द्यादेशभसंज्ञास्तद्वण्णावपि स्युः · पटुमाचष्टे पटयति · णित्वाद्वृद्धौ सत्यां टिलोपः · अ
पीपटत् · ओरावङ् इत्यत्र भाष्ये तु इष्ठे लोपावलोपानि निर्दिष्टे · परनित्यान्तरंगापवा
दानामुत्तरोत्तरं बलीयः · अपपटत् · पृ[illegible]भाड्वीवतालिङ् · · पृ छ्वा दुंदसनेष्वसने

महद्हलं हलिः॥ अर्थं वेद चोरय्या ७ [illegible] अर्थापयति· वेदापयति

पर्यसने च· क्षिपि धावि हस्तं वा क्षेपणं पर्यसनं· उत्पुच्छयते· विपुच्छयते· परिपुच्छयते· भांडात्समा
चयने· संभांडयते· समवभांडत· चीवरादर्जने परिधाने च· संचीवरयते भिक्षुः· मुंडमिश्रश्लक्ष्णल
वणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्· कृ अर्थे मुंडं करोति मुंडयति· व्रताद्भोजनतन्निवृत्त्योः प
यः शूद्रान्नं वा व्रतयति· वस्त्रात्समाछादने· संवस्त्रयति· हलादिभ्यो ग्रहणे· हलिक[illegible]भ्यो रदंत
त्वं निपात्यते· हलिं गृह्णाति हलयति· कलिं गृह्णाति कलयति· महद्धलं हलिः· कृतं गृह्णाति कृतय
ति· तूस्तानि विहंति वितूस्तयति· तूस्तं केशादृत्येके· जटीभूताः केशा इत्यन्ये· [redacted]
ः· सत्यापयति· वीणयोपगायति उपवीणयति· तूलेनानुकुष्णाति अनुतूलयति स्तणा
गं· श्लोकैरुपस्तौति उपश्लोकयति· सेनयाभियाति अभिषेणयति· लोमान्यनुमार्ष्टि अनुलो
मयति· त्वच संवरणे पवाछन्द· त्वचं गृह्णाति त्वचयति· वर्मणा संनह्यति संवर्मयति· वर्णं गृह्णा
ति वर्णयति· चूर्णैरवध्वंसते चूर्णयति· ७ इति नामधातुप्रक्रिया· ७ कंड्वादिभ्यो यक्· ए
भ्यो धातुभ्यो नित्यं यक् स्यात्स्वार्थे· कंडूञ् गात्रविघर्षणे· कंडूयति· कंडूयते· इत्यादि· कर्तरिकर्मव्यति
हारे· क्रियाविनिमये द्योत्ये कर्तर्यात्मनेपदं· व्यतिलुनीते· अन्यस्य योग्यं लवनं करोतीत्यर्थः·

तिं

पाशाद्विमुचति· विपाशयति पं २ । रूप पश्यति· रूपयति

सत्यार्थवेदानामापुग्वक्तव्यः

·रुदैन्

नगतिहिंसार्थेभ्यः · व्यतिगच्छंति · व्यतिघ्नंति · प्रतिषेधे हसादीनामुपसंख्यानं · हसादयो हसप्रकाराः शब्दक्रियाः · व्यतिहसंति · व्यतिजल्पंति · हरतेरप्रतिषेधः · संप्रहरंते राजानः · इतरेतरान्योन्योपपदाच्च · परस्परोपपदाच्चेति वक्तव्यं · इतरेतरस्यान्योन्यस्य परस्परस्य वा व्यतिलुनंति · नेर्विशः · निविशते · परिव्यवेभ्यः क्रियः · परिक्रीणीते · विक्रीणीते · अवक्रीणीते · विपराभ्यां जेः · विजयते · पराजयते · क्रीडोनुसंपरिभ्यश्च · चादाङः · अनुक्रीडते · संक्रीडते · परिक्रीडते · आक्रीडते · समोऽकूजने · संक्रीडते · कूजने तु संक्रीडति चक्रं · आगमेः क्षमायां · ण्यंतस्यैव ग्रहणं · आगमयस्व तावत् · मा त्वरिष्ठा इत्यर्थः · शिक्षेर्जिज्ञासायां · धनुषि शिक्षते · धनुर्विषयज्ञाने शक्तो भवितुमिच्छतीत्यर्थः · वृत्तिसर्गतायनेषु क्रमः · वृत्तिरप्रतिबंधः · शास्त्रेस्य क्रमते बुद्धिः · सर्ग उत्साहः · अध्ययनाय क्रमते · क्रमंतेस्मिं शास्त्राणि · स्फीतानि भवंतीत्यर्थः · आङ उद्गमने · आक्रमते सूर्यः · ज्योतिरुद्गमन इति वाच्यं · नेह · आक्रामति · धूमो हर्म्यतलात् · वेः पादविहरणे · साधु विक्रमते वाजी · प्रोपाभ्यां समर्थाभ्यां · प्रारंभे अनयोस्तुल्यार्थता · प्रक्रमते · उपक्रमते · समर्थाभ्यां किं ·

आत्मने

प्र अथ वोर्मने॥ जहातु नैनं कथमर्थसिद्धिः संशय्य कर्णादिषु तिष्ठते यः॥
असाधुयोगा हि जयान्तरायाः प्रमाथिनां विपदां पदानि॥

मं
६४

प्रक्रमते·प्रवृत्तिरित्यर्थः·उपक्रमते·आरभत इत्यर्थः·अनुपसर्गाद्वा·क्रामति·क्रमते·
अपह्नवे ज्ञः·शतमपजानीते·अपलपतीत्यर्थः·अकर्मकाच्च·सर्पिषो जानीते·सर्पिषोपा
येन प्रवर्तत इत्यर्थः·समवप्रविभ्यः स्थः·संतिष्ठते·अवतिष्ठते·प्रतिष्ठते·वितिष्ठते·आ
ङः प्रतिज्ञायां·शब्दं नित्यमातिष्ठते·प्रकाशनस्थेयाख्ययोश्च·गोपी कृष्णाय तिष्ठते·आ
शयं प्रकाशयतीत्यर्थः·संशय्य कर्णादिषु तिष्ठते यः·कर्णादीन्निर्णेतृत्वेनाश्रयती
त्यर्थः·उदोऽनूर्ध्वकर्मणि·मुक्तावुत्तिष्ठते·अनूर्ध्वेति किं·पीठादुत्तिष्ठति·उपान्मंत्रकर
णे·आग्नेय्याग्नीध्रमुपतिष्ठते·मंत्रकरणे किं·भर्तारमुपतिष्ठति यौवनेन·उपाद्देवपू
जासंगतिकरणमित्रकरणपथिष्विति वाच्यम्·आदित्यमुपतिष्ठते·गंगा यमुनामुपति
ष्ठते·रथिकानुपतिष्ठते·मित्रीकरोतीत्यर्थः·पंथाः स्रुघ्नमुपतिष्ठते·प्राप्नोतीत्यर्थः·
वा लिप्सायां·भिक्षुकः प्रभुमुपतिष्ठति वा उपतिष्ठते·उद्विभ्यां तपः·अकर्मकादित्येव·
उत्तपते·वितपते·दीप्यत इत्यर्थः·स्वांगकर्मकाच्चेति वक्तव्यं·उत्तपते वितपते पाणिं·नेह·

रामः
६४

सुवर्णमुन्नमति· आङोयमहनः· आयच्छते·आहते· अकर्मकात्स्वांगकर्मकादित्येव·नेह
परस्यशिरआहंति·आत्मनेपदेष्वन्यतरस्यां· हनोवधादेशोलिङि·आवधिष्ट·आवधिषा
तां·आवधिषत·हनःसिच्कित्·अनुनासिकलोपः·आहत·आहसातां·आहसत·यमोगंध
ने·सिच्कित्· गंधनंसूचनंपरदोषाविष्करणं·उदायत· गंधनेकिं·उदायंस्तपादं·आकृष्ट
वानित्यर्थः·समोगम्यृच्छिभ्यां·अकर्मकाभ्यामित्येव·संगच्छते·वागमः·परौझलादीलिङ्-
सिचौकितौस्तः·संगंसीष्ट·संगसीष्ट·समगंस्त·समगत·समगसातां·समृच्छिष्यते·
अकर्मकाभ्यांकिं·ग्रामंसंगच्छति·विदिप्रच्छिस्वरतीनामुपसंख्यानं·वेत्तेरेवग्रहणं·संवि
ते·संविदाते·वेत्तेर्विभाषा·परस्यझादेशस्यात्तोरुट्·संविद्रते·संविदते·संपृच्छते·संस्व
रते·अथास्मिन्नकर्मकाधिकारेहंनिगम्यादीनांकथमकर्मकत्वमितिचेत्·शृणु·धातो
रर्थान्तरेवृत्तेर्धात्वर्थेनोपसंग्रहात्·प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिकाक्रिया·व
हतिभारं·नदीवहति·स्यंदतेइत्यर्थः·जीवति·नृत्यति·प्रसिद्धेयथा·मेघोवर्षति·

म· ५

न किंतरवा साधुनयास्ति को धियं हितान्नयः संभ्रमुतेसा किं प्रभुः ॥ स हानु मूलेषु हि स्रोवेते तेभ्यः प्रमात्तेभ्यो निरस्त वैसंगारः ॥१॥

कर्मणो विवक्षा तो यथा· हितान्नयः संभ्रमुतेसाधुः प्रभुः· संमाननोत्संजना
चार्यकरणज्ञानभृतिविगणनव्ययेषु नियः· शास्त्रे नयते· दण्डमुन्नयते· मा
णवकमुपनयते· तत्वं नयते· कर्मकरानुपनयते· करं विनयते· राज्ञे देयं भागं परिशो
धयतीत्यर्थः· शतं विनयते· धर्मार्थं विनियुङ्क्त इत्यर्थः· उपसर्गादस्यत्यूह्योर्वेति वा
च्यं· निरस्यति· निरस्यते· समूहति· समूहते· उपसर्गात्किमूहतेः· पादेकृति· अक्ष
समुह्यात्· अग्निं समुह्य· निसमुपविभ्यो ह्वः· निह्वयते· स्पर्धायामाङः· कृष्णश्चाणू
रमाह्वयते· स्पर्धायां किं· पुत्रमाह्वयति· उदश्चरः सकर्मकात्· धर्ममुच्चरते· उल्लंघ्य ग
च्छतीत्यर्थः· समस्तृतीयायुक्तात्· रथेन संचरते· दाणश्च सा चेच्चतुर्थ्यर्थे· समो दाण
स्तृतीयांतेन युक्तादुक्तं स्यात् तृतीया चेच्चतुर्थ्यर्थे· दास्या संयच्छते कामी· उपाद्यमः स्वक
रणे· स्वकरणं स्वीकारः· भार्यामुपयच्छते· विभाषोपयमने· यमः स्वकिरीत वा विवाहे· रा
मः सीतामुपायत· उपायंस्त वा· उदवोढेत्यर्थः· ज्ञाश्रुस्मृदृशां सनः· सनंतानामेषां
निगुडवेह अह्नावत्तह कुखारंमात ॥

नितरवारं ॥ नितरां क्षिप ॥ समाहितं

रामः
६७

वत्· धर्मं जिज्ञासते· शुश्रूषते· सुस्मूर्षते· दिदृक्षते· नानोर्ज्ञः· [illegible] पुत्रमनुजिज्ञासति·
प्रोपाभ्यां युजेरयज्ञपात्रेषु· प्रयुं[illegible]·उपयुंक्ते· स्वराद्यंतोपसर्गादितिवाच्यं·उद्युंक्ते· वियुंक्ते· अ
यज्ञपात्रेषु किं· द्वंद्वंन्यंचिपात्राणि प्रयुनक्ति· समः क्ष्णुवः· संक्ष्णुते शस्त्रं· गधनावक्षेपणसेवन
साहसिक्य प्रतियत्न प्रकथनोपयोगेषु कृञः· गंधनं हिंसा· उत्कुरुते सूचयतीत्यर्थः· अवक्षे
पणं भर्त्सनं· श्येनो वर्त्तिकामुदाकुरुते· भर्त्सयतीत्यर्थः· हरिमुपकुरुते· सेवत इत्यर्थः· पर
दा दारान्प्रकुरुते· तेषु सहसा प्रवर्त्तते· एधोदकस्योपस्कुरुते· गुणमाधत्त इत्यर्थः· कथाः प्रकुरुते·
प्रकथयतीत्यर्थः· शतं प्रकुरुते· धर्मार्थं विनियुंक्ते· एषु किं· कटं करोति· इत्यात्मनेप
दप्रक्रिया· ○ शेषात्कर्त्तरि परस्मैपदं· श्वि· श्वयति· विभाषा श्वेः· संप्रसारणं लिटि
यङि च· शुशाव· शुशुवतुः· श्वयतेर्लिट्यभ्यासलक्षणप्रतिषेधः· शिश्वाय· शिश्वियतुः·
शूयात्· जस्तंभित्यङ्वा· श्वयतेरः· अङि· अश्वत्· अश्वः· विभाषेति चङ्· अशिश्वि
यत्· अश्वयीत्· अनुपराभ्यां कृञः· कर्तृगे च फले गंधनादौ च परस्मैपदं स्यात्· अनुकरो

तकिंतरवासाधुनत्वासिंधोधियंहिताः लयः संभवानेषां किंचन ॥ मरानेन [illegible]

म ·
६६

ति · पराकरोतीति · अभिप्रत्यतिभ्यः क्षिपः · क्षिप प्रेरणे · स्वरितेत् · अभिक्षिपति · प्राद्वहः · प्रव
हति · परेर्मृषः · परिमृष्यति · व्याङ्परिभ्यो रमः · विरमति · उपाच्च · यज्ञदत्तमुपरमति · उ
परमयतीत्यर्थः · अंतर्भावितण्यर्थोयम् · विभाषाकर्मकात् · उपाद्रमः परस्मैपदं · उपरम
ति · उपरमते · निवर्तत इत्यर्थः · बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः · एभ्यो ण्यंतेभ्यः पर
स्मैपदं स्यात् · णिचश्चेत्यस्यापवादः · बोधयतीयप्रमित्यादि · क्रीङ्जीनां णौ · आत्वं · अध्या
पयति · णौ च संश्चङोः · सन्परे चङ् · परेणौ इङो गाङ् वा · अध्यजीगपत् · अध्यापिपत् · क्रा
पयति · जापयति · निगरणचलनार्थेभ्यश्च · निगारयति · चालयति · अदेः प्रतिषेधः · आदय
ते देवदत्तेन · अणावकर्मकाच्चित्तवत्कर्तृकात् · ण्यंतात्परस्मैपदं · शेते कृष्णस्तं
गोपी शाययति · न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः · एभ्यो ण्यंतेभ्यो · परस्मै
पदं न · पाययते · दमयते · आयामयते · आयासयते · परिमोहयते · रोचयते · नर्तयते · वादय
ते · वासयते · धेट उपसंख्यानं · धापयते · अक[illegible] अभिप्राये शोभार्थ इति परस्मैपदं स्यादेव · व

तम:
६८

त्सा-स्यापप्राप्तिपृयः·कृतिपदस्मैपदव्यवस्था· ८ भावकर्मणोः·लस्यतङानौ·सार्वधातुके
यक्·धातोर्भावकर्मवाचिनि·भावः क्रिया·साचभावार्थलकारेणानूद्यते·युष्मदस्मद्भ्यां
समानाधिकरणाभावात्प्रथमपुरुषः·तिङ्वाच्यक्रियाया अद्रव्यरूपत्वेन द्वित्वाद्यप्रतीतेर्न
द्विवचनादि किंत्वेकवचनमेवोत्सर्गतः·त्वया मया अन्यैश्च भूयते·बभूवे·स्यसिच्सी
युट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च·उपदेशे योऽच् तदंतानां
हनादीनां च चिणीवांगकार्यं स्यात्स्यादिषु भावकर्मणोर्गम्यमानयोः स्यादीनामिडागमश्च·
चिण्वद्भावपक्षेयमिट्·चिण्वद्भावाद्वृद्धिः·भाविता·भविता·भाविष्यते·भविष्यते·भू
यतां·अभूयत·भूयेत·भाविषीष्ट·भविषीष्ट·चिण्भावकर्मणोः·च्लेश्चिण्भावकर्म
वाचिनि तशब्दे परे·अभावि·अभाविष्यत·अभविष्यत·अकर्मकोप्युपसर्गवशात्सकर्म
कः·अनुभूयते·आनंदश्चैत्रेण त्वया मया च·अनुभूयते·अनुभूयेते·अनुभूयंते·त्वमनु

म.
९७

व

भूयसे· अहमनुभूये· अन्वभावि· अन्वभाविषातां· अन्वभाविषातां· ण्यंतात्कर्मणितङ्य
क्· णिलोपः· भाव्यते· भावयांचक्रे· भावयांबभूवे· भावयामासे· चिण्वदिट् आभियत्वेना
सिद्धत्वाण्णिलोपः· भाविता भावयिता· भाविष्यते· भावयिष्यते· भाव्यतां· भाव्येतां· अ
भाव्यत· भाविषीष्ट· भावयिषीष्ट· अभावि· अभाविषातां· अभावयिषातां· बुभूष्य
ते· बुभूषांचक्रे· बुभूषिता· बुभूषिष्यते· बोभूय्यते· अकृत्सार्वधातुकयोर्दीर्घः· स्तूय
ते विष्णुः· स्ताविता· स्तोता· स्ताविष्यते· स्तोष्यते· अस्तावि· अस्ताविषातां· अस्तोषातां· गु
णोर्त्तीइति गुणः· अर्यते· स्मर्यते· ऋछतीति गुणः· लिटि· आरे· सस्मरे· उपदेशग्रहणा
च्चिण्वदिट्· आरिता· अर्ता· स्मारिता· स्मर्ता· स्रस्यते· इदितस्तु· नंद्यते· इज्यते· तनो
तेर्यकि· आदंतादेशोवा· तायते· तन्यते· तपोनुतापेच· तपश्चिण्न कर्मकर्त्त
र्यनुतापे च· अन्वतप्त पापेन· घुमास्थेतीत्वं· दीयते· ददे· आतोयुक्चिण्कृतोः

तम.
९९

आदंतानां युगागमश्चिणि ञ्णिति कृति च · दायिता · दाता · दायिषीष्ट · दासीष्ट
अदायि · अदासातां · अदायिषातां · शाम्यते मोहो मुकुंदेन · चिण्णमुलो दीर्घोन्यतर
स्यां · चिण्परे णमुल्परे च णौ मितामुपधाया दीर्घो वा · शामिता · शमिता · शामयि
ता · शामिष्यते · शमिष्यते · शामयिष्यते · ण्यन्तत्वाभावे शाम्यते मुनिना · नोदात्तोप
देशस्य मान्तस्यानाचमेः · उपधाया वृद्धिर्न स्यात् चिणि ञ्णिति कृति च · अशामि · अदमि ·
उदात्तोपदेशस्येति किं · अगामि · मान्तस्येति किं · अवादि · अनाचमेः किं · आचामि ·
अनाचमिकमिवमीनामिति वक्तव्यम् · अकामि · भज्यते · भंजेश्च · चिणि लोपो वा ·
अभाजि · अभंजि · लभ्यते · विभाषा चिण्णमुलोः · लभेर्नुम् · अलंभि · अलाभि ·
यदा कर्मैव कर्तृत्वेन विवक्षितं तदा सकर्मकाणामप्यकर्मकत्वात् कर्तरि भावे च लः ·
कर्मवत्कर्मणा तुल्यक्रियः · कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवत् · का

प्र·सि

म·
६८

र्यातिदेशोयं·नसूत्रातिदेशः·तेनयगात्मने[illegible]चिण्वदिटः स्युः·पच्यते ओ
दनः·भिद्यते काष्ठं·अपाचि·अभेदि·भावे·भिद्यते काष्ठेन·भूषावाचि कि
रादीनां सनंतानां च यक्चिणौ चिण्वदिट् नेति वाच्यम्·अलंकुरुते कन्या·अलम
कृत·अवकिरते हस्ती·अवाकीर्ष्ट·गिरते·अगीर्ष्ट·आद्रियते·आदृत·किरादिस्तुदा
द्यंतर्गणः·चिकीर्षते कटः·अचिकीर्षिष्ट·तपस्तपःकर्मकस्यैव·कर्त्ता कर्मवत्·
तप्यते तपस्तापसः·अतप्त·तपःकर्मकस्यैवेति किम्·उत्तपति सु
वर्णं स्वर्णकारः·सकर्मकाणां प्रतिषेधो वक्तव्यः·अजा ग्रामं नयति·दुहिपच्योर्बहु
लं सकर्मकयोरिति वाच्यं·नदुहस्नुनमां यक्चिणौ·एषां कर्मकर्त्तरि यक्चिणौ न
स्ता·पृतस्य लुक्·गौः पयो दुग्धे·अदुग्ध·कर्मकर्त्तरि·अडांतात स्ते:·चिण वाकर्मक
र्तरि तेपरे·अकारि·अकृत·दुहस्तु·तथा·अदोहि·पक्षे कृतस्य·लुग्वेति पक्षे भुके

सिद्धि

रामः
१००

अदुग्ध· अधुक्षत· उदुंबरः फलं पच्यते· कुषिरजोः प्राचां श्यन्परस्मैपदं च· अनयोः
कर्मकर्तरि श्यन् वा स्यात् किंतु परस्मैपदं वा आत्मनेपदापवादः· कुष्यति· कुष्यते वा पादः· र
ज्यति· रज्यते वस्त्रं· स्यादिविषये तु नास्य ङकृत्रिः· कोषिषीष्ट· रंक्षीष्ट· ० इति भाव
कर्मप्रक्रिया· अभिज्ञावचने लृट्· स्मृतिबोधिन्युपपदे भूतानद्यतने धातोर्लृट्·
लङोपवादः· वस निवासे· स्मरसि कृष्ण गोकुले वत्स्यामः· एवं बुध्यसे चेतसे इत्यादि
योगेपि· न यदि· यद्योगे उक्तं न· अभिजानासि यत्कृष्ण वने अभुञ्ज्महि· विभाषा साकां
क्षे· उक्तविषये लृड्वा· लक्ष्यलक्षणभावेन साकांक्षे धात्वर्थः· स्मरसि कृष्ण वने
वत्स्यामस्तत्र गाश्चारयिष्यामः· वासो लक्षणं चारणं लक्ष्यं· पक्षे लङ्· परोक्षे लिट्·
चकार· उत्तमपुरुषे चित्तविक्षेपादिना पारोक्ष्यं· सुप्तोहं किल विललाप· अत्यंता
पह्नवे लिड्वक्तव्यः· कलिंगेष्ववात्सीः· नाहं कलिंगान् जगाम· प्रश्ने चासन्नकाले·
आसन्नकाले पृच्छ्यमानेर्थे लिट्विषये लङ्लिटौ स्तः· अगच्छत् किं· जगाम किं·

पञ्चवर्षान्तरमासन्नकालं· पञ्चवर्षातीतं तु विप्रकृष्टकालमित्याहुः॥

ल·यतीते २ नल

म·
६९

लट् स्मे· लिटोपवादः· यजति स्म युधिष्ठिरः· अपरोक्षे च· भूतानद्यतनेर्थे लट्
स्यात् स्मयोगे· एवं स्म पिता ब्रवीति· ननौ पृष्टप्रतिवचने· भूते लट्· अकार्षीः किं·
ननु करोमि भोः· नन्वोर्विभाषा· न करोमि· नाकार्षम्· अहं नु करोमि· अहं न्वका
र्षं· पुरि लुङ् चास्मे· पुरायोगे भूतानद्यतने वा लुङ् वा लट्· न तु स्मयोगे· पक्षे य
थाप्राप्तं· वसंतीह पुरा छात्राः· अवात्सुः· अवसन्· ऊषुर्वा· अस्मे किं· यजति स्म
पुरा· भविष्यतीत्यनुवर्त्तमाने· यावत्पुरानिपातयोर्लट्· यावद्भुंक्ते· पुरा भुंक्ते·
निपातयोः किं· यावद्दास्यते· तावद्भोक्ष्यते· करणभूतया पुरया यास्यति· विभा
षा कदाकर्ह्योः· लट् स्यात्· कदा कर्हि वा भुंक्ते भोक्ष्यते भोक्ता वा· वर्त्तमानसा
मीप्ये वर्त्तमानवद्वा· वर्त्तमाने ये प्रत्ययास्ते वर्त्तमानसमीपे भूते भविष्यति
च वा स्युः· कदा आगतोसि· अयमागच्छामि· आगमं वा· कदा गमिष्यसि· एष

न

राम:
९१

श्री

गच्छामि · गमिष्यामि · आशंसायां भूतवच्च · भविष्यत्काले भूतवद्वर्त्तमानवच्च प्रत्यया वा स्युराशंसायां · देवश्चेद्वर्षीद्वर्षति वर्षिष्यति वा धान्यमवाप्स्म वपाम वप्स्यामो वा · क्षिप्रवचने लृट् · क्षिप्रपर्यायोपपदे पूर्वविधिविषये लृट् · वृष्टिश्चेत्क्षिप्रमाशु त्वरितं वा आयास्यति · शीघ्रं वप्स्यामः · आशंसावचने लिङ् · आशंसावाचिन्युपपदे भविष्यति लिङ् स्यान्न भूतवत् · गुरुश्चेदुपेयादाशंसे ऽधीयीय · आशंसे क्षिप्रमधीयीय · हेतुहेतुमतोर्लिङ् · वा स्यात् · कृष्णं नमेच्चेत्सुखं यायात् · कृष्णं नंस्यति चेत्सुखं यास्यति · भविष्यत्येवेष्यते · नेह · हन्तीति पलायते · इच्छार्थेषु लिङ्लोटौ · इच्छामि भुञ्जीत भुङ्क्तां वा भवान् · एवं कामयते · प्रार्थये · कामप्रवेदनेऽकच्चिति वक्तव्यम् · नेह · इच्छन्करोति · लिङ्च · समानकर्तृकेषु इच्छार्थेषु · भुञ्जीयेति इच्छति · विधिनिमन्त्रणेति लिङ् · विधिः प्रेरणं · [illegible]त्यादेनिकृष्टस्य प्रवर्त्तनं · [illegible] · यजेत · निमन्त्रणं नियोग

ल·
म·
७०

करणं·आवश्यके श्राद्धभोजनादौ दोहित्रादेः प्रवर्त्तनं·इह भुञ्जीत·आमन्त्रणं काम
चारानुज्ञा·इहासीत·अधीष्टं सत्कारपूर्वको व्यापारः·पुत्रमध्यापयेत्·संप्रश्नः सं
प्रधारणं·किं भो वेदमधीयीय·उत तर्कं·प्रार्थनं याच्ञा·भो भोजनं लभेय·एवं लो
ट्·प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च·प्रैषो विधिः·अतिसर्गः कामचारानुज्ञा·चे
न लोटोऽनुकर्षणं प्राप्तकालार्थम्·भवान् यजतां·अर्हे कृत्यतृचश्च·चाल्लिङ्·त्वं
कन्यां वहेः·शक्ति लिङ् च·शक्तो लिङ् स्यात्·चात्कृत्याः·त्वं भारं वहेः·धातुसंबं
धे प्रत्ययाः·धात्वर्थानां संबंधे यत्र काले प्रत्यया उक्तास्ततोऽन्यत्रापि स्युः·तिङ्वाच्य
क्रियायाः प्राधान्यात् तदनुरोधेन गुणभूतक्रियावाचिभ्यः प्रत्ययाः·वसन् ददर्श·
भूते लट्·अतीतवासकर्तृकं दर्शनमर्थः·सोमयाज्यस्य पुत्रो भविता·सो
मेन यक्ष्यमाणो यः पुत्रस्तत्कर्तृकं भवनं·क्रियासमभिहारे लोट् लोटो हि

भवता पठ्यताम्

यानः

१०२

त१ (पु१ स्व२

स्वौ वा च तध्वमोः· पौनः[illegible]न्ये भृशार्थे च द्योत्ये धातोर्लोट् स्यात्· तस्य च हिस्वौ स्तस्ति
ङपवादौ· तौ च हिस्वौ क्रमेण परस्मैपदात्मनेपदसंज्ञौ स्तस्तिङः संज्ञा च· तध्वमोर्वि
षये तु हिस्वौ वा स्तः· पुरुषैकवचनसंज्ञे नानयोरतिदिश्यते· हि[illegible]विधानसामर्थ्यात्·
तेन सकलपुरुषवचनविषये परस्मैपदिभ्यो हिः कर्त्तरि· आत्मनेपदिभ्यः स्वो भावकर्म
णोश्च· समुच्चयेऽन्यतरस्याम्· अनेकक्रियासमुच्चये द्योत्ये प्राग्युक्तं वा·[illegible]धाविध्यनुप्र
योगः पूर्वस्मिन्· आद्ये लोड्विधाने लोट्प्रकृतिभूत एव धातुरनुप्रयोज्यः· समुच्चये सा
मान्यवचनस्य· समुच्चये लोटो विधौ सामान्यार्थस्य धातोरनुप्रयोगः स्यात्· अनुप्रयो
गाद्यथायथं लङाद्ये तिवादयश्च· ततः संख्याकालयोः पुरुषविशेषार्थस्य चाभिव्य
क्तिः· क्रियासमभिहारे द्वे वाच्ये· याहि याहीति याति· पुनः पुनरतिशयेन वा यानं द्योतन्या
र्थः· एककर्त्तृकं वर्त्तमानं यानं यातीत्यस्य· इतिशब्दस्तु तात्पर्यं ग्राहयति· एवं यातः· या
न्ति· यासि· याथः· याथ· यातयातेति ध्रुवं याथ· याहि याहीत्ययासीत्· यास्यति या·

अ

ले:

म:

म०

ऽधीष्व अधीष्वेत्यधीते · एवं द्विवचेपदसे अधी[illegible]मधीध्वमिति यूयमधीध्वे · सक्तून्
पिब सक्तून्पिब धानाः खादेत्यभ्यवहरति · अन्नं भुंक्ष्व दधि कमा खादस्वेत्यभ्यवहरते ·
तक्षमो सुपिवत स्वादतेत्यभ्यवहरथ · भुंध्वमास्वादध्वमित्यभ्यवहरध्वे · पक्षे हिस्वौ ·
अत्र समुच्चियमानक्रियावाणां मनुप्रयोगाध्वनिसामान्येनाभेदान्वयः · पक्षे सक्तूंपि
बति धानाः खादति · अन्नं भुंक्ते दधि कमा खादते · एतेन · पुरीमवस्कंद लुनीहि नं
दनं मुषाण रत्नानि हरामरांगनाः · विग्रह्य चक्रे नमुचिद्विषा वली य इत्थमस्वास्थ्य
महर्दिवं दिवः · इति व्याख्यातं · अवस्कंदनलवनादिक्रियाभूतानघ्ननपरीक्षाय कर्
कर्तृका अस्वास्थ्यक्रियेत्यर्थात् · भृशं पुनःपुनरवस्कंदेत्यादिरर्थ इति व्याख्या
नं अयमपूर्वक्रमेव · द्वितीयलकारोक्रियासमभिहारे इत्यस्यानुवृत्तेः · लोट् तस्य
हिस्वादेशः · पुरीमवस्कंदेत्यादि मध्यमपुरुषैकवचनमित्यपि केषांचिद्भ्रमएव ·
पुरुषवचनांतरे लोडेष्वपि[illegible] · इति लकारार्थप्रक्रिया ·

रामः

१०३

श्री
स.
१

यव

इजादेः सनुमः · सनुमश्चेदिजादिर्हलंताद्विहितस्य कृ[illegible]स्य णः स्यात् · प्रेंखणीयं ·
इजादेः किं · मगि सर्पणे · प्रमंगनीयं · वानिंसनिक्षनिंदां · एषां नस्य णो वा कृति परे ।।।
प्रणिंसितव्यं · प्रनिंसितव्यं · नभाभूपूकमिगमिप्यायीवेपां · एभ्यः कृन्नस्य णो
न · प्रभानीयं · प्रभवनीयं · ण्यंतभादीनामुपसंख्यानं · प्रभापनीयं · कृत्यल्युटो
बहुलं · क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव · विधेर्विधा
नं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदंति · स्नात्यनेन स्नानीयं चूर्णं · दीय
ते स्मै दानीयो विप्रः · ऋदुपधाच्चाक्लृपिचृतेः · क्यप् स्यात् · वृत् · वृत्यं · वृध् · वृध्यं ·
क्लृपिचृत्योस्तु कल्प्यं · चर्त्यं · अचो यत् · चेयं · जेयं · ईद्यति · आतः · गुणः देयं ग्लेयं · राम:
पोरदुपधात् · पवर्गांतादुपधायत् · ण्यतोऽपवादः · शप्यं · लभ्यं · आङो यि १०४
आङः परस्य लभेर्नुम् स्याद्यादौ प्रत्यये · आलंभ्यो गौः · उपात्प्रशंसायां · उपलंभ्यः साधुः ·

ता६

अचः परत्वाभावाद्प्राप्ते वचनं ॥ परस्परसंबन्धः पूर्वस्य सूत्रे

आ निर्विण्णः ॥९

धातोः ॥ आतृतीयसमाप्तेर्ये प्रत्ययास्ते धातोः परे स्युः। कृदतिङ्। कृत्संज्ञा। वासरूपोऽस्त्रियां। अस्मिन्धात्वधिकारेऽसरूपोऽपवादप्रत्यय उत्सर्गस्य बाधकः स्त्र्यधिकारोक्तं विना। कृत्याः। ण्वुल्तृचावित्यतः प्राक् कृत्यसंज्ञाः स्युः। कर्तरि कृत् इति प्राप्ते। तयोरेव कृत्यक्तखलर्थाः। एते भावकर्मणोरेव स्युः। तव्यत्तव्यानीयरः। धातोरेते स्युः। एधितव्यं एधनीयं त्वया। भावे औत्सर्गिकमेकवचनं क्लीबत्वं च। चेतव्यश्चयनीयो वा धर्मस्त्वया। केलिमर उपसंख्यानं। पचेलिमाः माषाः। पक्तव्या इत्यर्थः। भिदेलिमाः सरलाः। कर्मणि प्रत्ययः। वसेस्तव्यत्कर्तरि णिच्च। वसतीति वास्तव्यः। कृत्यचः। उपसर्गस्थान्निमित्तात्परस्याच उत्तरस्य कृत्स्थस्य नस्य णत्वं स्यात्। प्रयाणीयं। अचः किं प्रमग्नः। निर्विण्णस्योपसंख्यानं। णेर्विभाषा। ण्यन्तात्। प्रयापणीयं प्रयापनीयं। हलश्चेजुपधात्। हलादेरिजुपधात्कृन्नस्याचः परस्य णत्वं वा। प्रकोपणीयं प्रकोपनीयं। हलः किं। प्रोहणीयं। इजुपधात् किं। प्रवपणीयम्।

३ उपसर्गस्थान्निमित्तात्परस्य [illegible] वा स्यात् ९

म·कौ·पू·
१

कोर ४२

श्रीगणेशायनमः॥ ॥धातोः॥आतृतीयाध्यायांतंयेप्रत्ययास्तेधातोःपरेस्युः
कृदतिङ् इतिकृत्संज्ञा वासरूपोऽस्त्रियाम् अस्मिंधात्वधिँऽसरूपोपवाद
प्रत्यय उत्सर्गस्य वावाधकः स्त्र्यधिकारोक्तंविना कृत्याः ण्वुल्तृचावि
त्यतःप्राक्कृत्यसंज्ञाःस्युः कर्तरिकृत् इतिप्राप्ते तयोरेवकृत्यक्तखल
र्थाः एतेभावकर्मणोरेवस्युः तव्यत्तव्यानीयरः धातोरेतेस्युः ए
धितव्यम् एधनीयम्त्वया भावेऔत्सर्गिकमेकवचनंक्लीवत्वं
च चेतव्यश्चनीयोवाधर्मस्त्वया केलिमर् उपसंख्यानम् पचेलि
मामाषाः पक्तव्याइत्यर्थः भिदेलिमाः शरलाः कर्मणिप्रत्ययः

पचनीया·

सामान्यसामग्र्यस्य:३

एधवृद्धौ·

डुपचष्पाके

गुरुः
१

चिञ्चयने·२

भिदिर्विदारणे·

भेत्तव्या इत्यर्थः भेदनीया·

अचः परत्वाभावात्प्राप्ते वचनं।परस्य ण त्वम् पूर्वस्य सुत्वम् निर्दिष्टः॥ = वासव्याइसमनुवसनानुकूलव्यापाराश्रयः इत्यर्थो बोध्यः =१

२ उपसर्गस्थान्निमित्तात्परस्य ण्यन्ताद्विहितो यः कृत्स्थस्य नस्य णो वा स्यात्॥२ विहितविशेषणं किं· प्रयाप्यमाणं पठ्य =३

वस निवासे

या प्रापणे

वसेस्समध्यकेनेरिशिाव वसँतीतियास्त्रव्यः कृत्यचः उपसर्गस्थान्निमित्तात्परस्याच उत्तरस्य कृत्स्थस्य नस्य णत्वं स्यात् प्रयाणीयं अचः किं प्रमग्नः निर्विण्णस्योपसंख्यानं णेर्विभाषा प्रागवत् प्रयापणीयं प्रयापनीयं हलश्चेजुपधात् हलादेरिजुपधात् कृत्स्थस्याचः परस्य नस्य णो वा प्रकोपणीयम् प्रकोपनीयं हलः किं प्रोहणीयं इजुपधात्किं प्रवपणीयं इजादेः सनुमः सनुमश्चेद्भवति इजादेर्हलन्तान्नाद्विहितो यः कृत्तत्स्थस्यैव प्रेंखणीयं इजादेः किं मगि सर्पणे प्रमंगनीयं वा निंसनिंक्षनिंदां एषां नस्य णो वा ८

कुप

कोप

उह वितर्के

डुवप बीजसन्ताने

टुवेपृ कंपने= गम्लृ सृप्लृ गतौ= ओप्यायी वृद्धौ=

कमु कान्तौ= भा दीप्तौ= भू सत्तायाम्= पूङ् पवने=

शिंसितुंवनेः वर्णागमोवर्णविपर्ययश्च द्वौचापरौवर्णविकारनाशौ॥ धातोस्तदर्थातिशयेनयोगस्तदुच्यतेपंचविधंनिरुक्तं॥१॥=४= = = = =

माहिमै:२

म·कौ·मु· इति प्रणिंसितव्यं प्रनिंसितव्यं नशाभ्ररूकमिगमिप्यायीवेपी एभ्यः
२ श्नन्तस्यणोन प्रमानीयं प्रमनीयं रापन्नमादीनामुपसंख्यानं प्रमा
पनीयं कृत्यल्युटोबहुलं क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभा
षाक्वचिदन्यदेव विधेर्विधानंबहुधासमीक्ष्यचतुर्विधंबाहुलकंवदंति·
स्नात्यनेनस्नानीयं चूर्णंदीयतेऽस्मैदानीयोविप्रः ऋदुपधाच्चाक्लृ
वृतुवृधुभाषार्थाः पिचृतेः क्यप्स्यात् वृत् वृत्यं वृध् वृध्यं कृपिचृत्योस्तु कल्प्यं·
चर्त्यं अचोयत् चेयं जेयं ईद्यति आत गुणः देयं ग्लेयं पोर
दुपधात् पवर्गान्तादकुपधाद्यत् ण्यतोपवादः शप्यं लभ्यं

गुरुः
२

चिन्नूवर्यनेः२ जिजयेः२

दाणदानेः२ डेलुमेहर्षक्षयेः२

गद व्यक्तायां वाचि=३ चर गतिभक्षणयोः=३
यमोपरिवेषणे=३

शक विभाषितो मर्षणे=२
षह मर्षणे=२

आङो यि आङः परस्य लभेर्नुम्यादौ प्रत्यये आलम्भ्यो गौः उपात्प्रशंसायां
उपलम्भ्यः साधुः स्तुतौ किम् उपलभ्यं श्रावकः उपलभ्यः शकिसहोश्च
शक्यं सह्यं गदमदचरयमश्चानुपसर्गे गद्यं मद्यं चर्यं चेराङि
चागुरौ आचर्यो देशः अगुरौ किं आचार्यो गुरुः यम्यम् अवद्यपण्य
वर्याः गर्ह्यपणितव्यानिरोधेषु अवद्यं पापे पण्यं विक्रेयम् शतेन
वर्या कन्याः वह्यं करणम् वहन्ति अनेनेति वह्यं शाकटम् वाह्यमन्यत्
अर्यः स्वामिवैश्ययोः अनयोः किम् आर्यो ब्राह्मणः उपसर्या काल्या
प्रजने गर्भग्रहणे प्राप्तकालावदित्यर्थः उपसर्या गौः गर्भाधाना

अनुपसर्गे सुप्युपपदे हनो भावे वं वा पूर्वात ४

म.कौ.ल. र्थं ह्वयमेरणोपगन्तुं योग्य इत्यर्थः प्रजनेकाले इति किम् उपसर्या काशी प्रा
३ प्तुवेत्यर्थः अजर्यं संगतम् विज्ञायं वेतन्न जीर्यतीत्यजर्यम् वदः सुपि
क्यप् च वा यत् ब्रह्मोद्यम् ब्रह्मवद्यम् भुवो भावे॥ क्यप् ब्रह्म
णो भावो ब्रह्मभूयम् हनस्त च॥ चात्क्यप् ब्रह्मणो हननं ब्रह्मह
त्या एतिस्तुशास्वृदृजुषः क्यप् ह्रस्वस्य पिति कृति तुक् इत्यः स्तु
त्यः शिष्यः वृङ् इति ङितो ग्रहणान्नेह वृत्यः वृङस्तु वार्या ऋ
त्विजः आदृत्यः जुष्यः पुनः क्यप् तुकोः परस्यापि रूपतो बाध
नार्थः अवश्यस्तुत्यः मृजेर्विभाषा मृजेः क्यप् वा मृज्यो गुरुः ३

ऋहलोर्ण्यत् अवर्णान्ताद्धलन्ताच्च ण्यत् चजोः कु घिण्यतोः चजोः कुत्वं घिति
ण्यति च निष्ठायामनिट इति वक्तव्यं तेनेह न गर्ज्यं मार्ग्यं ओरावश्यके ण्य
त् पाव्यं लुंपेदवश्यमः कृते तुंकाममनसोरपि समो वा हिततत्योर्मांसस्य प
चियुड्घञोः अवश्यपाव्यं तुम् गन्तुकामः सम संहितं संततं मांसः मां
स्पचनी मांस्पाकः भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा
एते कृत्यन्ताः कर्त्तरि वा निपात्यन्ते भवतीति भव्यः भव्यमनेनेति वा
भोज्यं भक्ष्ये भोग्यमन्यत् वचोऽशब्दसंज्ञायाम् नकुत्वं वाच्यम् वाक्यम
न्यत् राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः एते सप्त क्यब

म.को. स्नानिपात्यंते भिद्योद्ध्यौनदे नदेकिम् भेत्ता उज्झिताः पुष्यसिद्ध्यौनक्षत्रे विपूय
४ विनीयजित्यामुंजकल्कहलिषु विपूयोमुंजः विनीयःकल्कः जित्योह
लिः प्रत्यपिभ्यांग्रहेः छन्दसीतिवक्तव्यम् प्रतिगृह्यम् अपिगृह्यं लोके
तुप्रतिग्राह्यम् पदास्वैरिबाह्यापक्ष्येषुच अवगृह्ये प्रगृह्यंपदं अस्वैरिप
रतन्त्रः गृह्यकाःशुकाः ग्रामगृह्याःसेनाः आर्यैर्गृह्यते आर्यगृह्यः ।
तत्पक्षाश्रितइत्यर्थः विभाषाकृवृषोः कृत्यं वृष्यम् पक्षेण्यत् कार्यं वर्ष्यं
युग्यंचपत्रे पत्रंवाहनम् योग्यमन्यत् अमावस्यदन्यतरस्याम् अमासहवस
तोस्यांचन्द्राकाविति अमावस्या अमावास्यावा अग्नौपरिचाय्योपचाय्यसमूह्याः गुरुः
४

अग्नावेनेमाधवः क्रतौकुण्डपाय्यसंचाय्यौ विस्याग्निविसेव विस्याग्निः अ
ग्नेश्चयन अग्निविस्या॥ ॥इतिकृत्यप्रक्रिया॥ ॥ण्वुल्तृचौ ३।१।१३३ धातोरेतौस्तः
कर्त्तरिकृदितिकर्त्रर्थे युवोरनाकौ ७।१।१ युवुस्य तयोरनुनासिकयोरेतौस्तः कार
कः कर्त्ता नन्दिग्रहिपचादिभ्योऽल्युणिन्यचः ३।१।१३४ नंद्यादेर्ल्युर्ग्रह्यादेर्णिनिःप
चादेरच्स्यात् नन्दयतीतिनन्दनः जनार्दनः . लवणः गणोनिपातना
णत्वम् ग्राही स्थायी मन्त्री पचः आकृतिगणोऽयम् इगुपधज्ञाप्री
किरः कः ३।१।१३५ क्षिपः बुधः कृशः ज्ञः प्रियः किरः आतश्चोपसर्गे ३।१।१३६ प्रज्ञः
सुग्लः पाघ्राध्माधेट्दृशः शः ३।१।१३७ पिबः जिघ्रः धमः धयः पश्यः अनुपसर्गा

हि१

लिप उपदेहे = १   षह मर्षणे १   दुदाञ् दाने ३ डुधा

विदॢ लाभे २   यं २   षध नाऽऽस्ने = १   डुधाञ् धारणपोषणयोः ३

म.कौ.कृ. ३।१।१३८ लिंपविंदधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च लिंपः विंदः धारयः

५ पारयः वेदयः उदेजयः चेतयः॥ सातयः॥ साहयः॥ अनुपसर्गात्किम्॥ प्रलिपः॥ गवा

दिषु विंदेस्संज्ञायां गोविन्दः अरविंदः ३।१।१३९ ददातिदधात्योर्विभाषा ददः द

यः पक्षेवक्ष्माणोणः दायः धायः ३।१।१४० ज्वलितिकसंतेभ्यो णः वारयातः

ज्वालः ज्वलः चालः चलः श्याऽऽद्व्यधाऽऽस्रुसंस्वतीणवसावहृलिह

३।१।१४१ श्लिषश्वसश्च अवश्यायः आत् धायः आस्रावः संस्रावः अत्यायः अ

वहारः अवसायः लेहः श्लेषः श्वासः ३।१।१४३ विभाषाग्रहः व्यवस्थितविभा

षेयम् तेनजलचरेग्राहः ज्योतिषिग्रहः ३।१।१४४ गेहेकः गेहम्॥ तिधात्मादिकमिर

ज्वल दीप्तौ कस गतौ प्रतापयोः

ष्णु प्रस्रवणे

गुरुः ५

गोत्राद्दे=३   पूकुगतौ४ स्वनुजवद्दारोग ३

तीर्णम् शिल्पिनिष्वुन् क्रियाकौशलंशिल्पम् षः प्रत्ययस्य आदिरि
त नृतिखनिरञ्जिभ्यः एव नर्त्तकः खनकः अकेअनेचरंज्येर्नलोपोवाच्यः
रंजरुगे=३ रजकः ३।१।१४६ गस्थकन् गाथकः ३।१।१४७ ण्युट्च गायनः प्रुसृल्वः समभिहारेवुन् ३।१।१४९ समभि
हारग्रहणेनसाधुकारित्वंलक्ष्यते प्रवकः सरकः आशिषिच ३।१।१५० वुन्स्यात्
जीवतात्जीवकः ३।१।९२ तत्रोपपदंसप्तमीस्थम् सप्तम्यन्तेपदेकर्मणीत्यादौवा
३ न४ च्यत्वेस्थितंयत्कुंभादितद्वाचकंपदमुपपदसंज्ञंस्यात् कर्मण्यण् ३।२।१ कर्म
ण्युपपदेधातोरण् कुंभंकरोतीतिकुंभकारः आतोनुपसर्गेकः ३।२।३ सुप्युपप
दे अणोपवादः गोदः कंबलदः अनुपसर्गेकिं गोसंदायः मूलवि

कुंभकारकुलालस्तस्यस्यलगाएकेवलेससम्र=२=
ओतो युक्तचिराद्द तोरिति युक्ते=१

म·को·घ·भुजादिभ्यः कः मूलानिविभुजतिमूलविभुजोरथः आकृतिगणोयम्

८ घिध्रः कुध्रः सुपिस्थः ३।२।१।५ समस्थः विषमस्थः सुपितियोगविभागादन्यस्माद

पि द्वाभ्यांपिबतीतिद्विपः अंबांबगोभूमिसव्यापद्वित्रिकुशेकुशंकुगुमंजिपुं

जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः ८।३।९७ एभ्यः स्थस्यसस्यषःस्यात् द्विष्ठः त्रिष्ठः

तुंदशोकयोःपरिमृजापनुदोः ३।२।५ तुंदशोकयोः कर्मणोरुपपदयोराभ्यांकः

स्यात् आलस्यसुखाहरणयोरितिवक्तव्यम् तुंदपरिमृजोऽलसः

शोकापनुदःसुखस्याहर्त्ता प्रेदाज्ञः ३।२।६ कःस्यात् सर्वप्रदः पथिप्रज्ञः

समिख्यः ३।२।७ गोसंख्यः गापोष्टक् ३।२।८ कर्मण्युपपदे सामगः पिबतेःसुरा गुरुः ८

आत्रैस्मास्थ्यां मतेकः
गतभूवांउत्थांतंगतवृ्यः=२८

शीध्वोरितिवाच्यम् सुरापी शीधुपी हरतेरनुद्यमनेऽच् ३।२।१।९ अंशहरः अनुद्यमने
किं भारहारः शक्तिलांगलांकुशतोमरयष्टिघटघटीधनुष्षुग्रहः शक्तिग्रहः
वयसि च ३।२।१।१० उद्यमनार्थं सूत्रम् कवचहरः कुमारः आङि ताच्छील्ये ३।२।१।११ पुष्पाहा
हरिति तच्छीलः पुष्पाहरः अर्हः ३।२।१।१२ अस्मात् कर्मण्युपपदे पूजार्हा ब्राह्मणी
क×४ स्तंवकर्णयोरमिजपोः ३।२।१।१३ हस्तिसूचकयोरितिवक्तव्यम् स्तंवेरमो हस्ती कर्णे
जपः सूचकः अधिकरणे शेतेः ३।२।१।१५ खे शेते खशयः पार्श्वादिषूपसंख्यानं
पार्श्वाभ्यां शेते पार्श्वशयः पृष्ठशयः उदरशयः चरेष्टः ३।२।१।१६ अधिकरणे उप
पदे कुरुचरः भिक्षासेनादायेषु च ३।२।१।१७ भिक्षाचरः सेनाचरः आदायेति ल्य

म·कौ·मावंतं आदायचरः कृञोहेतुताच्छील्यानुलोम्येषु ३।२।२० एषुद्योत्येषुकृञष्टः

७ अतःकृकमिकंसःकुंभपात्रकुशाकर्णीष्वनव्ययस्य ८।३।४६ अतउत्तरस्यानव्य

यविसर्गस्यसमासेनित्यंसादेशःकरोत्यादिषुपरेषु यशस्करीविद्याश्राद्धक

रः वचनकरः दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनांदीकिंलि

पिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजंघाबाह्वहर्यत्तद्धनुररुष्षु ३।२।२१ एषु

कृञष्टोहेत्वादावपि दिवाकरः विभाकरः निशाकरः कस्कादित्वा

त्सः भास्करः बहुकरः एककरः द्विकरः अहस्करः धनुष्करः।

अरुष्करः इत्यादि नशब्दश्लोककलहगाथावैरचाटुसूत्रमंत्रपदेषु। ३।२।२३ टुकृञः ७

ऽसुहृत्त्व द्योतन ॥ नादकारः ॥ स्तंबशकृतोरिन् ॥ ३।२।२४ व्रीहिवत्सयोरिति वक्तव्यम् ॥
स्तंबकरिर्व्रीहिः ॥ शकृत्करिर्वत्सः ॥ हरतेर्दृतिनाथयोः पशौ ॥ ३।२।२५ दृतिहरिः ॥ ना
थं नासारज्जुं हरतीति नाथहरिः पशुः ॥ फलेग्रहिरात्मंभरिश्च ॥ ३।२।२६ एतौ निपा
त्येते ॥ चात् कुक्षिंभरिः ॥ चांद्रास्तु आत्मोदरकुक्षिष्विति पठुः ॥ ज्योत्स्नाक
रंभमुदरम्भरयश्चकोरा इति मुरारिः ॥ एजेः खश् ॥ ३।२।२८ शपता तु ॥ अरुर्द्विष
दजन्तस्य मुम् ॥ ६।३।६७ अरुषो द्विषतोजनन्तस्य मुं खिदन्ते न त्वव्ययस्य ॥ शि
त्वाच्छबादि जनं एजयतीति जनमेजयः ॥ वातशुनीतिलशर्द्धेष्वजधे

ट्तुदजहातिभ्यः खश् ॥ वातमजा मृगाः ॥ खित्यनव्ययस्य ॥ ६।३।६६ ह्रस्वः ॥ शु
निन्धयः ॥ तिलन्तुदः ॥ शर्द्धं जहा माषाः ॥ नासिकास्तनयोर्ध्माधेटोः ॥ ३।२।२९
स्तने धेटो नासिकायां ध्मश्चेति वक्तव्यम् ॥ स्तनन्धयः ॥ नासिकंधमः ॥
नासिकंधयः ॥ टित्वात् स्तनन्धयी ॥ नाडीमुष्ट्योश्च ॥ ३।२।३० ध्माधेटोः खश्
॥ नाडिंधमः ॥ मुष्टिंधयः ॥ उदि कूले रुजिवहोः ॥ ३।२।३१ कूलमुद्रुजः ॥ कू
लमुद्वहः ॥ वहाभ्रे लिहः ॥ ३।२।३२ वहः ॥ स्कन्धः ॥ तल्लेढीति वहंलिहो गौः ॥
अभ्रंलिहो वायुः ॥ परिमाणे पचः ॥ ३।२।३३ प्रस्थंपचा स्थाली ॥ खारिंपचः ॥

नाडिंधमः स्वर्णकारकलारोहक्लाकारकेलमर = १

२ नाडिंधयः ॥ मुष्टिंधमः ॥ २

कटाहः॥ ३।२।२।१४ मितनखे च॥ मितंपचा ब्राह्मणी॥ नखंपचा यवागू॥ विध्वरु
षोस्तुदः॥ ३।२।२।१५ विधुंतुदः॥ अरुंतुदः॥ असूर्यललाटयोर्दृशितपोः॥ ३।२।२।१६ असू
र्यमित्यसमर्थसमासः॥ दृशिनानञः संवन्धात्॥ असूर्यंपश्याराजदा
राः॥ ललाटंतपः॥ सूर्यः॥ प्रियवशे वदः खच्॥ ३।२।२।१८ प्रियंवदः॥ वशंवदः॥ का
गमेः सुपि वाच्यः॥ मितंगमो हस्ती॥ विहायसो विह च॥ खच्च डिद्वा वाच्यः
॥ विहंगमः॥ विहगः॥ भुजंगमः॥ भुजङ्गः॥ द्विषत्परयोस्तापेः॥ ३।२।२।१९ खच्
॥ खचि ह्रस्वः॥ ६।४।५।१९ खचि परे णौ उपधाया ह्रस्वः॥ द्विषंतंपरंतापयतीति

प्रकृतिप्रत्ययसमुदायाभ्यां व्रते गम्ये = १

३।२।४० ~~———~~ ६।३।६९

द्विषंतपः॥ परंतपः॥ वाचियमोव्रते॥ खच्॥ वाचंयमपुरंदरौच॥ वाक्पु

म·कौ·ख· रोरमंतत्वंनिपात्यते॥ वाचंयमोमौनव्रती॥ व्रतेः किम्॥ अन्यस्मादिना

१ वाचंयच्छतीतिवाग्यामः॥ पूःसर्वयोर्दारिसहोः॥ ३।२।४१ पुरंदारयतीतिपुरं

दरः॥ सर्वंसहः॥ भगंदारयतीतिभगंदरः॥ इतिकथं वा बाहुलकात्॥

सर्वकूलाभ्रकरीषेषुकषः॥ ३।२।४२ सर्वंकषः खलः॥ कूलंकषानदी॥

अभ्रंकषोवायुः॥ करीषंकषावात्या॥ मेघर्तिभयेषुकृञः॥ ३।२।४३ मे

घंकरः॥ ऋतिंकरः॥ भयंकरः॥ भयशब्देनतदन्तविधिः॥ अ

गुरुः

भगंदार ४

१

भयंकरः॥ ३।२।३४ क्षेमप्रियमद्रेराच॥एसुल्मगोणवातुखचू॥क्षेमंकरः॥क्षेम
कारः॥प्रियंकरः॥प्रियकारः॥मद्रंकरः॥मद्रकारः॥कथंतर्हि अल्या
रंभाक्षेमकराइति॥कर्मणःशेषत्वविवक्षायांपचाद्यचू॥सर्वंगंगा
धरभूधरादयः॥ ३।२।३५ आशितेभुवःकरणभावयोः॥खचू॥आशितोभवत्य
नेनआशितंभवओदनः॥आशितस्यभवनंआशितंभवओदनः॥
३।२।३६ संज्ञायांभृतृवृजिधारिसहितपिदमः॥खचू॥विश्वंबिभर्तीतिवि
श्वंभरः॥रथंतरंसामः॥पतिंवराकन्या॥शत्रुंजयोहस्ती॥युगंधरः

म॰कौ॰क
१०

३।२।४७
पर्वतः॥शत्रुंसहः॰अरिंदमः॥गमश्च॥सुतंगमः॥अंतात्यन्ताध्वदूरपा
३।२।४८
रसर्वानन्तेषुडः॥गमेः॥अंतगः॥सर्वत्रपन्नयोरितिवाच्यम्॥सर्व
त्रगः॥पन्नंपतितंगच्छतीतिपन्नगः॥उरसोलोपश्च॥उरसागच्छ
त्युरगः॥सुदुरोरधिकरणे॥सुखेनगच्छतीत्यस्मिन्सुगः॥दुर्गः॥अन्य
त्रापिदृश्यतइतिवाच्यम्॥ग्रामगः॥डेचविहायसोविहादेशोवाच्यः॥
३।२।४९
विहगः॥आशिषिहनः॥शत्रुंवध्यात्॥शत्रुहः॥आशिषिकिम्॥शत्रु
घातः॥दारावाहनोणन्तस्यचटःसंज्ञायाम्॥दारुहारेआङ्पूर्वाद्धन्ते

गुरुः
१०

रणटोंन्यस्य॥ रार्वोघाटः॥ वारीबा॥ वार्वोघाटः॥ वार्वोघातः॥ अपेक्ले
शतमसोः॥ ३।२।३।१० अपपूर्वाद्धन्तेर्डः॥ अनासिँरर्थमिदम्॥ क्लेशापहः पुत्रः
॥ तमोपहः सूर्यः॥ कुमारशीर्षयोर्णिनिः॥ ३।२।३।११ कुमारघाती॥ शिरसः शी
र्षभावो निपात्यते॥ शीर्षघाती॥ लक्षणे जायापत्योष्टक्॥ ३।२।३।१२ हन्तेष्टक्
लक्षणवति कर्त्तरि॥ जायाघ्नो ना॥ पतिघ्नी स्त्री॥ अमनुष्यकर्तृके च ३।२।३।१३
॥ जायाघ्नस्तिलकः॥ पतिघ्नी पाणिरेखा॥ पित्तघ्नं घृतम्॥ अमनुष्ये
किम्॥ आखुघातः॥ शूद्रः॥ अथ कथं वलभद्रः प्रलंबघ्नः॥ शत्रुघ्नः॥

११

प्र·कौ·कृ·

११

हतघ्न इत्यादि॥मूलविभुजादित्वात्सिद्धम्॥चोरघातोनगरघातोह
स्तीतिवाहुलकादेशः॥शक्तौहस्तिकपाटयोः॥ ३।२।५४ हनेष्टक्॥मनुष्य
कर्त्रर्थमिदंहस्तिघ्नोना॥कपाटघ्नश्चोरः॥कवाटेतिपाठान्तर
म्॥पाणिघताडघौशिल्पिनि॥ ३।२।५५ शिल्पिनिकिम्॥पाणिघातः॥र
ाजघउपसंख्यानम्॥राजानंहन्तिराजघः॥आढ्यसुभगस्थूल
पलितनग्नान्धप्रियेषुच्व्यर्थेष्वच्वौकृञःकरणेख्युन्॥ ३।२।५६ एषुच्व्यर्थे
ष्वच्व्यन्तेषुसुप्सुकृञःख्युन्॥अनाढ्यमाढ्यंकुर्वन्त्यनयाआढ्यंकरणी·

हनस्तोचिण्णलोः

गुरु:

११·

११

३।२।५७

॥अग्नौकिम्॥आधीकुर्वन्न्यनेनेन॥कर्त्तरिभुवःखिष्णुच्खुकञौ॥आ
ढ्यादिषुच्व्यर्थेष्वच्व्यन्तेषुभवतेरेतौस्तः॥अनाढ्यआढ्योभवति॥आ
ढ्यंभविष्णुः॥आढ्यंभावुकः॥सत्सूद्विषद्रुहदुहयुजविदभिदछि
दजिनीराजामुपसर्गेपिक्विप्॥ ३।२।६१ एभ्यःक्विबुसर्गेसत्यसतिचसु
प्युपपदे॥द्युसत्॥सदिरप्रतेतिषः॥उपनिषत्॥अंडसूः॥
प्रसूः॥मित्रद्विट्॥प्रद्विट्॥मित्रध्रुक्॥प्रध्रुक्॥गोधुक्॥अश्वयु
क्॥प्रयुक्॥वेदवित्॥निवित्॥अग्रगामाभ्यान्नयतेर्णोवाच्यः॥

॥कौ॥
म. कृ.
१२

अग्रणीं॥ग्रामणीः॥ ३।२।६२ भजो ण्विः॥अंशभाक्॥प्रभाक्॥ ३।२।६८ अदोनन्ने
॥विट् स्यात्॥आममत्तीत्यामात्॥सस्यात्॥अनन्ने किम्॥अन्ना
दः॥ ३।२।६९ क्रव्ये च॥अदेर्विट्॥पूर्वेणासिद्धे वचनं वासरूपेति प्राप्तस्य बा
धनार्थम्॥क्रव्यात्॥आममांसभक्षकः॥ ३।२।७० दुहः कप् घश्च॥का
मदुघाः॥ ३।२।७५ अन्येभ्योपि दृश्यते॥मनिन् क्वनिप् वनिप् विच ए
ते प्रत्यया धातोः स्युः॥ ७।२।८ नेड्वशि कृति॥वशादेः कृत इण्न॥सु
शर्मा॥प्रातरित्वा॥ ६।४।४१ विड्वनोरनुनासिकस्यात्॥विजावत इ

गुरु:
१२

तिविजावा॥ओलज्ञ अपनयने॥अवावा॥रोट्॥रेट्॥सुगरा॥क्रि
२४
३।२।४।७६
पूर्वै॥अर्यमपितृक्ष्यते॥उरवास्रवत्॥पर्णध्वत॥वाहभ्रट्॥अन्तः
॥पर्श्वान्तस्यान्निर्तेर्नस्यणत्वंस्यादुपसर्गस्थान्निमित्तात्परश्चेत्॥हे
प्राण्॥आत्रासः क्वावुपधायाह्रस्वंवाच्यम्॥आत्रीः॥इत्वोले॥गीः॥
एः॥मोनोधातोः॥प्रतान्॥प्रशान्॥गमः क्वौ॥अनुनासिकलोपः॥
नहित्विविहुयिधर्यः
अङ्गतः॥गमादीनामितिवक्तव्यम्॥परीततः॥संयतः॥ऊङ्॥ग
मादीनामितिवक्तव्यम्॥लोपश्च॥गूः॥भूः॥स्थः कवा॥वाक्वि
३।२।४।७७

ष्टिश्विदसिघासलंदेनिबः ४

अनुनासिकस्यक्विझलोक्ङिति ४

म·कौ·कृ·
१२

पृ॥ त्वांस्थः॥ त्वांस्थाः॥ सुप्यजातौ णिनिस्ताच्छील्ये॥ ३।२।७८ अजात्यर्थे धातोः
र्णिनिस्ताच्छील्ये द्योत्ये॥ उष्णभोजी॥ शीतभोजी॥ मनः॥ सुपि
मन्यतेर्णिनिः॥ दर्शनीयमानी॥ आत्ममाने खश्च॥ ३।२।८३ स्वकर्मके
मनने वर्तमानान्मन्यतेः सुपि खश्स्याण्णिनिश्च॥ पण्डितमात्मानं
मन्यते पण्डितंमन्यः॥ पण्डितमानी॥ इच एकाचोम्प्रत्ययवच्च॥ ६।३।६८
इजंतादेकाचोम्स्यात्स च स्वाद्यन्तवत् खिदन्ते परे॥ ओतोम्शसोः॥ गां
मन्यः॥ वाम्शसोः॥ स्त्रियंमन्यः॥ नरंमन्यः॥ भुवंमन्यः॥ श्रि

उः
१२

यमात्मानंमन्यतेक्षिमन्यंकुलं॥भाष्यकारप्रयोगात्ङीन्नादस्यह्र
स्वः॥सुमनसोरभावश्च॥ ३।२।५।४ भूते॥अधिकारोयम्॥वर्त्तमानेलडिति
यावत्॥ ३।२।५।५ करणेयजः॥करणेउपपदेभूतार्थाद्यजेर्णिनि॥कर्त्तरि॥
सोमेनेष्टवान्सोमयाजी॥ ३।२।५।६ कर्मणिहनः॥पितृव्यघाती॥ब्रह्मभ्रूणवृ
त्रेषु ३।२।५।७ क्विप्॥ब्रह्महा॥भ्रूणहा॥वृत्रहा॥क्विप्चेत्येवसिद्धेब्रह्मादि
ष्वेवक्विबेवेतिद्विविधनियमार्थमिदम्॥एवमग्रेपि॥सुकर्मपाप
मंत्रपुण्येषु ३।२।५।८ कृञः॥सुकृत्॥कर्मकृत्॥पापकृत्॥मंत्रकृत्॥पुण्य

ह्रस्वस्यपितिकृतितुक्

हुता॥ ३।२।९० सोमे सुञः॥ सोमसुत्॥ ३।२।९१ अग्नौ चेः॥ अग्निचित्॥ कर्मण्यग्न्याख्यायाम्॥ ३।२।९२ कर्मण्युपपदे कर्मण्येव कारके चिनोतेः क्विप्॥ अग्न्याधारस्थलविशेषस्याख्यायाम्॥ श्येन इव चितः श्येनचित्॥ कर्मणीनिविक्रियः॥ ३।२।९३ कर्मण्युपपदे विपूर्वात्क्रीणातेरिनिः कुत्सितग्रहणं कर्तव्यम्॥ सोमविक्रयी॥ घृतविक्रयी॥ दृशेः ३।२।९४ क्वनिप्॥ कर्मणि भूते॥ पारं दृष्टवान्॥ पारदृश्वा॥ राजनि युधिकृञः॥ ३।२।९५ क्वनिप्॥ युधिरन्तर्भावितण्यर्थः॥ राजानं योधितवान्॥ राजयुध्वा॥ राजकृत्वा॥ गुरुः

॥३।२।५।९६ सहेच॥सहयुध्वा॥सहकृत्वा॥३।२।५।९७ सप्तम्यांजनेर्डः॥तत्पुरुषेकृतिबहुलम्
॥ङेरलुक्॥सरसिजम्॥सरोजम्॥उपसर्गेचसंज्ञायाम्॥३।२।५।९९ प्रजा॥अनौकर्म
णि॥३।२।५।१०० अनुपूर्वाज्जनेःकर्मण्युपपदेडः॥पुमांसमनु[illegible]रुध्यजातापुमनु
जा॥अन्येष्वपिदृश्यते॥३।२।६।१०१ अजः॥द्विजः॥ब्राह्मणजः॥अपिशब्दःसर्वोपाधि
व्यभिचारार्थः॥तेनधात्वन्तरादपिकारकान्तरेष्वपिक्वचित्॥परितःखाताप
रिखा॥पंचम्यामजातौ॥३।२।५।९८ जातिशब्दवर्जितेपंचम्यन्तेजनेर्डः॥संस्कारजः॥
अदृष्टजः॥क्तक्तवतूनिष्ठा॥एतौनिष्ठासंज्ञौस्तः॥निष्ठा॥भूतार्थवृ

म॰कौ॰कृ॰
१५

नैर्धातो निष्ठास्यात्॥ तत्र तयोरेवेति भावकर्मणोक्तः॥ कर्त्तरि कृदिति क
र्त्तरि क्तवतुः॥ स्नातं मया॥ स्तुतस्त्वया विष्णुः विश्वं कृतवान्॥ अदोजग
धिर्ल्यप्ति किति॥ ल्यपि तादौ किति च॥ इकार उच्चारणार्थः॥ जग्धम्॥
निष्ठायामण्यदर्थे॥ ण्यदर्थो भावकर्मणी ततोन्यत्र निष्ठायां क्षियो
दीर्घः स्यात्॥ क्षियो दीर्घात्॥ निष्ठातस्य नः॥ क्षीणवान्॥ भावकर्म
णोस्तु॥ क्षितः कामो मया॥ उर्णोतेर्णुवद्भावो वाच्यः॥ तेनएकाच्त्वा
न्नेट्॥ उर्णुतः॥ रदाभ्यां निष्ठातो नः पूर्वस्य च दः॥ रदाभ्याम्परस्य नि

गुरुः
१५

ष्ठातस्य नो निष्ठापेक्षया पूर्वस्य धातोर्दस्य च॥ शॄ॥ शीर्णः॥ भिन्नः॥ छिन्नः
॥ संयोगादेरातो धातोर्यण्वतः॥ यण्वत्संयोगादेरादंतान्निष्ठातस्य नः॥
द्राणः॥ ग्लानः॥ ल्वादिभ्यः॥ एकविंशतेर्लूञादिभ्यः प्राग्वत्॥ लू
नः॥ ज्या॥ ग्रहिज्या॥ हल्नः॥ अंगावयवाद्धलः परं यत्संप्रसारणं तदं
तस्यांगस्य दीर्घः॥ जीनः॥ दुग्वोर्दीर्घश्च॥ दु गतौ॥ दूनः॥ गूनः॥ पुञो
विनाशे॥ पूना यवा॥ विनष्टा इत्यर्थः॥ पूतमन्यत्॥ सिनोतेर्ग्रासकर्म
कर्तृकस्य॥ सिनो ग्रासः॥ ग्रासेति किम्॥ सिता पाशेन सूकरी॥ कर्मक

म.कौ.
[illegible]
१६

न्नेकेतिकिम्॥सितोग्रासोदेवदत्तेन॥ओदितश्च॥प्राग्वत्॥भुजोभुग्नः
॥टुओश्वि॥शूनः॥द्रवमूर्तिस्पर्शयोःश्यः॥द्रवस्यमूर्त्तौकाठिन्ये
स्पर्शेचार्थेश्यैङःसंप्रसारणंस्यान्निष्ठायां॥श्योऽस्पर्शे॥श्यैङोनिष्ठा
तस्यनोऽस्पर्शेऽर्थे॥हलइतिदीर्घः॥शीतंघृतं॥अस्पर्शेकिम्॥शी
तंजलं॥द्रवमूर्तिस्पर्शयोःकिम्॥संश्यानोवृश्चिकः॥शीतात्संकु
त चिइत्यर्थः॥प्रतेश्च॥प्रतिपूर्वस्यश्यःसंप्रसारणंनिष्ठायां॥प्रतिशी
नः॥विभाषाभ्यवपूर्वस्य॥श्यःसंप्रसारणंवास्यात्॥अभिश्यानंघृ

गुरुः
१६

तं ॥ अभिशीनं ॥ अवश्यानोऽवशीनो वृश्चिकः ॥ व्यवस्थितविभाषेयम् ॥
तेनेह नः ॥ समवश्यानः ॥ अञ्चोऽनपादाने ॥ निष्ठातस्य नः ॥ यस्य विभा-
षा ॥ यस्य क्वचिद्वेड्विहितस्ततो निष्ठाया इण्न ॥ उदितो वेति क्त्वायां वेट्त्वादिह नेट्
॥ समक्नः ॥ अनपादाने किम् ॥ उदक्तमुदकं कूपात् ॥ दिवोऽविजिगीषायाम् ॥ द्यू-
नः ॥ विजिगीषायां तु द्यूतम् ॥ निर्वाणोऽवाते ॥ अवाते इति छेदः ॥ निष्पूर्वाद्वातेस्तस्य
नत्वं स्याद्वातश्चेन्न कर्ता ॥ निर्वाणोऽग्निर्मुनिर्वा ॥ वाते तु ॥ निर्वातो वातः ॥ शुषः कः ॥
निष्ठातस्य ॥ शुष्कः ॥ पचो वः ॥ पक्वः ॥ क्षायो मः ॥ क्षामः ॥ स्त्यः प्रपूर्वस्य ॥ प्रस्त्यः

म·कौ·कृ संप्रसारणम्निष्ठायाम्॥प्रस्त्योन्यतरस्याम्॥निष्ठातस्यमोवा॥प्रस्तीमः॥प्रस्तीतः॥
१७ प्राप्तिकमा॥स्त्यानः॥अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः॥एतेनिपात्यन्ते॥
क्तवत्वेकरेह्यास्यापीदंनिपातमिष्यते॥फुल्लवान्॥अनुपसर्गात्किम्॥आदितश्च
॥आकारेतोनिष्ठायाइण्न॥त्रिफ॥चरफलोरतउत्वारेकिति॥प्रफुल्तः॥प्रक्षी
वितः॥प्रकृशितः॥प्रोल्लाघितः॥उत्फुल्लसंफुल्लयोरुपसंख्यानं॥नुदविदोंद्
नेपालने· त्राघ्राह्रीभ्योन्यतरस्याम्॥निष्ठातस्यनः॥नुन्नः॥नुत्तः॥विन्नः॥वित्तः॥उन्दी
॥श्वीदितोनिष्ठायाम्॥श्वयतेरीदितश्चनिष्ठायाइण्न॥उन्नः॥उत्तः॥इत्यादि॥ गुरुः
१७

मूर्छाविस्तौ

ख्यातः

नध्याख्यापॄमूर्छिमदाम्॥ एभ्यो निष्ठातस्य नो न॥ ध्यातः॥ पूर्त्तः॥ राल्लोपः
छ्वोः क्वौऽझलादावनुनासिकादौ च प्रत्यये॥ मूर्त्तः॥ मत्तः॥ वित्तो भोगप्रत्यययो
:॥ विंदतेर्निष्ठांतस्य निपातोयम्॥ भोग्ये प्रतीते चार्थे॥ वित्तं धनम्॥ वित्तः पुरुषः
अनयोः किम्॥ विन्नः॥ भित्तं सकलं॥ भिन्नमन्यत्॥ ऋणमाधमर्ण्ये॥ ऋतम
न्यत्॥ स्फायः स्फी निष्ठायाम्॥ स्फीतः॥ इरिनष्ठायाम्॥ निरः कुषो निष्ठा
याइट् स्यात्॥ यस्य विभाषेति निषेधे प्राप्ते पुनर्विधिः॥ निष्कुषितः॥ वसति
क्षुधोरिट्॥ आभ्यां क्त्वानिष्ठयोर्नित्यमिट्॥ उषितः॥ क्षुधितः॥ अंचेः पूजायां

चानुक्रमंणोत्तरत्र=२

म.कौ.भ. ॥क्त्वानिष्ठयोरिट्॥अंचितः॥गतौतुअक्तः॥लुभोविमोहने॥क्त्वानिष्ठयोरिट्॥न
१८ तुगार्द्ध्ये॥लुभितः॥गार्द्ध्येतुलुब्धः॥क्लिशःक्त्वानिष्ठयोः॥इड्वा॥क्लिशितः॥क्लि
ष्टः॥पूङश्च॥क्त्वानिष्ठयोरिड्वा॥पूङःक्त्वाच॥निष्ठासेट्किन्नस्यात्॥पवि
तः॥पूतः॥क्वाग्रहणंउत्तरार्थं॥नोपधादित्यत्रहिक्त्वेवंध्यते॥निष्ठाशीङ् सू.४४
स्विदिमिदिक्ष्विदिधृषः॥सेट्किन्न॥शयितः॥आदिकर्मणिनिष्ठावक्त
व्या॥आदिकर्मणिक्तःकर्त्तरिच॥भावकर्मणोः॥विभाषाभावादिकर्म भा.४२
णोः॥आदितोनिष्ठायाञ्च॥प्रस्वेदितश्चैत्रः॥प्रस्विदितंतेन॥ञिष्विदेतिः गुरुः
आद्यक्षराणांइत्तिहया=२ १८

मुपश्लेषः॥तत्र न॥उरसिकृत्वापाणिंशेते॥मध्येपदेनिवचनेच॥एतेकृ
ञिगतिसंज्ञावास्युरनत्याधाने॥मध्येकृत्य॥मध्येकृत्वा॥पदेकृत्य॥पदेकृ
त्वा॥निवचनेकृत्य॥निवचनेकृत्वा॥वाचंनियम्येत्यर्थः॥नित्यंहस्तेपाणा
वुपयमने॥कृञि॥उपयमनंविवाहः॥स्वीकारमात्रमित्यन्ये॥हस्तेकृत्य·

प्राध्वंबंधने।प्राध्वमित्यव्ययं॥प्राध्वंकृत्यबंधनेनानुकूलंकृत्वेत्यर्थः॥प्रार्थनादिनानुकूलनकरणे॥प्राध्वंकृत्वा॥जीविकोपनिषदावौपम्ये॥जीविकामिवकृत्वाजीविकाकृत्य॥औपम्येकिं॥जीविकांकृत्वा॥प्रादिग्रहणमगत्यर्थम्॥सुपुरुषः॥प्रादयोगताद्यर्थेप्रथमया॥प्रगतआचार्यःप्राचार्यः॥अत्यादयःक्रांताद्यर्थेद्वितीयया॥अतिक्रांतोमालामितिविग्रहे॥एकविभक्तिचापूर्वनिपाते॥विग्रहेयन्नियतविभक्तिकंतदुपसर्जनंनतुतस्यपूर्वनिपातः॥गोस्त्रियोरुपसर्जनस्य॥उपसर्ज्जनंयोगोशब्दःस्त्रीप्रत्य

न· कुशांबेतनिष्टतानगरीकौशाम्बीः

म·कौ·स यांतंयतदंतस्यप्रातिपदिकस्यह्रस्वः॥अतिमालः॥अवादयक्रुष्टाद्यर्थेतृतीय
या॥अवक्रुष्टःकोकिलयावकोकिलः॥पर्यादयोग्लानाद्यर्थेचतुर्थ्या॥परि
ग्लानोध्ययनायपर्यध्ययनः॥निरादयःक्रान्ताद्यर्थेपंचम्या॥निष्क्रान्तःकौशां
ब्याःनिष्कौशांबिः॥तत्रोपपदंसप्तमीस्थं॥उपपदमतिङ्॥उपपदंसमर्थेन
नित्यंसमस्यतेअतिङंतश्चसमासः॥कुंभंकरोतीतिकुम्भकारः॥अतिङ्किं
॥माभवान्भूत्॥माङिलुङिसप्तमीनिर्देशान्माङुपपदं॥गतिकारकोपपदा हरिभ्यां
नांकृद्भिःसहसमासवचनंप्राक्सुबुत्पत्तेः॥व्याघ्री॥अश्वक्रीती॥कच्छपी ६४

त्यादि॥अमैवाव्ययेन॥अमैवतुल्यविधानंयत्तदुपपदंतदेवाव्ययेनसहसम
स्यते॥स्वादुंकारं॥स्वादुमिणमुल्इतिणमुल्नेह॥कालसमयवेलासुतमु
न्॥कालंसमयोवेलावाभोक्तुं॥अमैवेतिकिं॥अग्रेभोजं॥अग्रेभुक्त्वा॥विभा
षाग्रेप्रथमापूर्वेष्वितिक्त्वाणमुलौ॥अमैवाव्ययेनतुल्यविधानमेतत्॥तृ
तीयाप्रभृतीन्यन्यतरस्याम्॥उपदंशस्तृतीयायामित्यादीन्युपपदान्यमंते
नाव्ययेनसहवासमस्यन्ते॥मूलकेनोपदंशंभुंक्ते॥मूलकोपदंशं॥उपदं
शस्तृतीयायामितिणमुल्॥क्त्वाच॥तृतीयाप्रभृतीन्युपपदानिक्त्वांते

त॰ निर्गतमङ्गुलीभ्यो निरङ्गुलम् ४

म॰कौ॰स॰ नसमस्यते ॥ उच्चैः कृत्य । उच्चैः कृत्वा ॥ अव्ययेयथाभिप्रेताख्यानेकृञः
क्त्वाणमुलाविति क्त्वाणमुलौ ॥ तत्पुरुषस्यांगुलेः संख्याव्ययादेः ॥ संख्या
व्ययादेरंगुल्यंतस्य तत्पुरुषस्य समासांतोऽच्स्यात् ॥ द्वे अंगुली प्रमाणमस्य
द्व्यंगुलं ॥ अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः ॥ एभ्यो रात्रेरच्स्यात् ॥ चा
संख्या व्ययादेः ॥ अह्नग्रहणं द्वंद्वार्थम् ॥ रात्राह्नाहाः पुंसि ॥ एते पुंस्येव ॥ अह
श्च रात्रिश्चाहोरात्रः ॥ सर्वरात्रः ॥ पूर्वं रात्रेः पूर्वरात्रः ॥ संख्यातरात्रः ॥ पुः हरिः
रापरात्रः ॥ संख्यापूर्वं रात्रं क्लीबं ॥ द्विरात्रं ॥ अतिरात्रः ॥ राजाहःसखिभ्य १५

ष्टच् ॥ एतदंतात्तत्पुरुषाट्टच् ॥ परमराजः ॥ कृष्णसखः ॥ अह्नष्टखोरेव ॥ टिलोपः
उत्तमाहः ॥ अह्नोऽह्न एतेभ्यः ॥ सर्वादिभ्योऽहन्शब्दस्याह्नादेशः समासान्ते परे ॥
अह्नोदन्तात् ॥ अदन्तपूर्वपदस्थान्निमित्तात्परस्या ह्नोनस्य णः ॥ सर्वाह्णः
न संख्यादेः समाहारे ॥ अह्नोह्नादेशो न ॥ द्व्यहः ॥ त्र्यहः ॥ उत्तमैकाभ्यां च ॥
अह्नोह्नादेशो न ॥ उत्तमशब्दोंत्यर्थः ॥ पुण्यशब्दमाह ॥ पुण्यसुदिनाभ्यामह्नः क्लीबतेष्टा ॥ पुण्याहं ॥ सुदिनाहं ॥ एकाहः ॥ अग्राख्यायामुरसः ॥ टच्
॥ अश्वानामुर इव अश्वोरसं ॥ मुख्योऽश्व इत्यर्थः ॥ ग्रामकौटाभ्यां च तक्ष्णः ॥

त॰

कुद्यांभवःकौटःस्वतन्त्रः

स॰कौ॰स॰ ग्रामतक्षः॥कौटतक्षः॥अतेःशुनः॥अतिश्वोवराहः॥उपमानादप्राणिषु॥अप्रा
णिविषयोपमानवाचिनःश्वनष्टच्॥आकर्षःश्वेवआकर्षश्वः॥उत्तरमृग
पूर्वाच्चसक्थ्नः॥चादुपमानात्॥उत्तरसक्थम्॥मृगसक्थम्॥पूर्वसक्
थम्॥फलकमिवसक्थि॥फलकसक्थम्॥नावोद्विगोः॥द्विनावम्॥
अर्धाच्च॥अर्धनावम्॥खार्याःप्राचां॥द्विगोरर्धाच्चखार्याष्टज्वा॥द्विखारं॥द्वि
खारि॥अर्धखारं॥अर्धखारि॥द्वित्रिभ्यामंजलेः॥द्व्यंजलम्॥द्व्यंजलि॥ब्रह्म
णोजानपदाख्यायाम्॥ब्रह्मान्तात्तत्पुरुषाट्टच्॥सुराष्ट्रेब्रह्मासुराष्ट्रब्रह्मः हरेः ९६

समासेनजानपदत्वमाख्यायतेचेत्

कुमहद्भ्यामन्यतरस्याम्॥ कुब्रह्मः॥ कुब्रह्मा॥ महाब्रह्मः॥ महाब्रह्मा॥ प्रकारवचने जातीयर्॥ महाप्रकारो महाजातीयः॥ अष्टनः संख्यायामबहुव्रीह्यशीत्योः॥ आत्स्यात्॥ द्वादश॥ अष्टादश॥ अबहुव्रीह्यशीत्योः किम्॥ द्विशाः॥ द्व्यशीतिः॥ प्राक्शताद्वक्तव्यम्॥ नेह॥ द्विशतम्॥ त्रेस्त्रयः॥ त्रिशब्दस्य त्रयस्स्यात्पूर्वविषये। त्रयोदश॥ त्रयोविंशतिः॥ विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम्॥ द्व्यष्टनोस्त्रेश्च प्रागुक्तं वा चत्वारिंशदादौ परे॥ द्विचत्वारिंशत्॥ अष्टाचत्वारिंशत्॥ अष्टचत्वारिंशत्॥ त्रिचत्वारिंशत्॥ त्रयश्चत्वारिंशत्॥ ए

६।व

त

म·कौ·स वंपंचाशत्॥षष्ठिसप्ततिनवतिषु॥परवल्लिंगंद्वंदतत्पुरुषयों॥कुक्कुटमयू
र्याविमे॥मयूरीकुक्कुटाविमौ॥अर्द्धपिप्पली॥द्विगुप्राप्तापन्नालंपूर्वगति
समासेषुन॥पञ्चकपालंपुरोडाशः॥प्राप्तोजीविकांप्राप्तजीविकः॥आ
पन्नजीविकः॥अलंकुमार्य्यै॥अलंकुमारि॥अतएवज्ञापकात्समासः॥
निष्कौशांबिः॥पूर्ववदश्ववडवौ॥द्विवचनमतन्त्रम्॥अश्ववडवौ॥अश्ववडवा
न्॥अपथंनपुंसकम्॥तत्पुरुषइत्येव॥अन्यत्रतुअपथोदेशः॥कृतस हृष्वोः
मासान्तग्रहणान्नेह॥अपंथाः॥अकारांतोत्तरपदोद्विगुःस्त्रियामि १०

ष्टः॥पंचमूली॥आवन्तोवा॥पंचखट्वं॥पंचखट्वी॥पात्राद्यंतस्यन॥पंचपात्रं
॥त्रिभुवनं॥चतुर्युगम्॥छायावाहुल्ये॥छायांतस्तत्पुरुषोनपुंसकंस्यात्
पूर्वपदार्थवाहुल्ये॥इक्षूणांछायाइक्षुछायं॥सभाराजामनुष्यपूर्वा॥राज
पर्यायपूर्वोमनुष्यपूर्वश्चसभांतस्तत्पुरुषोनपुंसकंस्यात्॥इनसभं॥ईश्वर
सभं॥अमनुष्यशब्दोरूढ्यारक्षःपिशाचादीनाह॥रक्षःसभं॥पिशाच
सभं॥विभाषासेनासुराछायाशालानिशानां॥एतदन्तस्तत्पुरुषःक्लीं
वं वा॥ब्राह्मणसेनं॥ब्राह्मणसेनाइत्यादि॥अश्वालाचा॥संघातार्थाया

सभा तदंतस्तत्पुरुषः क्लीबं वा स्यात् ॥ स्त्रीसभं ॥ स्त्रीसभा ॥ स्त्रीसंघात इत्य
र्थः ॥ अशाला किं ॥ धर्मसभा ॥ धर्मशालेत्यर्थः ॥ अर्द्धर्चाः पुंसि च ॥ अर्द्धर्चा
दयः पुंसि क्लीबे च स्युः ॥ अर्द्धर्चं ॥ अर्द्धर्चः ॥ एवं ध्वजतीर्थशरीरमण्डप
यूषदेहांकुशा कलशासूत्रपात्रादयः ॥ सामान्ये नपुंसकम् ॥ मृदु प
चति ॥ प्रातः कमनीयम् ॥ ॥ इति तत्पुरुषः ॥ ॥ शेषो बहुव्रीहिः ॥
अधिकारोयम्प्राग्द्वंद्वात् ॥ अनेकमन्यपदार्थे ॥ अनेकं प्रथमान्तम
न्यपदस्यार्थे वर्त्तमानं वा समस्यते स बहुव्रीहिः ॥ सप्तमीविशेषणे^

विशेष्यन्तरा
सन्निधाने विशे
ष्यस्यासत्त्वे च.

हुरौगां

वहुव्रीहौ ॥ सप्तम्यन्तं विशेषणं च वहुव्रीहौ पूर्वं स्यात् ॥ हलदन्तात्सप्तम्याः संज्ञा
यां ॥ हलन्तादन्ताच्च सप्तम्या अलुक् ॥ कण्ठेकालः ॥ अत एव ज्ञापकाद्व्यधिक
रणपदो वहुव्रीहिः ॥ प्राप्तमुदकं यं प्राप्तोदको ग्रामः ॥ ऊढरथोनड्वान् ॥ उप
हृतपशूरुद्रः ॥ उद्धृतौदनास्थाली ॥ पीताम्बरो हरिः ॥ वीरपुरुषो ग्रामः ॥
प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः ॥ प्रपतितःपर्णः ॥ प्रपर्णः ॥
नञोस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः ॥ अविद्यमानःपुत्रोऽपुत्रः ॥ स्त्रि
याः पुंवद्भाषितपुंस्कादनूङ्समानाधिकरणे स्त्रियामपूरणीप्रियादिषु
॥ उक्तपुंस्कादनूङ्भावो यत्र तथाभूतस्य स्त्रीवाचकशब्दस्य पुंवाचकस्येव

म.कौ.स. रूपं स्यात्समानाधिकरणे स्त्रिलिङ्गे उत्तरपदे न तु पूरण्यां प्रियादौ च परतः॥ड
गोस्त्रियोरिति ह्रस्वः॥ चित्रगुः॥ रूपवद्भार्यः॥ अनूङः किम्॥ वामोरूभा
र्यः॥ पूरण्यां तु॥ अपूरणीप्रमाण्योः॥ पूरणार्थप्रत्ययान्तं यत्स्त्रीलिं
गं तदन्तात्प्रमाणांपताञ्च बहुव्रीहेरप्स्यात्॥ कल्याणीपंचमीयासां रात्री
णां ताः कल्याणीपंचमा रात्रयः॥ स्त्रीप्रमाणी यस्य स्त्रीप्रमाणः॥ पुंवद्भा
वनिषेधोऽप्रत्ययस्थप्रधानपूरणपामेवा॥ रात्रिः पूरणी वा व्याचे सुकोदा
हरणमुख्या॥ अन्यत्र॥ नघ्नतस्था॥ नद्युत्तरपदाद्दंतोत्तरपदाच्च बहुव्री हरौ
हेः कप्॥ पुंवद्भावः॥ केशाः॥ ह्रस्वः॥ इति प्राप्ते॥ नकपि॥ परेणान्तु ह्रस्वः १९॥

कल्याणपंचमीकःपक्षः॥अत्रतिरोहितावयवभेदस्यपक्षस्यान्यपदार्थ
तयारात्रेरप्रधानं॥वहुकर्त्तृकः॥अप्रियादिषुकिं॥कल्याणीप्रि
यः॥प्रियामनोज्ञाकल्याणीसुभगादुर्भगाभक्तिःसचिवास्वसाकां
ताक्षांताक्षमाचपलादुहितावामाअवलातनया॥सामान्येनपुंसक
म्॥दृढंभक्तिर्यस्यसदृढभक्तिः॥स्त्रीत्वविवक्षायांतुदृढाभक्तिः॥
तसिलादिष्वाकृत्वसुचः॥त्रतसौ॥तरप्तमपौ॥चरट्जातीयरौ॥
कल्पप्देशीयरौ॥रूपप्पाशपौ॥थाल्तिल्थ्यनौ॥स्युपरेस्त्रि

व॰

स॰ कौ॰ स॰ याःपुंवत्॥ वह्वीषु इति वह्वृच॥ वहृत इत्यादि॥ त्वतलोर्गुणवचनस्या॥ शु आवितहारसंधनो छक्द् इकादेश

क्लत्वं॥ शुक्लता॥ भस्याढे तद्धिते॥ हस्तिनीनां समूहो हास्तिकं॥ अ

स्त्रीस्योढक् ढेकिं॥ रौहिणेयः॥ कुक्कुट्यादीनामण्डादिषु॥ कुक्कुटाण्डं॥ मृग

पदं॥ मृगक्षीरं॥ काकशावः॥ क्यङ्मानिनोश्च॥ पुंवत्॥ एनीवाचर

रति एतायते॥ श्येनीवाचरति श्येतायते॥ दर्शनीयां मन्यते दर्शनी

क्यङ्मा॰ नोश्च यमानिनी॥ न कोपधायाः॥ स्त्रियाः पुंवत्॥ पाचिकाभार्यः॥ र हस्वोः

सिकाभार्यः॥ मद्रिकायते मद्रिकामानिनी॥ कोपध॥ प्रतिषेधे २०

अनुदात्तादेश्चोपन्त्

तद्धितवुग्रहणाम्॥नेह॥पाकभार्यः॥संज्ञापूरण्योश्च॥नपुंवत्॥दत्ताभार्यः॥
पंचमीभार्यः॥वृद्धिनिमित्तस्यचतद्धितस्यारक्तविकारे॥वृद्धिशब्देनाविहि तत्रभवेत्परा
नै तायावृद्धिस्तद्धेतुर्यस्तद्धितोऽरक्तविकारार्थस्तदंतास्त्रीनपुंवत्॥स्रौघ्नीभार्यः
तेनरक्तंरा॥ ॥रक्तेतुकाषायकन्थः॥विकारेतुमैमीमुद्रिकायस्यहैममुद्रिकः॥स्वांगाच्चे
तः॥स्वांगाद्यईकारस्तदन्तास्त्रीनपुंवत्॥सुकेसीभार्यः॥स्वाङ्गात्किं॥प
टुभार्यः॥इतःकिम्॥अकेशाभार्यः॥अमानिनीतिवक्तव्यम्॥सुकेशामा
निनी॥जातेश्च॥जातेःपरोयःस्त्रिप्रत्ययास्तदंतस्यनपुंवत्॥शूद्राभा
र्यः॥संख्ययाव्ययासन्नादूराधिकसंख्याःसंख्येये॥संख्येयार्थयासं

म.कौ.स. ख्येयाऽव्ययाद्यः समस्यंते स च बहुव्रीहिः ॥ बहुव्रीहौ संख्येये डजबहुगणात्
॥ संख्येये यो बहुव्रीहिस्तस्माड्डच् समासान्तः ॥ दशानां समीपे ये संति ते उपदशाः ॥
नवैकादश वेत्यर्थः ॥ अबहुगणात्किं ॥ उपबहवः ॥ उपगणाः ॥ ति विंशतेर्डि
ति ॥ विंशतेर्भस्य तेर्लोपो डिति ॥ आसन्नविंशाः ॥ अदूरत्रिंशाः ॥ अधिकच
त्वारिंशाः ॥ द्वौ वा त्रयो वा द्वित्राः ॥ दिङ्नामान्यन्तराले ॥ दिशो नामान्यन्तराले
वाच्ये प्राग्वत् ॥ दक्षिणस्याः पूर्वस्याश्च दिशोन्तरालं दक्षिणपूर्वा ॥ तत्र तेनेद
मिति सरूपे ॥ सप्तम्यंते ग्रहणविषये सरूपे पदे तृतीयान्ते च प्रहरणविषये हरिख

ये इदं युद्धं प्रवृत्तमित्यर्थे समस्यते कर्मव्यतिहारे सच बहुव्रीहिः ॥ इति शब्दादय
स्त्विषये विशेषो लभ्यते ॥ अन्येषामपि दृश्यते ॥ दीर्घः ॥ केशेषु केशेषु गृ
हीत्वा इदं युद्धं प्रवृत्तं केशाकेशि ॥ इच् कर्मव्यतिहारे ॥ दण्डैश्च दण्डैश्च प्रहृ
त्येदं युद्धं प्रवृत्तं दण्डादण्डि ॥ मुष्टीमुष्टि ॥ तेन सहेति तुल्ययोगे ॥ तुल्ययो न २
गे वर्त्तमानं सहेत्येतत् तृतीयान्तेन प्राग्वत् ॥ वोपसर्जनस्य ॥ बहुव्रीहेरवय
वस्य सहस्य सः स्याद्वा ॥ पुत्रेण सह सपुत्रः ॥ सहपुत्रो वागतः ॥ प्रकृत्याशि
षि ॥ सह सहः ॥ स्वस्ति राज्ञे सहपुत्राय सहामात्याय ॥ अगोहले

वंस ४१

म॰कौ॰स॰ ष्वितिवक्तव्यम्॥ सगवे॥ सवत्साय॥ सहलाय॥ बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्
षच्॥ स्वाङ्गवाचि सक्थ्यक्ष्यन्ताद्बहुव्रीहेः षच्॥ दीर्घसक्थः॥ जलजाक्षी
॥ स्वाङ्गात्किं॥ दीर्घसक्थि शकटं॥ स्थूलाक्षा वेणुयष्टिः॥ अक्ष्णोऽदर्शना
दिति वक्ष्यमाणोऽच्॥ द्वित्रिभ्यां षमूर्द्ध्नः॥ द्विमूर्द्धः॥ त्रिमूर्द्धः॥ अन्तर्वहि
र्भ्यां च लोम्नः॥ अप्स्यात्॥ अन्तर्लोमः॥ पादस्य लोपोऽहस्त्यादिभ्यः॥
हस्त्यादिवर्जितादुपमानात्परस्य पादस्य लोपः॥ व्याघ्रस्येव पादावस्य
व्याघ्रपात्॥ अहस्त्यादिभ्यः किं॥ हस्तिपादः॥ कुसूलपादः॥ सं हेरम॰

त्रिद्वौ रादिभ्य श्च॰

इन्दः

ख्यासुपूर्वस्य॥पादन्ताद्स्यलोपः॥द्विपात्॥सुपात्॥उद्विभ्यांकाकुदस्य॥लो
पः॥उत्काकुत्॥विकाकुत्॥पूर्णाद्विभाषा॥पूर्णकाकुत्॥पूर्णकाकुदः॥
सुहृद्दुर्हृदौमित्रामित्रयोः॥सुहृन्मित्रं॥दुर्हृदमित्रः॥नेतुर्नक्षत्रेअप्वक्त
व्यः॥मृगोनेतायासांरात्रीणांताःमृगनेत्राःरात्रयः॥अञ्नासिकायाःसं
ज्ञायांनसंचास्थूलात्॥नासिकांताद्बहुव्रीहेरच्नासिकाशब्दश्चनसंप्रा
प्नोति॥पूर्वपदात्संज्ञायामगः॥पूर्वपदस्थान्निमित्तात्परस्यनस्यणः॥द्रु
रिवनासिकाऽस्यद्रुणसः॥खुरखराभ्यांवानस्॥खुरणाः॥खरणाः॥प
क्षेऽच्युजपीष्यते॥खुरणसः॥खरणसः॥उपसर्गाच्च॥उन्नसः॥वेर्ग्रोवक्तव्यः

व.

म.कौ.स.॥विगता नासिकाऽस्य विग्रः॥ख्यश्च॥विख्यः॥नञ्दुःसुभ्यो हलिसक्थ्योरन्य
तरस्याम्॥अच्॥अहलः॥अहलिः॥असक्थः॥असक्थिः॥एवं दुःसुभ्यां॥
शक्त्योरिति पाठान्तरम्॥अशक्तः॥अशक्तिः॥नित्यमसिच् प्रजामेधयोः॥
नञ्दुःसुभ्य एव॥अप्रजाः॥अमेधाः॥दुर्मेधाः॥सुमेधाः॥धर्मादनिच् केव
लात्॥केवलात् पूर्वपदात्परो यो धर्मशब्दस्तदन्ताद्बहुव्रीहेरनिच्॥कल्याणधर्मा॥
केवलात्किं॥परमस्व धर्मो यस्येति त्रिपदे बहुव्रीहौ मा भूत्॥इच् कर्मव्यतिहा
रे॥केशाकेशि मुशलामुशलि॥प्रसंभ्यां जानुनोर्ज्ञुः॥प्रज्ञुः॥संज्ञुः॥उर्ध्वाद्वि हेहरे.
भाषा॥उर्ध्वज्ञुः॥उर्ध्वजानुः॥धनुषश्च॥धनुरन्तस्य बहुव्रीहेरनङादेशः॥शा

ईधन्वा ॥ वा संज्ञायां ॥ शतधन्वा ॥ शतधनुः ॥ जायाया निङ् ॥ जायांतस्य बहुव्रीहेर्नि
ङादेशः ॥ लोपो व्योर्वलि ॥ युवतिर्जायाऽस्य युवजानिः ॥ गंधस्येदुत्पूतिसुसुर
भिभ्यः ॥ उद्गन्धिः ॥ पूतिगंधिः ॥ उपमानाच्च ॥ पद्मस्येव गन्धोऽस्य पद्मगंधिः ॥
वयसि दन्तस्य दतृ ॥ संख्यासुपूर्वस्येत्येव ॥ द्विदन् ॥ चतुर्दन् ॥ सुदन् ॥ अग्रांत
शुद्धशुभ्रवृषवराहेभ्यश्च ॥ एभ्यो दन्तस्य दतृ वा ॥ कुड्मलाग्रदन्तः ॥ कुड्मलाग्र
दन् ॥ उरःप्रभृतिभ्यः कप् ॥ व्यूढोरस्कः ॥ प्रियसर्पिष्कः ॥ अर्थान्नञः ॥ अनर्थकं
नञः किं ॥ अपार्थकं ॥ अपार्थम् ॥ इनः स्त्रियां ॥ इन्नन्ताद्बहुव्रीहेः कप् ॥ बहुद
ण्डिका नगरी ॥ अनिनस्मंग्रहणान्यर्थवता चानर्थकेन च तदंतविधिं प्रयोज

वाग्वोग्मिनिः॥ १

व·

म·कौ·स· यन्ति॥वहुवाग्मिका॥शेषाद्विभाषा॥अनुक्तसमासान्ताद्वहुव्रीहेःकप्॥महायशाः
महायशस्कः॥अनुक्तेत्यादि किं॥व्याघ्रपात्॥आपोन्यतरस्याम्॥कपि ह्रस्वः॥व
हुमालकः॥वहुमालाकः॥नसंज्ञायाम्॥शेषादिति प्राप्तःकप्न॥विश्वेदेवाऽस्य
विश्वदेवः॥ईयसश्च॥ईयसंतोत्तरपदान्नकप्॥वहवःश्रेयांसो यस्य वहुश्रेयान्
॥गोस्त्रियोरिति ह्रस्वे प्राप्ते॥ईयसो वहुव्रीहेर्न॥वहुश्रेयसी॥वहुव्रीहेः किं॥अ
तिश्रेयसि॥वंदिते भ्रातुः॥पूजार्थभ्रात्रंतान्नकप्॥प्रशस्तो भ्राता अस्य प्रशस्त
भ्राता॥वंदितेः किं॥मूर्खभ्रातृकः॥सर्वनामसंख्ययोर्वहुव्रीहौ पूर्वनिपातः हेहरि·

॥ईयसश्च॥५।४।१५६॥

२४

सर्वश्वेतः॥ द्विशुक्लः॥ संख्यायाअल्पीयस्याः॥ द्वित्राः॥ द्वंद्वेज॥ द्वादशाः॥ वाप्रियस्य॥ गुडप्रियः॥ प्रियगुडः॥ गड्वादेःपरासप्तमी॥ गडुकण्ठः॥ क्वचिन्न॥ वहेगडुः॥ निष्ठा॥ निष्ठान्तंबहुव्रीहौपूर्वंस्यात्॥ कृतकृत्यः॥ जातिकालसुखादिभ्यःपरानिष्ठावाच्या॥ सारङ्गजग्धी॥ मासजाता॥ सुखजाता॥ वाहिताग्न्यादिषु॥ आहिताग्निः॥ अग्न्याहितः॥ आकृतिगणोयम्॥ ॥इतिबहुव्रीहिः॥

॥चार्थेद्वन्द्वः॥ अनेकंसुबन्तंचार्थेवर्त्तमानंवासमस्यतेसद्वन्द्वः॥ समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः॥ तत्रेश्वरंगुरुञ्चभजस्वेतिपरस्परंनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः॥ समुच्चयः॥ भिक्षामटगांचानयेतिअ

दु

नान्वयः

म·कौ·स न्यतरस्यानुषङ्गिकत्वेऽन्वाचयः॥अनयोरसामर्थ्यात्समासो न॥ धवखदिरौ
छिन्धीति मिलितानामन्वयः॥इतरेतरयोगः॥ संज्ञापरिभाषमिति समूहः
॥समाहारः॥राजदन्तादिषु परं॥ एषु पूर्वप्रयोगार्हं परं स्यात्॥ दन्तानां राजा रा
जदन्तः॥धर्मादिष्वनियमः॥अर्थधर्मौ धर्मार्थौ॥ दंपती जंपती जायाप
ती॥जायाया दंभावो जंभावश्च वा निपात्येते॥आकृतिगणोयं॥ द्वन्द्वे
घिः॥पूर्वं स्यात्॥ हरिहरौ॥अजाद्यदन्तं॥ ईशकृष्णौ॥अल्पाच्तरम्॥ हे हरयः
शिवकेशवौ॥ऋतुनक्षत्राणां समानाक्षराणामानुपूर्व्येण॥ हेमन्तशि २५
शिरवसन्ताः॥कृत्तिकारोहिण्यौ॥ समाक्षराणां किं॥ग्रीष्मवसन्तौ॥

लघ्वक्षरं पूर्वम् ॥ कुशकाशं ॥ अभ्यर्हितं च ॥ तापसपर्वतौ ॥ वर्णानामानुपूर्वेण ॥ ब्राह्मणक्षत्रियविट्शूद्राः ॥ भ्रातुर्ज्यायसः ॥ युधिष्ठिरार्जुनौ ॥ द्वन्द्वश्च प्राणितूर्यसेनाङ्गानां ॥ एषां द्वन्द्व एकवत् ॥ पाणिपादम् ॥ मार्दङ्गिकपाणविकं ॥ रथिकाश्वारोहं ॥ अध्ययनतोविप्रकृष्टाख्यानां ॥ अध्ययनेन प्रत्यासन्ना आख्या येषां तेषां द्वन्द्व एकवत् ॥ पदकक्रमकम् ॥ जातिरप्राणिनाम् ॥ प्राणिवर्जं जातिवाचिनां द्वन्द्व एकवत् ॥ धानाशष्कुलि ॥ प्राणिनां तु विट्शूद्राः ॥ विशिष्टलिङ्गो नदीदेशोऽग्रामाः ॥ ग्रामवर्जं नदीदेशवाचिनां

म.कौ.स. भिन्नलिङ्गानांद्वन्द्वएकवत्॥उध्यश्चईरावतीचउध्येरावति॥गङ्गाशोणम्॥कु
रवश्चकुरुक्षेत्रंचकुरुकुरुक्षेत्रं॥क्षुद्रजंतवः॥एषांद्वन्द्वएकवत्॥यूकालि
क्षम्॥आनकुलात्क्षुद्रजन्तवः॥येषांचविरोधःशाश्वतिकः॥प्राग्वत्॥अ
हिनकुलम्॥गोव्याघ्रम्॥काकोलूकमित्यादौपरत्वाद्विभाषावृक्षेतिप्रा
प्तंचकारेणबाध्यते॥शूद्राणामनिरवसितानां॥अबहिष्कृतानांशूद्रा
णांद्वन्द्वःप्राग्वत्॥तक्षायस्कारम्॥पात्राद्बहिष्कृतानांतुचण्डालमृतपाः
॥गवाश्वप्रभृतीनिच॥यथोच्चारितानिसाधूनि॥दासीदासमित्यादि।

विभाषावृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणां॥
वृक्षादीनां सप्तानां द्वन्द्वो ऽश्ववडवेत्यादि द्वन्द्वत्रयं प्राग्वत्॥ वृक्षादौ विशेषाणामेव ग्र
हणम्॥ प्लक्षन्यग्रोधं॥ प्लक्षन्यग्रोधाः॥ रुरुपृषतं॥ रुरुपृषताः॥ कुशकाशं
कुशकाशाः॥ व्रीहियवं॥ व्रीहियवाः॥ दधिघृतं॥ दधिघृते॥ गोमहिषं॥ गोम
हिषाः॥ शुकवकं॥ शुकवकाः॥ अश्ववडवं॥ अश्ववडवौ॥ पूर्वापरं॥ पूर्वाप
रे॥ अधरोत्तरं॥ अधरोत्तरे॥ फलसेनावनस्पतिमृगशकुनिक्षुद्रजंतुधान्य
तृणानां वहुप्रकृतिरेव द्वन्द्व एकवदिति वाच्यम्॥ वदराणि चामलका
नि च वदरामलकं॥ नेह॥ वदरामलके॥ रथिकाश्वारोहौ॥ इत्यादि॥ नदधि

अदन्तौ २ पितृपितामहौ

द्व:

म·कौ·स·

ऋतो विद्यायो निसंबन्धेभ्यः

अपतुरेतिनिपात नातउत्प्रत्ययः

पयआदीनि॥ एकवत्सुः॥ दधिपयसी॥ इध्माबर्हिषी॥ निपातनाद्दीर्घः॥ ऋक्सा
मे॥ वाङ्मनसे॥ आनङ् ऋतो द्वंद्वे॥ विद्यायोनिसंबन्धवाचिनां ऋदन्तानां द्वन्द्वे
आनङ् स्यादुत्तरपदे॥ होतापोतारौ॥ मातापितरौ॥ पुत्रेत्यनुवृत्तेः पितापुत्रौ
॥ देवताद्वन्द्वे च॥ इहोत्तरपदे पूर्वस्याऽनङ्॥ मित्रावरुणौ॥ वायोः प्रयोगे
प्रतिषेधः॥ अग्निवायू॥ वाय्वग्नी॥ ईदग्नेःसोमवरुणयोः॥ देवताद्वन्द्व
इत्येव॥ अग्नेःस्तुत्स्तोमसोमाः॥ अग्नेः परेषामेषां सस्य षः समासे॥ अग्निष्टु
त्॥ अग्निष्टोमः॥ अग्नीषोमौ॥ अग्नीवरुणौ॥ इद्वृद्धौ॥ वृद्धिमत्युत्तरप

द्

सीता·
रामः
२०

समुदायः१

देवते देग्नेरिद्वाद्वेशोदेवताद्वन्द्वे॥अग्नामरुतौदेवतेऽस्यआग्निमारुतंकर्मः॥
अग्नीवरुणौँऽस्यआग्निवारुणं॥देवताद्वन्द्वेचेत्युभयपदवृद्धिः॥विष्णो
न॥आग्नावैष्णवम्॥दिवोद्यावा॥देवताद्वन्द्वेउत्तरपदे॥द्यावाभूमी॥
मातरपितरावुदीचां॥उदीचांकिं॥मातापितरौ॥द्वन्द्वाच्चुदषहांतात्समा
हारे॥चवर्गान्ताद्दषहांताद्वन्द्वाट्टच्समाहारे॥वाक्त्वचं॥वाक्स्रजं॥ सं
शमीदृषदम्॥वाक्त्विषं॥छत्रोपानहम्॥समाहारेकिं॥प्रावृट्श
रदौ॥ ॥इतिद्वन्द्वः॥ ॥अथैकशेषः॥विरूपाणामपिसमानार्था

ए.शे.

म.कौ.स. नाम्॥ वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ कुटिलदण्डौ॥ वृद्धो यूना तल्लक्ष-
णश्चेदेव विशेषः॥ यूना सहोक्तौ गोत्रं शिष्यते गोत्रयुवप्रत्ययमात्रकृतं चे-
त्तयोः कृत्स्नं वैरूप्यं स्यात्॥ गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ॥ वृद्धः किं॥ ग-
र्गगार्ग्यायणौ॥ यूना किं॥ गर्गगार्ग्यौ॥ लक्षणं किं॥ गार्ग्यवात्स्यायनौ॥
स्त्री पुंवच्च॥ यूना सहोक्तौ वृद्धा स्त्री शिष्यते तदर्थश्च पुंवत्॥ गार्गी च गा-
र्ग्यायणश्च गार्ग्यौ॥ पुमान् स्त्रिया॥ सहोक्तौ शिष्यते तल्लक्षण एव वि-
शेषश्चेत्॥ हंसी च हंसश्च हंसौ॥ भ्रातृपुत्रौ स्वसृदुहितृभ्याम्॥ भ्राता शिवः

२८

च स्वसा च भ्रातरौ। पुत्रश्च दुहिता च पुत्रौ॥ नपुंसकमनपुंसकेनैकवच्चास्या
न्यतरस्याम्॥ अक्लीवेन सहोक्तौ क्लीवं शिष्यते तच्च वा एकवत्स्यात्तल्लक्ष
णएव विशेषश्चेत्। शुक्लः पटः॥ शुक्ला पटी॥ शुक्लं वस्त्रं॥ तदिदं
शुक्लं॥ तानीमानि शुक्लानि॥ पिता मात्रा॥ मात्रा सहोक्तौ पिता वा
शिष्यते। माता च पिता च पितरौ॥ मातापितरौ। श्वसुरः स्वश्र्वा॥ सहो
क्तौ वा शिष्यते। श्वसुरौ॥ स्वश्रूस्वसुरौ। त्यदादीनि सर्वैर्नित्यम्॥ स
र्वैः सहोक्तौ यत्परं तच्छिष्यते॥ स च यश्च यौ। पूर्वशेषोपि दृश्यते इति

त्यदादीनि शिष्यन्ते• स च देवदत्तश्च तौ॥ त्यदादीनां मिथः सहोक्तौ ×१

स.मू.

म.कौ.स. भाष्यं॥ स च यश्च तौ॥ त्यदादितः शेषे पुंनपुंसकतो लिङ्गवचनानि॥ सा च
देवदत्तश्च तौ॥ तच्च देवदत्ता च यज्ञदत्ता च तानि॥ पुंनपुंसकयोस्तु परं न
पुंसकं शिष्यते॥ तच्च देवदत्तश्च ते॥ अहंद्वद्वतत्पुरुषया रगामिति वाच्यम्
॥ कुक्कुटमयूर्याविमे॥ मयूरीकुक्कुटाविमौ॥ तच्च सा च अर्द्धपिप्पल्यौ
ते॥ ग्राम्यपशुसंघेष्वतरुणेषु स्त्री॥ एषु सहविवक्षायां स्त्री शिष्यते
॥ गाव इमाः॥ ग्राम्येति किं॥ रुरव इमे॥ पशुग्रहणं किं॥ ब्राह्मणा गिरिजा
इमे॥ संघेषु किं॥ एतौ गावौ॥ अतरुणेषु किं॥ वत्सा इमे॥ अनेकस(

२९

फेष्वितिवाच्यम्॥अभ्याङ्मे॥ ॥द्वन्द्वेकेशेषः॥ ॥ऋक्पूरब्धूःपथामानक्षे॥
ऋगाद्यन्तस्यसमासस्याप्रत्ययोंतावयवोऽक्षेया धूस्तदन्तस्यन॥अर्द्धर्चः॥
अनृचबह्वृचावध्येतर्येव॥नेह अनृक्साम॥बह्वृक्सूक्तं॥विष्णुपुरं॥विमला
पंसरः॥द्व्यन्तरुपसर्गेभ्योपईत्॥द्वीपं॥अंतरीपं॥प्रतीपं॥समीपं॥अवर्णा
न्ताद्वा॥प्रेपं॥परापं॥ऊदनोर्देशे॥अनूपोदेशः॥राजधुरा॥अक्षेतु॥अक्षधूः॥
दृढधूरक्षः॥सखिपथः॥रम्यपथोदेशः॥अच्प्रत्यन्ववपूर्वात्सामलोम्नः॥
प्रतिसामं॥अनुसामं॥अवसामं॥प्रतिलोमं॥अनुलोमम्॥अवलोमं॥
कृष्णोदक्पाण्डुसंख्यापूर्वायाभूमेरजिष्यते॥कृष्णभूमः॥उदग्भूमः॥पा

म.

म·कौ·स· राद्भूमः॥ द्विभूमः॥ त्रिभूमः॥ प्रासादः॥ संख्याया नदीगोदावरीभ्यां च॥ पंचनदं
॥ सप्तगोदावरम्॥ अजितियोगविभागादन्यत्रापि॥ पद्मनाभः॥ अक्ष्णोऽद
र्शनात्॥ अचक्षुः पर्यायादक्ष्णः स्यात्॥ गवामक्षीव गवाक्षः॥ अचतु
रविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्व
ष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुष
द्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः॥ अज
न्ताः पंचविंशतिर्निपात्यन्ते॥ सुपाभ्यां चतुरो ज्यिख्यते॥ त्रिचतुराः॥ चतु कमले·
र्णां समीपे उपचतुराः॥ ब्रह्महस्तिभ्यां वर्चसः॥ अच्॥ ब्रह्मवर्चसं॥ ह ३०

स्तिवर्चसं ॥ पल्यराजभ्यांच ॥ पल्यवर्चसं ॥ अवसमंधेभ्यस्तमसः ॥ अवतम
सं ॥ संतमसं ॥ अन्धतमसं ॥ अन्ववतप्ताद्रहसः ॥ अनुरहसं ॥ अवरहसं ॥ त
प्तरहसं ॥ प्रतेरुरसः सप्तमीस्थात् ॥ उरसिप्रति प्रत्युर सं ॥ अनुगवमाया
मे ॥ एतन्निपात्यते दीर्घत्वे ॥ अनुगवं यानम् ॥ यस्यचायामइतिसमासः ॥
उपसर्गादध्वनः ॥ प्रगतोध्वानं प्राध्वोरथः ॥ नपूजनात् ॥ पूजनार्थात्परेभ्यः
समासान्ताः नस्युः ॥ सुराजा ॥ अतिराजा ॥ स्वतिभ्यामेव ॥ नेह ॥ परमराजः
॥ किमःक्षेपे ॥ क्षेपेयः किंशब्दस्ततः परंयत्तदन्तात्समासान्तानस्युः ॥
कुत्सितोराजा किंराजा ॥ किंसखा ॥ किंगोः ॥ नञस्तत्पुरुषात् ॥ अरा

म॰कौ॰स जा॥तत्पुरुषात्किं॥अधुरंशकटं॥पथोविभाषा॥अपथं॥२प्रपंथाः॥त
त्पुरुषादित्येव॥अपथोदेशः॥ ॥इतिसमासान्ताः॥ ॥अलुगुत्तरप
दे॥इत्यधिकृत्य॥ओजःसहोम्भस्तमसस्तृतीयायाः॥२ओजसाकृतमि
त्यादिः॥अञ्जसउपसंख्यानम्॥२अञ्जसाकृतम्॥आत्मनश्च॥तृतीया
या२अलुक्॥पूरणइतिवक्तव्यम्॥पूरणप्रत्ययान्तेउत्तरपदेइत्यर्थः॥आ
ना३ त्मँपंचमः॥वैयाकरणाख्यायांचतुर्थ्याः॥आत्मनइत्येवः॥आत्मनेप
दं॥आत्मनेभाषा॥परस्यच॥परस्मैपदं॥परस्मैभाषाः॥हलदन्तोत्तिङेर
लुक्॥त्वचिसारः॥गवियुधिभ्यांस्थिरः॥सस्यषः॥गविष्ठिरः॥युधिष्ठि

रः॥ अररोपतिलकः॥ संज्ञायामितिसमासः॥ हृद्द्युभ्यांच॥ हृदिस्पृक्॥ दि
विस्पृक्॥ मध्याद्गुरौ॥ मध्येगुरुः॥ अन्ताच्च॥ अन्तेगुरुः॥ अमूर्द्धमस्तका
त्स्वाङ्गादकामे॥ कण्ठेकालः॥ उरसिलोमा॥ अमूर्द्धमस्तकात्किं॥ मू
र्द्धशिखः॥ मस्तकशिखः॥ अकामेकिं॥ मुखकामः॥ तत्पुरुषेकृतिब
हुलं॥ स्तंबेरमः॥ कर्णेजपः॥ शयवासवासिष्वकालात्॥ वालुक्
खेशयः॥ खशयः॥ ग्रामेवासः॥ ग्रामवासः॥ ग्रामेवासी॥ ग्रामवासी॥
षष्ठ्याआक्रोशे॥ चोरस्यकुलम्॥ आक्रोशेकिं॥ ब्राह्मणकुलम्॥ वाग्दि
क्पश्यद्भ्योयुक्तिदण्डहरेषु॥ वाचोयुक्तिः॥ दिशोदण्डः॥ पश्यतोहरः॥

अ०नु

म०कौ०स

आमुख्यायणामुख्यपुत्रिकामुख्यकुलिकेति च ॥ देवानांप्रियइति च
मूर्खे ॥ अन्यत्रदेवप्रियः ॥ शेफपुच्छलाङ्गूलेषुशुनः ॥ शुनःशेफः ॥ शुनः
पुच्छः ॥ शुनोलाङ्गूलः ॥ दिवश्चदासे ॥ दिवोदासः ॥ ऋतोविद्यायोनिसंबंधे
भ्यः ॥ होतुरंतेवासी ॥ विभाषास्वसृपत्योः ॥ ऋदन्तात्षष्ठ्याः ॥ मातुःपि
तुर्भ्यामन्यतरस्याम् ॥ स्वसुःसस्यषःसमासे ॥ मातुःष्वसा ॥ मातुःस्वसा
॥ पितुःष्वसा ॥ पितुःस्वसा ॥ लुक्पक्षेतु ॥ मातृपितृभ्यांस्वसा ॥ स्वसुः
सस्यषःसमासे ॥ मातृष्वसा ॥ असमासेतुमातुःस्वसा ॥ पितुःस्व सारदे
सा ॥ ॥ इत्यलुक्समासः ॥ ॥ घरूपकल्पचेलड्ब्रुवगोत्रम ३२

पितृष्वसा॥२

तहतेषु ङ्योनेकाचो ह्रस्वः ॥ भाषितपुंस्काद्यो ङीतदंतस्यानेकाचो ग स्य ह्रस्वः स्यात् घरूपकल्पप्रत्ययेपरेसु चेलडादिसु ॥ ब्राह्मणितरा ॥ ब्राह्मणितमाइत्यादि ॥ नद्याः शेषस्यान्यतरस्याम् ॥ अङ्यंतनद्या अनेकाचश्च घादिसु ह्रस्वोवा ॥ ब्रह्मबंधुतरा ॥ ब्रह्मबन्धूतरा ॥ स्त्रीतरा ॥ स्त्रितरा ॥ कृन्नद्या न ॥ लक्ष्मीतरा ॥ उगितश्च ॥ विदुषितरा ॥ ह्रस्वाभावपक्षे पुंवत् ॥ विद्वत्तरा ॥ पादस्य पदाज्यातिगोपहतेषु ॥ अदन्तादेशः ॥ पादाभ्यां अजतीति पदाजिः ॥ पदातिः ॥ अज्यतिभ्यां पादे चेतीण्प्रत्ययः ॥ पद्गः ॥ पदोपहतः ॥ पद्यत्यतदर्थे ॥ पादस्य पत् तदर्थे यति ॥ पादौ विध्यंतीति पद्याः शर्करा ॥ विध्यत्यधनुषेति यत् ॥ अतदर्थे किं ॥ पादार्थमुदकं पाद्यं ॥ पादार्घाभ्यां चेति यत् ॥ उदकस्योदः संज्ञायाम् ॥ उदमेघ ॥ उत्तरपदस्यचेति वक्तव्यम् ॥ क्षीरोदः ॥ पेषंवासवाहनधिषु च ॥ उदपेषं पिनष्टि ॥ उदवासः ॥ उदवाहः ॥ उदधिर्घटः ॥ एकहलादौ पूरयितव्ये

नः

तसिलादिष्वाकृत्वसुचः

न्यतरस्याम्॥उदकुंभः॥उदककुम्भः॥एकेति किं॥उदकस्थाली॥पूरयितव्ये किं
॥उदकपर्वतः॥मंथौदनसक्तुबिंदुवज्रभारहारवीवधगाहेषु च।उदमंथः॥उद
कमंथः॥इको ह्रस्वोऽङ्यो गालवस्य॥इगन्तस्याङ्यन्तस्य ह्रस्वो वा उत्तरपदे॥ग्राम
णीपुत्रः॥ग्रामणिपुत्रः॥इकः किं॥रमापतिः॥अङ्यः किं॥गौरीपतिः॥ख्यङः
संप्रसारणं पुत्रपत्योस्तत्पुरुषे॥ख्यङन्तस्य पूर्वपदस्य संप्रसारणं पुत्रपत्योः
परतः॥संप्रसारणस्य॥दीर्घः स्यादुत्तरपदे॥कौमुदगंध्यायाः पुत्रः कौमुद
गंधीपुत्रः॥कौमुदगंधीपतिः॥इष्टकेषीकामालानां चिततूलभारिषु॥इ अंबिके·
ष्टकादीनां तदन्तानां च चितादिषु ह्रस्वः स्यात्॥इष्टकचितं॥पक्वेष्टक

चितम्॥इषीकतूलम्॥मुञ्जेषीकतूलम्॥मालभारी॥उत्पलमालभारी॥
ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबंधुषु॥समा
नस्य सः स्यात्॥सज्योतिरित्यादि॥तीर्थे ये॥यादौ प्रत्यये विवक्षिते समानस्य सः
॥सतीर्थ्यः॥एकगुरुकः॥समानतीर्थेवासीति यत्प्रत्ययः॥विभाषोदरे॥
सोदर्यः॥समानोदर्यः॥दृग्दृशवतुषु॥सदृक्॥सदृशः॥दृशोंयेति वक्तव्यम् क्षे
॥सदृक्ष॥वतुरुत्तरार्थः॥इदंकिमोरीश्की॥दृग्दृशवतुषु॥ईदृक्॥ईदृशः॥
कीदृक्॥कीदृशः॥दृक्षे च॥ईदृक्षः॥कीदृक्षः॥अषष्ठ्यतृतीयास्थस्यान्यस्य
दुगाशीराशास्थास्थितोत्सुकोतिकारकरागछेषु॥दुगागमः स्यात्॥अन्यः

दाशीः॥अन्यदाशा॥अन्यदास्था॥अन्यदास्थितः॥अन्यदुत्सुकः॥अन्यदूतिः॥
म.कौ.त अन्यद्रागः॥अषष्ठीत्यादिकं॥अन्यस्यान्येन वाग्रीः॥अन्याग्रीः॥कारके छे
च नार्थं निषेधः॥अन्यस्य कारकोन्यत्कारकः॥अन्यस्यायमन्यदीयः॥अर्थे
विभाषा॥अन्यदर्थः॥अन्यार्थः॥कोः कत्तत्पुरुषेचि॥अजादौ उत्तरपदे॥कु
त्सितोश्वः॥कदश्वः॥कदन्नम्॥तत्पुरुषे किम्॥कूष्ट्रो राजा॥त्रौ च॥कत्त्र
यः॥रथवदयोश्च॥कद्रथः॥कद्वदः॥तृणे च जातौ॥कत्तृणं॥का पथ्यक्ष
योः॥कापथम्॥काक्षः॥ईषदर्थे॥काजलम्॥विभाषा पुरुषे॥कुपुरु काली.
षः॥कापुरुषः॥कवं चोष्णे॥वा का॥कोष्णं॥कवोष्णं॥कदुष्णं॥पृषोद

रादीनि यथोपदिष्टम् ॥ पृषोदरप्रकाराणि शिष्टैर्यथोच्चारितानि तथैव साधूनि ॥ पृ
षत उदरम् पृषोदरम् ॥ तलोपः ॥ वारिवाहको बलाहकः ॥ पूर्वपदस्य ब उत्त
रपदादेश्च लत्वम् ॥ भवेद्वर्णागमाद्धंसः ॥ सिंहो वर्णविपर्ययात् ॥ गूढोत्मा वर्ण
विकृतेर्वर्णनाशात्पृषोदरम् ॥ मतौ बह्वचोनजिरादीनाम् ॥ दीर्घः स्यात् ॥ अमरा
वती ॥ अनजिरादीनां किं ॥ अजिरवती ॥ बह्वचः किं ॥ व्रीहिमती ॥ संज्ञायामित्ये
व ॥ नेह ॥ वलयवती ॥ शरादीनां च ॥ शरावती ॥ उपसर्गस्य घञ्यमनुष्ये बहु
लम् ॥ परिपाकः ॥ परीपाकः ॥ अमनुष्ये किं ॥ निषादः ॥ नरे संज्ञायाम् ॥ विश्वा
नरः ॥ मित्रे चर्षौ ॥ विश्वामित्रः ॥ अनोदन्तदष्ठाकरणे कुत्स्वराहपुरुपरेसु दी

आहितात्किं॰ इन्द्रवाहनम्॰ इन्द्रस्वामिकवाहनमित्यर्थः१

धैवाच्यः॥ भादन्न इत्यादि॥ प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपियूक्षाभ्योऽसंज्ञा
म.कौ.त. यामपि॥ एभ्यो वनस्य णत्वम्॥ प्रवणम्॥ विभाषौषधिवनस्पतिभ्यः॥ दूर्वाव
णम्॥ दूर्वावनम्॥ शिरीषवणम्॥ शिरीषवनम्॥ द्व्यज्त्र्यच्भ्यामेव॥ नेह॥ दे
वदारुवनम्॥ इरिकादिभ्यो न॥ इरिकावनम्॥ मिरिकावनम्॥ वाहनमाहि
तात्॥ आरोप्य उह्यते तद्वाचिस्थान्निमित्तात् वाहनस्य णः स्यात्॥ इक्षुवाहण
पीयतेइति पानंकर्मणि ल्युट्॥ म्॥ पानं देशे॥ पूर्वपदस्थान्निमित्तात्पानस्य णः॥ क्षीरं पानं येषां ते क्षीरपाणाः
॥ उशीनराः॥ सुरापाणाः प्राच्याः॥ वा भावकरणयोः॥ क्षीरपाणं॥ क्षीरपानम्॥
प्रातिपदिकान्तनुम्विभक्तिषु च॥ पूर्वस्थान्निमित्तात्परस्य एषु स्थितस्य नस्य

उशीनरनामदेशवासिनः प्रसिद्धा औपचारिकः२।

म·कौ·स·

णोवा ॥ माषवापिणौ ॥ व्रीहिवापाणि ॥ माषवापेण ॥ पक्षेमाषवापिनावित्यादि ॥ एकाजुत्तरपदेणः ॥ नित्यमित्सूत्रम् ॥ वृत्रहणौ ॥ क्षीरपाणि ॥ विभक्तौक्षीरपेण ॥ कुमतिच ॥ कवर्गवत्युत्तरपदे प्राग्वत् ॥ हरिकामिणौ ॥ हरिकामाणि ॥ हरिकामेण ॥ पदव्यवायेपि ॥ णत्वन्न ॥ माषकुम्भवापेन ॥ अतद्धितइतिवाच्यम् ॥ आर्द्रगोमयेण ॥ शुष्कगोमयेण ॥ पारस्करप्रभृतीनिच संज्ञायाम् ॥ एतानिससुट्कानि निपात्यन्ते ॥ पारस्करः ॥ किष्किंधा ॥ तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च ॥ तत्पूर्वेचलेनदकारेपिबोध्यः ॥ तद्बृहतोर्दकारतकारौलुप्येते करपत्योस्तुसुट् ॥ चोरदेवतयोरितिसमुदायोपाधिः ॥ तस्करः ॥ बृहस्पतिः ॥ प्रायश्चित्तिचित्तयोः ॥ प्रायश्चित्तिः ॥ प्रायश्चित्तम् ॥ वनस्पतिरित्यादि ॥ आकृतिगणोयम् ॥

॥ इतिसमासाश्रयविधयः ॥

पाव्हारिह्वात् पत्राशि. सङ्खि ॥ ४०

श्रीसोमनाथस्यच पुस्तकोयं चोरितव्यो विद्याखलेनवा ॥:९:॥
श्रीजगन्नाथोपाध्यायस्येदम्पु
स्तकम् ॥ तद्धितस्य ॥
लि॰पृ॰चारि

इतस्तद्धितकार्यारम्भः

श्रीमद्दनरिपोर्नन्दनम्वन्दे॥ ॥समर्थानाम्प्रथमाद्वा॥ इदम्पदत्रयमधिक्रियते प्राग्दि
श इति यावत्॥ प्राग्दीव्यतोऽण्॥ तेन दीव्यतीत्यतः प्रागणधिक्रियते॥ अश्वपत्या
दिभ्यश्च॥ एभ्योऽणस्यात् प्राग्दीव्यतीयेष्वर्थेषु॥ अश्वपतेरपत्यादि आश्वपतम्॥
गाणपतम्॥ दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः॥ प्राग्दीव्यतीयेष्वर्थेषु॥ दितेर
पत्यादि दैत्यः॥ अदितेरादित्यस्य वा आदित्यः॥ यणो मयो द्वे वाच्ये॥ मय
इति पञ्चमी यण इति षष्ठीति पक्षे यस्य द्वित्वम्॥ हलो यमां यमि लोपः॥
वा स्यात्॥ इत्यसति लोपे द्वित्वे च सति त्रियं रूपम्॥ असति लोपे द्वित्वे लोप भवति

योर्वादित्यम् ॥ दित्याभावे लोपे च रुकयम् ॥ प्राजापत्यः ॥ पृथिव्या ञाञौ ॥ पा
र्थिवः ॥ पार्थिवी ॥ देवाद्यञञौ ॥ दैव्यम् ॥ दैवम् दैवी ॥ वहिषष्टिलोपो यञ्च ॥ वाह्यः
॥ ईकक्च ॥ कितिच ॥ किति तद्धितेऽचामादेर्वृद्धिः स्यात् ॥ वाहीकः ॥ गो
रजादिप्रसंगे यत् ॥ गोरपत्यादि गव्यम् ॥ उत्सादिभ्योऽञ् ॥ औत्सः ॥ ॥
इत्यपत्यादिविकारान्तार्थाः साधारणाः प्रत्ययाः ॥ ॥ स्त्रीपुंसाभ्यां नञ्स्नञौ
भवनात् ॥ धान्यानां भवने इत्यतः प्रागर्थेष्वाभ्यामेतौ स्तः ॥ स्त्रैणः ॥ पौंस्नः ॥
तस्यापत्यम् ॥ षष्ठ्यन्तात्कृतसंधेः समर्थादपत्येऽर्थे उक्ता वक्ष्यमाणाश्च प्रत्य

यांवास्युः॥ओर्गुणः॥उवर्णान्तस्यभस्यगुणःस्यात्तद्धिते॥ओरोद्दितिवक्तव्ये
गुरोक्तिः संज्ञापूर्वकोविधिरनित्यइतिज्ञापयितुं॥तेनस्वायंभुवमित्यादि
सिद्धम्॥उपगोरपत्यमौपगवः॥आश्वपतः॥दैत्यः॥औत्सः॥स्त्रैणः॥पौंस्नः
॥अपत्यंपौत्रप्रभृतिगोत्रं॥अपत्यत्वेनविवक्षितंपौत्रादिगोत्रसंज्ञंस्यात्॥
एकोगोत्रे॥गोत्रेएकएवप्रत्ययःस्यात्॥उपगोर्गोत्रापत्यमौपगवः॥गर्गा
दिभ्योयञ्॥गोत्रापत्ये॥गर्गस्यगोत्रापत्यंगार्ग्यः॥यञञोश्च॥गोत्रेयद्य भवतः
ञंतमञन्तञ्चतदवयवयोरेतयोर्लुक्॥तत्कृतेबहुत्वेनतुस्त्रियाम्॥गर्गाः

स्त्रियान्तु गार्गी: म.कौ
गार्ग्यः

सर्वविधिभ्यो लुग्विधिर्बलवान्

अनाति किम्: गार्ग्यायणः २

वत्साः॥गोत्रेलुगचि॥अजादौप्राग्दीव्यतीयेविवक्षितेगोत्रप्रत्ययस्यालुक्स्यात्॥गर्गाणांछात्राःवक्ष्यमाणोऽछः॥आपत्यस्यचतद्धितेनाति॥हलःपरस्यापत्ययस्यलोपस्तद्धितेनत्वाकारे॥गार्गीयाः॥प्राग्दीव्यतःकिम्॥गर्गेभ्योहितम्गर्गीयम्॥अचिकिं॥गर्गेभ्यआगतंगर्गरूप्यम्॥जीवतितुवंश्येयुवा॥वंश्येपित्रादौजीवतिपौत्रादेर्यदपत्यंचतुर्थादितद्युवसंज्ञमेवस्यात्॥गोत्राद्यून्यस्त्रियाम्॥यून्यमस्येविवक्षितेगोत्रप्रत्ययान्तादेवप्रत्ययःस्यात्स्त्रियांतुनयुवसंज्ञा॥यञिञोश्च॥गोत्रेयौयञिञौतदन्तात्फक्॥आयनेयीनीयियःफढखछघांप्रत्ययादीनाम्॥प्रत्ययादेःफस्यआयन्ढस्यएय्खस्यईन्छ

बाहारपत्यं वाहविः॥ ऐधरिः औपबिन्दविः आग्निशर्मि
दासरथिः कार्ष्णिः पौरन्दरिः देवदत्तस्यापत्यं दैवदत्तिः

म॰कौ॰त॰ स्यईयूघस्यइस्सुः॥ गर्गस्य युवापत्यं गार्ग्यायणः॥ अतइञ्॥ अपत्यर्थे॥ दाक्षिः॥ बा
ह्वादिभ्यश्च॥ बाहविः॥ औडुलोमिः॥ औडुलोमी॥ लोम्नोपत्येषु बहुष्वकारो वक्तव्यः अनृष्येतिवक्तव्यम्
॥ बाह्वादीञोपवादः॥ उडुलोमाः॥ आकृतिगणोयम्॥ अनृष्यानन्तर्ये बिदादिभ्यो
ऽञ्॥ ये त्वत्राऽनृषयस्तेभ्योऽपत्येऽन्यत्र तु गोत्रे॥ बिदस्य गोत्रं बैदः॥ बैदौ॥ बिदाः॥ पौत्रः
पौत्रौ॥ यञञोश्चेति सूत्रे प्रवराध्याय प्रसिद्धं गोत्रम्॥ तेनेह न॥ पौत्राः॥ एवं दौहि
त्रादयः॥ शिवादिभ्योऽण्॥ अपत्ये॥ शैवः॥ गाङ्गः॥ ऋष्यन्धकवृष्णिकुरुभ्य
श्च॥ ऋषिभ्यः॥ वासिष्ठः॥ वैश्वामित्रः॥ अन्धकेभ्यः॥ श्वाफल्कः॥ वृष्णिभ्यः॥ भवन्ति
वासुदेवः॥ कुरुभ्यः॥ नाकुलः॥ साहदेवः॥ मातुरुत्संख्यासंभद्रपूर्वायाः॥ सं ३

अंकुरः २

ख्यादिपूर्वस्य मातृशब्दस्य उरादेशः स्यादण्प्रत्ययश्च ॥ द्वैमातुरः ॥ षाण्मातुरः ॥ सा
म्मातुरः ॥ भाद्रमातुरः ॥ स्त्रीभ्यो ढक् ॥ स्त्रीप्रत्ययान्तेभ्यो ढक् ॥ वैनतेयः ॥ कन्यायाः
कनीन च ॥ चादण् ॥ कानीनो व्यासः कर्णश्च ॥ राजश्वशुराद्यत् ॥ राज्ञो जातावेवे
तिवाच्यम् ॥ ये चाभावकर्मणोः ॥ यादौ तद्धितेऽन्प्रकृत्या स्यान्नतु भावकर्मणोः
॥ राजन्यः ॥ जातावेवेति किम् ॥ अन् ॥ अन्स्य ह्रस्याऽगि परे ॥ राजनः ॥ श्वसुर्यः ॥
क्षत्राद्घः ॥ क्षत्रियः ॥ जातावित्येव ॥ क्षात्रिरन्यः ॥ रेवत्यादिभ्यष्ठक् ॥ ठस्येकः
अङ्गात्परस्य ठस्येकादेशः ॥ रैवतिकः ॥ गोत्रेकुंजादिभ्यश्च्फञ् ॥ व्रातच्फञो
रस्त्रियाम् ॥ व्रातवाचिभ्यश्च्फञन्तेभ्यश्च स्वार्थे ञ्यः प्रत्ययः स्यात् ॥ कौंजाय

म·कौ·दि·प्रि

म·कौ·त

न्यः॥कौंजायन्यौ॥बहुत्वेलुग्वक्ष्यते॥ब्राध्नायन्यः॥नडादिभ्यःफक्॥गोत्रइत्येव॥ना
डायनः॥चारायणः॥अनंतरोनादिः॥अश्वादिभ्यःफञ्॥गोत्रे॥आश्वायनः॥१
इतश्चानिञः॥इकारान्ताद्व्यचोऽपत्येढक् नत्विञन्तात्॥दौलेयः॥नैधेयः॥आ
त्रेयः॥आत्रेयौ॥अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च॥एभ्योगोत्रप्रत्य
यस्यलुक्तत्कृतबहुत्वेनतुस्त्रियाम्॥अत्रयः॥भृगवः॥कुत्साः॥वासिष्ठाः॥ गोतमाः
आङ्गिरसः॥शुभ्रादिभ्यश्च॥ढक्स्यादपत्ये॥शौभ्रेयः॥कल्याण्यादीनामिनङ्
॥एषामिनङ्स्याड्ढक्च॥काल्याणिनेयः॥बांधकिनेयः॥कुलटाया वा॥ भ्वसि·
इनङ्मात्रंविकल्प्यतेढक्तुनित्यः पूर्वेणैव॥कौलटिनेयः॥कौलटेयः॥ ४

देवाः२

सतीमित्युक्तमकुलटा॥ चटकाया ऐरक्॥ चटकादिति वाच्यम्॥ प्रातिपदिकग्रहणे
लिङ्गविशिष्टस्यापि ग्रहणमिति सिध्यति॥ चटकस्य चटकाया वा अपत्यं चाटकैरः
॥ स्त्रियामपत्ये लुग्वक्तव्यः॥ तयोरेव स्त्र्यपत्यं चटका॥ गोधाया ढ्रक्॥ गौधेरः॥ आ
रादित्वाड्ढक्॥ गौधेयः॥ क्षुद्राभ्यो वा॥ अङ्गहीना शीलहीनाश्च क्षुद्रास्ताभ्यो वा
ढक्॥ काणेरः॥ काणेयः॥ दासेरः॥ दासेयः॥ पितृष्वसुश्छण्॥ अणोऽपवादः॥ पै
तृष्वस्रीयः॥ ढकि लोपः॥ पितृष्वसुर्लोपो ढकि॥ अत एव ज्ञापकाड्ढक्॥ पैतृ
ष्वसेयः॥ मातृष्वसुश्च॥ पितृष्वसुर्यदुक्तं तदस्यापि स्यात्॥ मातृष्वस्रीयः॥
मातृष्वसेयः॥ कुलात्खः॥ कुलीनः॥ तदन्तादपि॥ उत्तरसूत्रे अपूर्वपदादिति

लिंगात्॥ आढ्यकुलीनः॥ अपूर्वपदादन्यतरस्यां यड्ढकञौ॥ कुलादित्येव॥ पक्षे खः
॥ कुल्यः॥ कौलेयकः॥ कुलीनः॥ महाकुलादञ्खञौ॥ वा स्तः॥ पक्षे खः॥ माहाकुलः
॥ माहाकुलीनः॥ महाकुलीनः॥ दुष्कुलाड्ढक्॥ वा स्यात् पक्षे खः॥ दौष्कुलेयः॥ दु
ष्कुलीनः॥ स्वसुश्छः॥ स्वस्रीयः॥ भ्रातुर्व्यच्च॥ चाच्छः॥ भ्रातृव्यः॥ भ्रात्रीयः॥ मनोर्जा
तावञ्यतौ षुक्च॥ समुदायार्थो जातिः॥ मानुषः॥ मनुष्यः॥ नश्णोऽणुउपसं
ख्यानम्॥ षपूर्वहन्धृतराज्ञामणि॥ रयामणि तद्धितेऽनोकारलोपः॥ ता
क्ष्णः॥ तिकादिभ्यः फिञ्॥ तैकायनिः॥ वृद्धिर्यस्याचामादिस्तद्वृद्धम्॥ यस्य
समुदायस्याचां मध्ये आदिर्वृद्धिस्तद्वृद्धसंज्ञं स्यात्॥ उदीचां वृद्धादगोत्रात्॥

मवथः

कालिङ्गः॥ शौरमसः

आम्रगुप्तायनिः॥ प्राचामवृद्धात्फिन्बहुलम्॥ ग्लुचुकायनिः॥ जनपदशब्दात्क्षत्रियादञ्॥ जनपदक्षत्रिययोर्वाचकादञपत्ये॥ पांचालः॥ क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत्॥ पंचालानां राजा पांचालः॥ पूरोरण्॥ पौरवः॥ द्व्यञ्मगधकलिङ्गसूरमसादण्॥ द्व्यचः॥ आङ्गः वांगः॥ मागधः॥ पाण्डोर्ड्यण्॥ पाण्ड्यः॥ वृद्धेत्कोशलाजादाञ्ञ्यङ्॥ वृद्धात्॥ आंवष्ठ्यः॥ इत्॥ आवंत्यः॥ कौशल्यः॥ अजादस्यापत्यं आजाद्यः॥ कुरुनादिभ्यो ण्यः॥ कौरव्यः॥ नैषध्यः॥ ते तद्राजाः॥ अञादयस्तद्राजसंज्ञाः स्युः॥ तद्राजस्य बहुषु तेनैवाऽस्त्रियाम्॥ वहुष्वर्थेषु तद्राजस्य लुक् न ऽऽ त वहुत्वेन तु स्त्रियाम्॥

म.कौ.त

पंचालाइत्यादि॥ कंबोजाल्लुक्॥ तद्राजस्य॥ कंबोजः॥ कंबोजौ॥ कंबोजादिभ्य
इतिवक्तव्यम्॥ चोलः॥ शकः॥ केरलः॥ यवनः॥ अणिञोरनार्षयोर्गुरूपोत्तम
योःष्यङ्गोत्रे॥ त्र्यादीनामन्त्यमुत्तमं॥ तस्यसमीपमुपोत्तमम्॥ गोत्रेया
वणिञौविहितौअनार्षौतदन्तयोर्गुरूपोत्तमयोः प्रातिपदिकयोः स्त्रियांष्य
ङादेशः॥ यङश्चाप्॥ कुमुदगंधेःगोत्रापत्यंस्त्रीकौमुदगन्ध्या॥ वाराह्या॥ अना
र्षयोःकिम्॥ वासिष्ठी॥ गुरूपोत्तमयोःकिम्॥ औपगवी॥ गोत्रेकिं॥ अहि
च्छत्रेजाताआहिच्छत्री॥ ॥ इत्यपत्याधिकारः॥ ॥ तेनरक्तंरागात्॥ क
षायेणरक्तंवस्त्रंकाषायम्॥ मांजिष्ठम्॥ रागात्किं॥ देवदत्तेनरक्तंवस्

भवय.
६

नक्षत्रेण युक्तश्चन्द्रमसा युक्त इत्यर्थः तत्र बोधकात् प्रत्ययो भवति तेन युक्तः कालः इत्यर्थः ४

स्त्रं ॥ लाक्षारोचनाट्ठक् ॥ लाक्षिकम् ॥ रौचनिकः ॥ शकलकर्दमाभ्यामु
पसंख्यानम् ॥ शाकलिकः ॥ कार्दमिकः ॥ नील्या अन् ॥ नील्या रक्तं नील
म् ॥ पीतात्कन् ॥ पीतकम् ॥ हरिद्रामहारजनाभ्यामञ् ॥ हारिद्रम् ॥ माहा
रजनम् ॥ नक्षत्रेण युक्तः कालः ॥ तिष्यपुष्ययोर्नक्षत्राणि यलोपः ॥ पु
ष्येण युक्तं पौषमहः ॥ लुबविशेषे ॥ पूर्वेण विहितस्य लुप् षष्टीदण्डा
त्मकस्य कालस्यावान्तरविशेषश्चेन्न गम्यते ॥ अद्य पुष्यः ॥ दृष्टं साम
॥ तेनेत्येव ॥ वसिष्ठेन दृष्टं वासिष्ठं साम ॥ वामदेवाड्ड्यड्ड्यौ ॥ वामदेवेन दृ
ष्टं वामदेव्यम् ॥ परिवृतो रथः ॥ वस्त्रेण परिवृतो वास्त्रो रथः ॥ तत्रोद्धृत

म·कौ·त· ममगेभ्यः॥शरावेउद्धृतःशारावओदनः॥संस्कृतंभक्ष्याः॥सप्तम्यंतादण
स्यात्संस्कृतेर्थेयत्संस्कृतंभक्ष्याश्चेत्तेस्युः॥भ्राष्ट्रेसुसंस्कृताभ्राष्ट्राभक्ष्याः॥
शूलोखाद्यत्॥अणोपवादः॥शूलेसंस्कृतंशूल्यंमांसं॥उख्यम्॥ दध्नष्ठक्
॥दध्निसंस्कृतंदाधिकम्॥साऽस्मिन्पौर्णमासीति॥इतिशब्दात्संज्ञाया
मितिलभ्यते॥पौषीपौर्णमासीअस्मिन्मासेपौषोमासः॥सास्यदेवता
॥इन्द्रोदेवताअस्येत्यैन्द्रंहविः॥पाशुपतम्॥बार्हस्पत्यम्॥त्यजमानद्रव्ये
उद्देश्यविशेषोदेवता॥मन्त्रस्तुत्याच॥ऐन्द्रोमन्त्रः॥कस्येत्॥कशब्द
स्यइकारःस्यात्प्रत्ययसंनियोगेन॥यस्येतिलोपात्परत्वादाऽऽदिवृद्धिः॥ मवामि
७

कोब्रह्मादेवताअस्यकायंहविः॥श्रीर्देवताऽस्यश्रायंहविः॥शुक्राद्घन्॥शु
क्रियम्॥सोमाट्ट्यण्॥सौम्यं॥वाय्वृतुपित्रुषसोयत्॥वायव्यम्॥ऋतव्य
म्॥रीङृतः॥अकृद्यकारेऽसार्वधातुकयकारेच्वौचपरेऋदंताङ्गॅरीङादे स्य
शः॥यस्येतिच॥पित्र्यम्॥उषस्यम्॥द्यावापृथिवीशुनासीरमरुत्वद
ग्नीषोमवास्तोष्पतिगृहमेधाच्छच॥चाद्यत्॥द्यावापृथिवीयम्॥द्या
वापृथिव्यम्॥शुनासीरीयम्॥शुनासीर्यम्॥महाराजप्रोष्ठपदाट्ठञ्
माहाराजिकम्॥प्रौष्ठपदिकम्॥देवताद्वन्द्वेच॥अत्रपूर्वोत्तरपदयोरा
द्यचोर्वृद्धिर्ञितिणितिकितिच॥आग्निमारुतं॥नेन्द्रस्यपरस्य॥सौमे

न्द्रः ॥ परस्य किं । ऐन्द्राग्नः ॥ दीर्घाच्च वरुणस्य ॥ न वृद्धिः ॥ ऐन्द्रावरुणं ॥ दीर्घात्किं
॥ आग्निवारुणी अनड्वाही ॥ पितृव्यमातुलमातामहपितामहाः ॥ एते निपा
त्यन्ते ॥ पितुर्भ्राता पितृव्यः ॥ मातुर्भ्राता मातुलः ॥ मातुः पिता मातामहः ॥ पितुः
पिता पितामहः ॥ तस्य समूहः ॥ काकानां समूहः काकम् ॥ भिक्षादिभ्योऽण् ॥
भैक्षम् ॥ गर्भिणीनां समूहो गार्भिणम् ॥ इह भस्याढे इति पुंवद्भावे कृते ॥ इन
ण्यनपत्ये ॥ अनपत्यार्थेऽणि इन् प्रकृत्या ॥ तेन नस्तद्धिते इति टिलोपो न ॥
युवतीनां समूहो यौवनम् ॥ वावंतादनुदात्तादेरञ् यौवतम् ॥ गोत्रोक्षोष्ट्रोरभ्र
राजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ् ॥ ग्लुचुकायनीनां समूहो ग्लौचु

औक्षकम्॥औरभ्रकम्॥ राजकम्।राजपुत्रकम्।वात्सकम्॥आजादकम्॥

क

कायनम्॥औक्षकमित्यादि॥आपत्यस्यचेतियलोपेप्राप्ते॥प्रकृत्याकेराजन्यमनुष्ययुवानः॥राजन्यकम्॥मानुष्यकम्॥वृद्धाच्चेतिवक्तव्यम्॥वार्द्धकम्॥केदारायञ्च॥चाद्वुञ्॥कैदार्यम्॥कैदारकम्॥गणिकायायञितिवक्तव्यम्॥गाणिक्यम्॥ठञ्कवचिनश्च॥चात्केदारादपि॥कवचिनांसमूहःकावचिकम्॥कैदारिकम्॥ग्रामजनबन्धुभ्यस्तल्॥ग्रामता॥जनता॥बन्धुता॥तलंतंस्त्रियाम्॥गजसहायाभ्यांचेतिवक्तव्यम्॥गजता॥सहायता॥अह्नःखःक्रतौ॥अहीनः॥अचित्तहस्तिधेनोष्ठक्॥इसुसुक्तान्तात्कः॥इस्उस्उक्तस्एतदंतात्परस्यठस्यकः॥साक्तुकम्॥हास्तिकम्॥धैनुकम्॥केशा

म॰कौ॰त॰

आभ्यां यञ्छावन्यतरस्याम्॥ पक्षे ठगणौ॥ कैश्यम्॥ कैशिकम्॥ अश्वीयम्॥ आश्वम्॥ पाशादिभ्यो यः॥ पाश्या॥ तृण्या॥ धूम्या॥ वन्या॥ वात्या॥ खलगोरथात्॥ खल्या॥ गव्या॥ रथ्या॥ इनित्रकट्यचश्च॥ खलादिभ्यः क्रमात्स्युः॥ खलिनी॥ गोत्रा॥ रथकट्या॥ खलादिभ्य इनिर्वक्तव्यः॥ डाकिनी॥ कुटुम्बिनी॥ आकृतिगणोयम्॥ तदस्यां प्रहरणमिति क्रीडायां णः॥ दण्डः प्रहरणमस्यां क्रीडायां दाण्डा॥ मौष्टा॥ घञः सास्यां क्रियेति ञः॥ घञन्तात् क्रियावाचिनः प्रथमान्तादस्यामित्यर्थे स्त्रीलिङ्गे ञः प्रत्ययः स्यात्॥ श्येनतिलस्यपाते ञे॥ अनयोर्मुगागमः स्यात्ञान्ते पातशब्दे उत्तरपदे॥ श्येनपातोऽस्यां सा श्येनंपाता मृगर

मवामः
९

या॥ तिलपातोऽस्यां सा तैलंपाता स्वधा॥ श्येनतिलस्य किं॥ दण्डपातोऽस्यां दाण्ड
पाता तिथि॥ तदर्यतितद्धेद॥ न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्॥ पदान्ताभ्यां
यकारवकाराभ्यां परस्य न वृद्धिः॥ किन्तु ताभ्यां पूर्वौ तु क्रमादैचावागमौ स्तः
॥ व्याकरणमधीते वेत्ति वा वैयाकरणः॥ क्रमादिभ्यो वुन्॥ क्रमकः॥ पद
कः॥ शिक्षकः॥ मीमांसकः॥ क्रतूक्थादिसूत्रान्ताट्ठक्॥ क्रतुविशेषवाचि
नामेवेह ग्रहणम्॥ तेभ्यो मुख्यार्थेभ्यो वेदितरि तत्प्रतिपादकग्रन्थपरे
भ्यस्त्वध्येतरि॥ आग्निष्टोमिकः॥ वाजपेयिकः॥ उक्थं सामविशेषः॥
तल्लक्षणपरो ग्रन्थविशेषो लक्षणयोक्थं। तदधीते वेद वा औक्थिकः॥

म.को.त.
१०

मुख्यार्थान्नृस्यत्र ख्याद्दृगणोनेष्यते। न्यायम्॥ नैयायिकः॥ वृत्तिम्॥ वार्त्तिकः
॥ लोकायतम्॥ लौकायतिकः॥ सूत्रान्तानुअकल्पादेरेवेष्यते॥ सांग्रहसूत्रि
कः॥ अकल्पादेः किम्॥ काल्पसूत्रः॥ विद्यालक्षणकल्पान्ताच्चेति वक्त
व्यम्॥ वायसविद्यिकः॥ गौलक्षणिकः॥ पाराशरकल्पिकः॥ अङ्गक्षत्रधर्म
त्रिपूर्वाद्विद्यान्तान्नेति वक्तव्यम्॥ आङ्गविद्यः॥ क्षात्रविद्यः॥ धार्मविद्यः॥ त्रि
विधा विद्या त्रिविद्या॥ तामधीते त्रैविद्यः॥ तदस्मिन्नस्तीति दे
शे तन्नाम्नि॥ उदुम्बराः सन्त्यस्मिन्देशे औदुम्बरो देशः॥ तेन निर्वृत्तम्॥ बभूव
कुशाम्बेन निर्वृत्ता कौशाम्बी नगरी॥ तस्य निवासः॥ शिबीनां निवासो १०

देशः शैवः॥ अदूरभवश्च॥ अराम्॥ विदिशाया अदूरभवं वैदिशम्॥ वुञ्छण्क
ठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोरीहणकृशाश्वर्श्यकुमु
दकाशतृणप्रेक्षाश्मसखिसंकाशबलपक्षकर्णसुतङ्गमप्रगदिन्वराह
कुमुदादिभ्यः॥ सप्तदशभ्यः सप्तदश क्रमात् स्युश्चातुरर्थ्याम्॥ अरीहणादि
भ्यो वुञ्॥ अरीहणेन निर्वृत्तं आरीहणकम्॥ कृशाश्वादिभ्यश्छण्॥ कार्शा
श्वीयः॥ ऋश्यादिभ्यः कः॥ ऋश्यकं॥ कुमुदादिभ्यः ष्ठच्॥ कुमुदिकम्॥
काशादिभ्य इलः॥ काशिलः॥ तृणादिभ्यः सः॥ तृणसम्॥ प्रेक्षादिभ्य इनिः
॥ प्रेक्षी॥ अश्मादिभ्यो रः॥ अश्मरम्॥ सख्यादिभ्यो ढञ्॥ साखेयम्॥ सं

काशादिभ्यो ण्यः॥ सांकाश्यम्॥ बलादिभ्यो यः॥ बल्यम्॥ पक्षादिभ्यः फक्
॥ पाक्षायणः॥ पथः पंथ च॥ पांथायनः॥ कर्णादिभ्यः फिञ्॥ कार्णायनिः॥
सुतंगमादिभ्य इञ्॥ सौतंगमिः॥ प्रगदिनादिभ्यो ञ्यः॥ प्रगदिन्॥ प्रागघः॥
वराहादिभ्यः कक्॥ वाराहकः॥ कुमुदादिभ्यः ठक्॥ कौमुदिकः॥ जनपदे
लुप्॥ जनपदे वाच्ये चातुरर्थिकस्य लुप्॥ लुपि युक्तवद्व्यक्तिवचने॥ लु
पि सति प्रकृतिवल्लिंगवचने स्तः॥ पंचालानां निवासो जनपदः पंचालाः
कुरवः॥ अङ्गाः॥ वंगाः॥ कलिंगाः॥ वरणादिभ्यश्च॥ अजनपदार्थ आरम्भः वभूवतुः
॥ वरणानामदूरनगरं वरणाः॥ शर्करायावा॥ अस्माच्चातुरर्थिकस्य लु

स्यात् ॥ ठक्छौ च ॥ शार्कराया अण्नोस्तः ॥ कुमुदादौवराहादौच पाठसामर्थ्या
त्यसेठ्छकौ ॥ वाग्रहणसामर्थ्यात्पक्षेऽणौत्सर्गिकोऽण् ॥ तस्य लुब्विकल्प्यः
॥ खड्डपाणि शार्करा ॥ शार्करम् ॥ शार्करिकम् ॥ शार्करीयम् ॥ शार्करिकम् ॥ शा
र्करकम् ॥ न द्यो मतुप् ॥ चातुरर्थिकः ॥ इक्षुमती ॥ कुमुदनडवेतसेभ्यो ड्मतुप्
॥ झयः ॥ मतोर्मस्य वः ॥ कुमुद्वान् ॥ नड्वान् ॥ मादुपधायाश्च मतोर्वोऽयवादिभ्यः
॥ मवर्णावर्णान्तान्मवर्णावर्णोपधाच्च यवादिवर्जितात्परस्य मतोर्मस्य वः ॥
वेतस्वान् ॥ नडशादाड्ड्वलच् ॥ नड्वलः ॥ शिखाया वलच् ॥ शिखावलः ॥ उत्क
रादिभ्यश्छः ॥ उत्करीयः ॥ नडादीनां कुक् च ॥ नडकीयम् ॥ क्रुंचा ह्रस्वत्वं च ॥ कुं

चकीयः॥ नडान्नलोपश्च॥ नडकीयः॥ ० ॥इति चातुरर्थिकाः॥ ० ॥शेषे॥ अप
त्यादिचतुरर्थ्यन्तादन्योर्थः शेषस्तत्राणादयः स्युः॥ चक्षुषा ग्रह्यते चाक्षुषं रूपम्॥ श्रावणः
शब्दः औपनिषदः पुरुषः॥ दृषदि पिष्टा दार्षदाः सक्तवः॥ उलूखले क्षुण्ण औलूखलो यावकः
॥अश्वैरुह्यते आश्वो रथः॥ चतुर्भिरुह्यते चातुरं शकटम्॥ चतुर्दश्यां दृश्यते चातुर्दशं रक्षः॥ र
तस्य विकार इत्यतः प्राक् शेषाधिकारः॥ राष्ट्रावारपाराद्घखौ॥ आभ्यां क्रमाद्घखौ स्तः॥ राष्ट्रे जा घ५
तादि राष्ट्रियः॥ अवारपारीणः॥ अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यम्
॥अवारीणः॥ पारीणः॥ पारावारीणः॥ इह प्रकृतिविशेषाद्घादयष्ट्युट्युलन्ता उच्यं ट्युट्यु
ते॥ तेषां जातादयोर्थविशेषाः समर्थविभक्तयश्च वक्ष्यन्ते॥ ग्रामाद्यखञौ॥ ग्राम्यः व भूवुः
॥ग्रामीणः॥ नद्यादिभ्यो ढक्॥ नादेयम्॥ माहेयम्॥ वाराणसेयम्॥ दक्षिणापश्चात् १२

पि४

दक्षिणात्याऽप्यत्ययान्तमव्ययम्. एवञ्चसर्वनाम्नो वृत्तिमात्रे पुंव
दितिस्त्रींकैव
नास्ति

अमान्तिकस
हार्थयोः॥ ॥

श्चात्पुरसस्त्यक्॥ दाक्षिणात्यः॥ पाश्चात्यः॥ पौरस्त्यः॥ द्युप्रागपागुदक्प्रतीचो यत्॥ दि
व्यम्॥ प्राच्यम्॥ अपाच्यम्॥ उदीच्यम्॥ प्रतीच्यम्॥ अव्ययात्त्यप्॥ अमेहक्वतसित्रेभ्य
एव॥ अमात्यः॥ इहत्यः॥ क्वत्यः॥ कुतस्त्यः॥ ततस्त्यः॥ तत्रत्यः॥ त्यब्नेर्ध्रुव इति वक्तव्यम्
॥ नित्यः॥ निसो गते॥ ह्रस्वात्तादौ तद्धिते॥ ह्रस्वादिणः सस्य षः स्यात्तादौ तद्धिते॥ निर्गतो
वर्णाश्रमेभ्यो निष्ट्यश्चण्डालादिः॥ अरण्याण्णः॥ आरण्याः सुमनसः॥ दूरादेत्यः
॥ दूरेत्यः॥ उत्तरादाहञ्॥ औत्तराहः॥ ऐषमोह्यःश्वसोऽन्यतरस्याम्॥ एभ्यस्त्यब्वा॥
पक्षे वक्ष्यमाणौ टुटुलौ॥ ऐषमस्त्यं॥ ऐषमस्तनम्॥ ह्यस्त्यम्॥ ह्यस्तनम्॥ श्व
स्त्यम्॥ श्वस्तनम्॥ शौवस्तिकं वक्ष्यते॥ वृद्धाच्छः॥ शालीयः॥ त्यदादीनि च॥ वृद्ध
संज्ञानि स्युः॥ तदीयः॥ वा नामधेयस्य वृद्धसंज्ञा॥ देवदत्तीयः॥ दैवदत्तः॥ भव
वाच्या॥

म॰कौ॰त॰ तष्ठक्छसौ ॥ वृद्धाद्भवतस्तौ स्तः ॥ भावत्कः ॥ सिनिच ॥ सिनि तद्धिते पूर्वं पदम्स्यात् ॥ ज
स्त्वम् ॥ भवदीयम् ॥ वृद्धादित्यनुवृत्तेः शत्रंतादेव ॥ भावतः ॥ काश्यादिभ्यष्ठञ्ञिठौ
॥ इकार उच्चारणार्थः ॥ काशिकी ॥ काशिका ॥ वैदिकी ॥ वैदिका ॥ आपदादिपूर्वपदात्
कालान्तात् ॥ आपदादिराकृतिगणः ॥ आपत्कालिकी ॥ आपत्कालिका ॥ धन्वयोप
धाद्वुञ् ॥ धन्वविशेषवाचिनो यकारोपधाच्च देशवाचिनो वुञ् स्यात् ॥ ऐरावतं धन्व वुञ्
॥ ऐरावतकः ॥ सांकाश्यकांपिल्यशब्दौ वुञ्छणादिसूत्रे गणपान्तौ ॥ सांकाश्यकः कांपिल्यकः
॥ नगरात्कुत्सनप्रावीण्ययोः ॥ कुत्सने प्रावीण्ये च जातादौ प्रत्ययार्थे नगरशब्दाद्वु
ञ्स्यात् ॥ नागरकश्चोरः शिल्पी वा ॥ एतयोः किम् ॥ नागराः ब्राह्मणाः ॥ अरण्या
न्मनुष्ये ॥ वुञ्स्यात् ॥ औपसंख्यानिकरणस्यापवादः ॥ पथ्यध्यायन्यायविहार वभूवषुः

अरण्याण्णस्यापवादः

१३

आवयोरस्माकं वा अयं अस्मदीयः २

मनुष्यहस्तिष्विति वक्तव्यम्॥ आरण्यकः पंथाः॥ अध्यायो न्यायो विहारो मनुष्यो हस्ती वा॥ गर्त्तोत्तरपदाछः॥ देश इत्येवा॥ वृकगर्त्तीयम्॥ गहादिभ्यश्च॥ गहीयः॥ युष्मदस्मदोरन्यतरस्यां खञ्च॥ चाछः॥ पक्षेऽण्॥ युवयोर्युष्माकं वाऽयं युष्मदीयः॥ तस्मिन्नणि च युष्माकास्माकौ॥ युष्मदस्मदोरेतावादेशौ स्तः॥ यौष्माकीणः॥ आस्माकीनः॥ यौष्माकः॥ आस्माकः॥ तवकममकावेकवचने॥ एकार्थप्रतिवाचिनोर्युष्मदस्मदोस्तवकममकौ स्तः खञ्यणि च॥ तावकीनः॥ तावकः॥ मामकीनः॥ मामकः॥ छे तु॥ प्रत्ययोत्तरपदयोश्च॥ मपर्यन्तयोरनयोरेकार्थवाचिनोस्त्वमौ स्तः॥ प्रत्यये उत्तरपदे च॥ त्वदीयः॥ मदीयः॥ त्वत्पुत्रः॥ मत्पुत्रः॥ मध्यान्मः॥ मध्यमः॥ अ सांप्रतिके॥ मध्यशब्दादकारप्रत्ययः सांप्रतिकेऽर्थे॥ उत्कर्षापकर्षहीनो मध्यो वैयाकरणः॥ म

अन्वङीपूर्न·प्पन्नस्थेति सूत्रे अपरस्पार्थयञ्प्रत्ययान्ता देवङीपूस्यादिति व्याख्यानात् ॥ २

ध्यंदारु ॥ नातिह्रस्वं नातिदीर्घमित्यर्थः ॥ द्वीपादनुसमुद्रं यञ् ॥ समुद्रसमीपे यो द्वीपस्तद्वि
षयाद्वीपशब्दाद्यञ् स्यात् । द्वैप्या ॥ कालाट्ठञ् ॥ मासिकम् ॥ सांवत्सरिकम् ॥ अव्ययानां
भमात्रे टिलोपः ॥ सायंप्रातिकः ॥ पौनःपुनिकः ॥ कथं तर्हि सार्वरस्य तमसो निषिद्धये
इति कालिदासः ॥ अनुदितौ षसरागेति भारविः ॥ समानकालीनं प्राक्कालीनमित्या
दि च ॥ अपभ्रंसा एवेति प्राम्माणिकाः ॥ तत्राजात इति यावत् कालाधिकारः ॥ श्राद्धेश
रदः ॥ ठञ् ॥ ऋत्वणोपवादः ॥ शारदिकं श्राद्धम् ॥ विभाषा रोगातपयोः ॥ शारदिकः
॥ शारदो वा रोगः ॥ आतपो वा ॥ निशाप्रदोषाभ्यां च ॥ ठञ् ॥ नैशिकम् ॥ नैशम् ॥ प्रादो
षिकम् ॥ प्रादोषम् ॥ श्वसस्तुट् च ॥ श्वसष्ठञ् वा तस्य तुट् च ॥ द्वारादीनां च ॥ द्वारः । स्वरः । अमूव
व्यल्कशः ॥ स्वस्ति ॥ चिरम् ॥ स्फ्यकृत् ॥ स्वादु ॥ मृदु ॥ श्वस् ॥ श्वन् ॥ स्व ॥ एषां न वृद्धिरै

जागमश्चास्यात्॥शौवस्तिकम्॥संधिवेलाद्यृतुनक्षत्रेभ्योऽण्॥संधिवेलायांभ
वंसांधिवेलम्॥ग्रैष्मं॥नैषम्॥संधिवेला संध्या॥अमावास्या॥त्रयोद
शी॥चतुर्दशी॥पंचदशी॥प्रतिपत्॥प्रावृष एण्यः॥प्रावृषेण्यः॥वर्षाभ्य
ष्ठक्॥वर्षासुसाधुवार्षिकंवासः॥सर्वत्राण्चतलोपश्च॥हेमन्तादण्त
लोपश्च॥चकारात्पक्षे ऋतवण्॥हैमनम्॥हैमंतम्॥सायंचिरंप्राह्णेप्रगे
ऽव्ययेभ्यष्ट्युट्युलौतुट्च॥सायमित्यादिभ्यश्चतुर्भ्यःअव्ययेभ्यश्चकाल
वाचिभ्यष्ट्युट्युलौस्तस्तयोस्तुट्च॥सायंतनम्॥चिरंतनम्॥प्राह्णप्रगयो
रेदन्तत्वंनिपात्यते॥प्राह्णेतनम्॥प्रगेतनम्॥दोषातनम्॥दिवातनम्॥
चिरपरुत्परारिभ्यस्त्नोवक्तव्यः॥चिरत्नम्॥परुत्नम्॥परारित्नम्॥अ

घकालतनेषुकालनाम्नेतिङेरलुक्३

यादिपश्चाड्डिमच्॥अग्रिमम्॥आदिमम्॥पश्चिमम्॥अन्ताच्च॥अन्तिमम्॥विभा
षापूर्वाह्णापराह्णाभ्याम्॥आभ्यांट्युट्युलौवास्तस्तयोस्तुट्च॥पक्षेठञ्॥पूर्वा
ह्णेतनम्॥पौर्वाह्णिकम्॥अपराह्णेतनम्॥आपराह्णिकम्॥तत्रजातः॥स
प्तमीसमर्थाज्जातइत्यर्थेऽणादयोघादयश्चस्युः॥स्रुघ्नेजातःस्रौघ्नः॥औ
त्सः॥राष्ट्रियः॥अवारपारीणः॥इत्यादि॥प्रावृषष्ठप्॥एण्यस्यापवादः
॥प्रावृषिकः॥प्रायभवः॥तत्रेत्येव॥स्रुघ्नेप्रायेणबाहुल्येनभवतिस्रौघ्न
ः॥संभूते॥स्रुघ्नेसंभवतिस्रौघ्नः॥कोशाड्ढञ्॥कौशेयंवस्त्रम्॥तत्रभवः
॥स्रुघ्नेभवःस्रौघ्नः॥औत्सः॥राष्ट्रियः॥दिगादिभ्योयत्॥दिश्यम्॥वर्ग्य
म्॥शरीरावयवाच्च॥दन्त्यम्॥कण्ठ्यम्॥इतिकुलिकलघिवरस्यपरस्यहे १५

व मूल

आस्यम्

कौक्षेयम् वास्तेयम् आस्तेयम् आहेयम्

ठक्॥दार्तेयम्॥कलशिर्घटः॥तत्रभवंकालशेयम्॥ग्रीवादिभ्योऽण्चा॥चा
ढुक्॥ग्रैवेयम्॥ग्रैवम्॥गंभीराञ्ञ्यः॥गंभीरेभवंगांभीर्यम्॥अव्ययीभा
वाच्च॥परिमुखेभवंपारिमुख्यम्॥परिमुखादिभ्यएवेष्यते॥नेह॥औप
कूलः॥अंतःपूर्व पदाट्ठञ्॥अव्ययीभावादित्येव॥वेश्मनि इतिअंत
र्वेश्मं॥तत्रभवंआंतर्वेश्मिकम्॥आंतर्गणिकम्॥अध्यात्मादेष्ठञिष्यते
॥अध्यात्मेभवंआध्यात्मिकम्॥अनुशतिकादीनांच॥एषामुभयपद
वृद्धिर्ञितिणितिकितिचा॥आधिदैविकम्॥आधिभौतिकम्॥ऐहलौ
किकम्॥आकृतिगणोयम्॥जिह्वामूलाङ्गुलेश्छः॥जिह्वामूलीयम्॥अं
गुलीयम्॥वर्गान्ताच्च॥कवर्गीयम्॥ततआगतः॥स्रुघ्नादागतंस्रौघ्नः॥

मुखात्परि परिमुखं

नपुंसका इत्येतिठञ्

इहस्यास्मिलोके इहलोकः

पारलौकिकं

म·कौ·त

ल्क

ठगायस्थानेभ्यः॥शुशालायाआगतःशौल्कशालिकः॥विद्यायोनिसंबंधेभ्योवुञ्
॥औपाध्यायकः॥पैतामहकः॥ऋतष्ठञ्॥वुञोपवादः॥हौतृकम्॥मातृकम्॥
भ्रातृकम्॥पितुर्यच्च॥चाट्ठञ्॥रीङृतः॥यस्येतिलोपः॥पित्र्यम्॥पैतृकम्॥गो
त्रादंकवत्॥विदेभ्यआगतंवैदम्॥गार्गम्॥दाक्षम्॥औपगवकम्॥हेतुमनुष्ये
भ्योऽन्यतरस्यांरूप्यः॥समादागतंसमरूप्यम्॥पक्षेगहादित्वाच्छः॥समीयम्॥देव
दत्तीयम्॥देवदत्तरूप्यम्॥मयट्च॥सममयम्॥प्रभवति॥हिमवतःप्रभवति·
हैमवतीगंगा॥विदूराञ्ञ्यः॥विदूरात्प्रभवतिवैदूर्योमणिः॥दंतमध्योयंत्रा
डूनवत्त॥ननुनवृल्नवेन्मूर्द्धन्यमर्ध्वः॥नन्वर्थासंगतिः॥वालवायाद्धिअसौप्रभव
विदूरेतुसंस्क्रियतेसत्यम्॥अतएवसमाहितंभाष्येवालवोविदूरश्चेति॥वाः

अङ्कः त्वर्थे
यप्रत्ययो
विधीयते·

विषमम
यम् ४

वाल्व

३६

ल्वायशब्दः प्रत्ययं लभते विदूरादेशं च॥ सूत्रे पठितेनादेशेनानुरूपस्थाना आक्षिप्यते॥
तद्गच्छति पथिदूतयोः॥ स्रुघ्नं गच्छति स्रौघ्नः पंथाः॥ दूतो वा॥ अभिनिष्क्रामति द्वारम्॥
निष्क्रामति स्रुघ्नमभिगच्छति स्रौघ्नं कान्यकुब्जद्वारम्॥ अधिकृत्य कृते ग्रंथे॥ शारीरकमधिकृत्य कृतो
चातुरथ्या ग्रन्थः शारीरकीयः॥ शारीरकं भाष्यमिति तु अभेदोपचारात्॥ सोऽस्य निवासः॥ स्रुघ्नो आरोपात
पीवेदान निवासोऽस्य स्रौघ्नः॥ तेन प्रोक्तम्॥ पाणिनिना प्रोक्तं पाणिनीयम्॥ पाराशर्यशिला-
सरनम् ४ ☒ लिभ्यां भिक्षुनटसूत्रयोः॥ णिनिः स्यात्॥ पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीते पारा-
शरीरणः॥ भिक्षवः॥ शैलालिनो नटाः॥ कर्मन्दकृशाश्वादिनिः॥ कर्मन्देन प्रोक्तं भिक्षु-
य सूत्रमधीते कर्मन्दिनो भिक्षवः॥ कृशाश्विनो नटाः॥ उपज्ञाते॥ पाणिनिना उपज्ञातं उपदेशविना ज्ञान
पाणिनीयम्॥ तस्येदम्॥ उपगोरिदमौपगवम्॥ समिधामाधाने षेण्यण्॥ सा-
मिधेन्यो मन्त्रः॥ रथाद्यत्॥ रथ्यम् चक्रम्॥ पत्रपूर्वादञ्॥ अश्वरथस्येदम्॥ आश्व-

।खपांसामिधेनी

पत्रंवाहनम्

ग्रास्त्यम्

म.कौ.त

रथम्॥हलसीराट्ठक्॥हालिकम्॥सैरिकम्॥गोत्रचरणाद्वुञ्॥औपगवकम्॥चर
णाद्धर्माम्नाययोरितिवक्तव्यम्॥काठकम्॥संघाङ्कलक्षणेष्वञ्यञिञामण्॥घो
षग्रहणमपिकर्त्तव्यम्॥अञ्॥वैदः॥संघोषोवा॥वैदंलक्षणम्॥यञ्॥गार्गः॥गार्ग
म्॥इञ्॥दाक्षः॥दाक्षम्॥परंपरासंबंधोङ्कः॥साक्षात्तुलक्षणम्॥ ॥इतिशैषिकाः
॥ ॥तस्यविकारः॥अश्मनोविकारेटिलोपोवक्तव्यः॥अश्मनोविकारआश्मः॥
भास्मनः॥मार्त्तिकः॥अवयवेचप्राण्योषधिवृक्षेभ्यः॥चाद्विकारे॥मयूरस्यविकार
अवयवोवामायूरः॥मौर्वंकाण्डंभस्मवा॥पैप्पलम्॥त्रपुजतुनोःषुक्॥आभ्या
मण्स्तयोःषुक्च॥त्रापुषम्॥जातुषम्॥ओरञ्॥दैवदारवम्॥अनुदात्तादे
श्च॥अञ्॥कापित्थम्॥पलाशादिभ्योवा॥अञ्॥पालाशम्॥खादिरम्॥

घाङ्कु३

१०

दाधित्थम्

३ वाङ्मयं.

शम्याः ष्लञ्॥ शामीलम्॥ मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः॥ प्रकृतिमात्रान्म
यड्वा स्याद्विकारावयवयोः॥ अश्ममयम्॥ आश्मनम्॥ अभक्षेत्यादि किम्॥ मौद्गः सू
पः॥ कार्पासमाच्छादनम्॥ नित्यं वृद्धशरादिभ्यः॥ आम्रमयम्॥ शरमयम्॥ एका
चो नित्यम्॥ वाङ्मयम्॥ गोश्च पुरीषे॥ गोमयम्॥ एण्या ढञ्॥ ऐणेयम्॥ एण
स्य तु॥ ऐणम्॥ गोपयसोर्यत्॥ गव्यम्॥ पयस्यम्॥ फले लुक्॥ विकारावय
वप्रत्ययस्य॥ लुक्तद्धितलुकि॥ उपसर्जनस्त्रीप्रत्ययस्य॥ आमलक्याः फलं
आमलकम्॥ प्लक्षादिभ्योऽण्॥ विधिसामर्थ्यान्न लुक्॥ प्लाक्षम्॥ न्यग्रोधस्य
च केवलस्य॥ अस्य न वृद्धिरैजागमश्च॥ नैयग्रोधम्॥ जम्ब्वा वा॥ अण् फ
ले॥ जांबवम्॥ पक्षे ओरञ्॥ तस्य लुक्॥ जम्बुः॥ लुप् च॥ वा जम्ब्वाः फलप्रत्यय

स्यलुपि युक्तवत् ॥ जम्बुः ॥ फलपाकशुषामुपसंख्यानम् ॥ व्रीहयः ॥ मुद्गाः ॥
पुष्पमूलेषु बहुलम् ॥ मल्लिकायाः पुष्पं मल्लिका ॥ जात्याः पुष्पं जाती ॥ विदा
र्या मूलं विदारी ॥ बहुलग्रहणान्नेह ॥ पाटलानि पुष्पाणि · साल्वानि मूला
नि ॥ बाहुलकात्क्वचिल्लुक् ॥ अशोकम् ॥ करवीरम् ॥ हरीतक्यादिभ्यश्च ॥
फलप्रत्ययस्य लुप् ॥ हरीतक्यादीनां लिङ्गमेव प्रकृतिवत् ॥ हरीतक्याः फ
लानि हरीतक्यः ॥ ॥ इति प्राग्दीव्यतीयाः ॥ ॥ प्राग्वहतेष्ठक् ॥ तद्वह
तीत्यतः प्राक् ठगधिक्रियते ॥ तदाहेति माशब्दादिभ्य उपसंख्यानम् ॥ मा
शब्दः कारीति य आह सः माशब्दिकः ॥ आहौ प्रभूतादिभ्यः ॥ प्रभूतमा

इकारउच्चारणार्थ

रामः

ह प्राभूतिकः॥ पार्याप्तिकः॥ पृच्छतौ सुस्नातादिभ्यः॥ सुस्नातं पृच्छति सौस्नाति
कः॥ सौखशायनिकः॥ अनुसतिकादिः॥ गच्छतौ परदारादिभ्यः॥ पारदा
रिकः॥ गौरुतल्पिकः॥ तेन दीव्यति खनति जयति जितम्॥ अक्षैर्दीव्य
ति खनति जयति जितं वा आक्षिकः॥ संस्कृतम्॥ दध्ना संस्कृतं दाधिकम्॥
मारिचिकम्॥ तरति॥ उडुपेन तरति औडुपिकः॥ गोपुच्छाट्ठञ्॥ गौपुच्छि
कः॥ नौद्व्यचष्ठन्॥ नाविकः॥ घटिकः॥ चरति॥ हस्तिना चरति हास्ति
कः॥ दध्ना चरति दाधिकः॥ शाकटेन चरति शाकटिकः॥ पर्पादिभ्यः ष्ठ
न्॥ पर्पेण चरति पर्पिकः॥ पर्पिकी॥ येन पीठेन पंगवश्चरंति स पर्पः

उत्सङ्गः क्रोडः

अश्विकः॥ राथिकः॥ श्वगणाट्ठञ्च॥ चात्ष्ठन्॥ श्वादेरिञि॥ ऐच्नश्वाभस्त्रिः श्वादंष्ट्रि॥ इकारादाविति वाच्यम्॥ श्वगणेनचरति श्वागणिकः॥ श्वागणिकी॥ श्वगणिकः॥ श्वगणिकी॥ वेतनादिभ्योजीवति॥ वैतनिकः॥ धानुष्कः॥ हरत्युत्सङ्गादिभ्यः॥ उत्सङ्गेन हरति औत्सङ्गिकः॥ भस्त्रादिभ्यःष्ठन्॥ भस्त्रयाहरति भस्त्रिकः॥ षित्वात्भस्त्रिकी॥ विभाषाविवधात्॥ ष्ठन्॥ पक्षेठक्॥ विवधेनहरतिविवधिकः॥ वैवधिकः॥ एकदेशविकृतस्यानन्यत्वाद्वीवधादपि॥ वैवधिकः॥ विवधः॥ वीवधश्चधौ उभयतोबद्धशिक्ये स्कंधवाह्ये काष्ठे वर्त्तेते॥ निर्वृत्तेऽक्षद्यूतादिभ्यः

भातिमुक्

रामः

११

मिश्रितं

अक्षद्यूतेननिर्वृत्तंआक्षद्यूतिकंवैरम्॥संसृष्टे॥दध्नासंसृष्टंदाधिकम्॥चूर्णादिनिः
॥चूर्णिनोऽपूपाः॥त्रेर्मप्नित्यम्॥त्रिप्रत्ययान्तप्रकृतिकात्तृतीयान्तान्निर्वृत्तेर्थेमप्स्या ना२
न्नित्यम्॥कृत्यानिर्वृत्तंकृत्रिमम्॥पक्त्रिमम्॥भावप्रत्ययान्तादिमब्वक्तव्यः॥
पाकेननिर्वृत्तंपाकिमम्॥त्यागिमम्॥अपमित्ययाचिताभ्यांकक्कनौ॥अपमित्ये कु४
ति ल्यबन्तं॥अपमित्यनिर्वृत्तमापमित्यकम्॥याचितेननिर्वृत्तंयाचितकम् न५
॥लवणाल्लुक्॥लवणेनसंसृष्टोलवणः सूपः॥मुद्गादण्॥मौद्गओदनः
॥ओजःसहोम्भसावर्त्तते॥ओजसिकःशूरः॥साहसिकश्चोरः॥अम्भसावर्त्तते
आम्भसिकोमत्स्यः॥उञ्छति॥बदराण्युञ्छतिबादरिकः॥रक्षति॥समाजंर
क्षतिसामाजिकः॥शब्ददर्दुरंकरोति॥शब्दंकरोतिशाब्दिकः॥दार्दुरिकः

पक्षिमत्स्यमृगान्हन्ति॥ स्वरूपस्य पर्यायाणां विशेषाणां च ग्रहणम्॥ मत्स्यपर्या
येषु मीनस्यैव॥ पक्षिणो हन्ति पाक्षिकः॥ शाकुनिकः॥ मायुरिकः॥ मात्सि
कः॥ मैनिकः॥ शाकुलिकः॥ मार्गिकः॥ हारिणिकः॥ सारङ्गिकः॥ धर्मं चरति॥
धार्मिकः॥ अधर्माच्चेति वक्तव्यम्॥ आधर्मिकः॥ तदस्य पण्यम्॥ अपूपाः
पण्यमस्य आपूपिकः॥ लवणाट्ठञ्॥ लावणिकः॥ शिल्पम्॥ मृदङ्गवादनं
शिल्पमस्य मार्दङ्गिकः॥ प्रहरणम्॥ असि प्रहरणमस्य आसिकः॥ धानु
ष्कः॥ शक्तियष्ट्योरीकक्॥ शाक्तीकः॥ याष्टीकः॥ अस्ति नास्ति दिष्टं
मतिः॥ अस्ति परलोकं इत्येवं मतिर्यस्य स आस्तिकः॥ नास्तीति परलोकं म
तिर्यस्य स नास्तिकः॥ दिष्टं मतिर्यस्य स दैष्टिकः॥ शीलम्॥ अपूपभक्ष

श्रीः
२०

णं तच्छीलमस्य आपूपिकः ॥ छत्रादिभ्यो णः ॥ गुरोर्दोषावरणं छत्रम् ॥ तच्छी
लमस्येति छात्रः ॥ तत्र नियुक्तः ॥ आकरे नियुक्त आकरिकः ॥ निकटे वसति ॥
नैकटिको भिक्षुः ॥ ❁ ॥ इति ठगधिकारः ॥ ❁ ॥ प्राग्घिताद्यत् ॥ तस्मै हितमित्यन्व
तः प्राग्यदित्यधिक्रियते ॥ तद्वहति रथयुगप्रासंगम् ॥ रथं वहति रथ्यः ॥ युग्यः
प्रासंग्यः ॥ धुरो यड्ढकौ ॥ धुर्यः ॥ धौरेयः ॥ हलसीराट्ठक् ॥ हलं वहति हालि
कः ॥ सैरिकः ॥ विध्यत्यधनुषा ॥ द्वितीयान्ताद्विध्यतीत्यर्थे यत्न चेत्तत्र धनुः कर
णम् ॥ पादौ विध्यन्ति पद्याः शर्कराः ॥ नौवयोधर्मविषमूलमूलसीतातुला
भ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु ॥ नावा तार्यं नाव्यञ्ज
लम् ॥ वयसा तुल्यो वयस्यः ॥ धर्मेण प्राप्यं धर्म्यम् ॥ विषेण वध्यो विष्यः ॥

मूलेनआनाम्यंमूल्यम्॥ मूलेनसमोमूल्यः॥ सीतयासमितंसीत्यंक्षेत्रम्॥ तुलया
संमितंतुल्यम्॥ तत्रसाधुः॥ सामसुसाधुःसामन्यः॥ अग्र्यः॥ कर्मण्यः॥ शरण्यः॥ स
भायायः॥ सभ्यः॥ ॥इतियतोऽवधिः॥ ॥प्राक्क्रीताच्छः॥ तेनक्रीतमित्यतःछोऽधिक्रि
यते॥ उगवादिभ्योयत्॥ प्राक्क्रीतादित्येव॥ उवर्णान्तात्गवादिभ्योयत्॥ छस्यापवादः॥
नाभिनभंच॥ नभ्योऽक्षः॥ नभ्यमंजनम्॥ रथनाभावेवेदम्॥ शुनःसंप्रसारणंवाचदीर्घत्व
म्॥ शुन्यम्॥ शून्यम्॥ ऊधसोनङ्च॥ ऊधन्यः॥ कंबलाच्चसंज्ञायाम्॥ यत्॥ कंबल्यम्॥ ऊ
र्णापलशतम्॥ संज्ञायांकिम्॥ कंबलीयाऊर्णा॥ विभाषाहविरपूपादिभ्यः॥ आमिक्ष्यं
दधि॥ आमिक्षीयम्॥ पुरोडाश्यास्तण्डुलाः॥ पुरोडाशीयाः॥ अपूप्यम्॥ अपूपीयम्
॥ तस्मैहितम्॥ वत्सेभ्योहितोवत्सीयोगोधुक्॥ शंकव्यंदारु॥ गव्यम्॥ हविष्यम्
॥ शरीरावयवाद्यत्॥ दंत्यम्॥ कण्ठ्यं॥ नस्यम्॥ अजाविभ्यांथ्यन्॥ अजथ्यायूथिः

अविध्या॥आत्मन्विश्वजनभोगोत्तरपदात्खः॥आत्माध्वानौखे॥प्रकृत्यास्तः॥आत्म
नेहितम्॥आत्मनीनम्॥विश्वजनीनम्॥कर्मधारयादेवेष्यते॥अन्यत्रविश्वजनी
यम्॥पंचजनादुपसंख्यानम्॥पंचजनीनम्॥मातृभोगीणः॥आचार्यादणत्वंच॥
आचार्यभोगीनः॥ ॥इतिछयतोपूर्णोवधिः॥ ॥प्राग्वतेष्ठञ्॥तेनतुल्यमित्य
तः प्राग्ठञधिक्रियते॥आर्हादगोपुच्छसंख्यापरिमाणाट्ठक्॥तदर्हतीत्येतदभिव्या
प्यठञधिकारमध्येठञोपवादष्ठगधिक्रियन्तेगोपुच्छादीन्वर्जयित्वा॥असमासेनिष्का
दिभ्यः॥आर्हादित्येतत्तेनक्रीतमितियावदैवर्त्तते॥निष्कादिभ्योऽसमासेठगार्हीये
र्थेषु॥निष्केणक्रीतादिनैष्किकम्॥समासेतुठञ्॥परिमाणान्तस्यासंज्ञाशाणयोः श्रीः
॥उत्तरपदस्यवृद्धिर्ञिदादौ॥परमनैष्किकम्॥नातावठन्यतावस्नते॥शात्यम्॥शति

किम्॥अस्तेकिम्॥संख्यायाअतिशदंतायाःकन्॥आर्हीयेर्थे॥ज्ञातंपरिमाणमस्यज्ञा
तकः॥संघःबहुकः॥स्ततायास्तुसाप्ततिकः॥ज्ञातंतायाः॥चत्वारिंशत्कः॥वतोरिड्वा॥वत्व
तात्कनङ्क्षा॥तावत्कः॥तावतिकः॥कंसादिठन्॥कंसिकः॥अर्धाच्च॥अर्धिकः॥अ
ध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम्॥अध्यर्द्धपूर्वाद्विगोश्चपरस्यार्हीयस्यलुक्॥अध्यर्द्धकंस
म्॥द्विकंसम्॥संज्ञायांतुपांचप[illegible]कम्॥तेनक्रीतम्॥ठञ्॥गोःपुच्छेनक्रीतंगोपु
च्छिकम्॥साप्ततिकम्॥प्रास्थिकम्॥ठक्॥नैष्किकम्॥तस्येश्वरः॥सर्वभूमिपृथि
वीभ्यामणञौ॥स्तः॥अनुशतिकादीनाञ्च॥सर्वभूमेरीश्वरःसार्वभौमः॥पार्थि ड
वः॥तदस्यपरिमाणम्॥प्रस्थंपरिमस्यप्रास्थिकोराशिः॥स्तोमेडविधिः॥पञ्चद श्रीः
शामन्त्र्याःपरिमाणमस्यपञ्चदशाः॥सप्तदशाःसोमयागेषुछन्दोगैःक्रियमाणा २२

पञ्चादिसंज्ञिकास्तुतिः स्तोमः॥पंक्तिविंशतित्रिंशच्चत्वारिंशत्पंचाशत्षष्टीसप्तत्यशीतिनवतिशतम्॥एतेरूढिशब्दा निपात्यन्ते॥तदर्हतीति॥श्वेतछत्रमर्हतीति श्वैतछत्रिकः॥दण्डादिभ्यः॥एभ्यो यत्॥दण्डमर्हतीति दण्ड्यः॥अर्घ्यः॥वध्यः॥तेन निर्वृत्तम्॥अह्ना निर्वृत्तमाह्निकम्॥ ॥इति ठकठञोरवधिः॥ ॥तेन तुल्यं क्रियाचेद्वतिः॥ब्राह्मणेन तुल्यं ब्राह्मणवत् अधीते॥क्रियाचेत्किम्॥गुणतुल्ये मा भूत्॥पुत्रेण तुल्यः स्थूलः॥तत्र तस्येव॥मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः॥चैत्रस्येव चैत्रवत् मैत्रस्य गावः॥तस्य भावस्त्वतलौ॥प्रकृतिजन्यबोधे प्रकारो भावः॥गोर्भावः गोत्वम्॥गोता॥त्वान्तं क्लीबम्॥तलन्तं स्त्रियाम्॥आ च त्वात्॥ब्रह्मणस्त्व इत्यतः प्राक् त्वतलावधिक्रियेते॥अपवादैः सह समावेशार्थमिदम्॥चकारो नञ्स्नञ्भ्यामपि समावेशार्थः॥स्त्रिया भावः स्त्रैणम्

म्॥स्त्रीत्वम्॥स्त्रीता॥पौंस्नम्॥पुंस्त्वम्॥पुंस्ता॥पृथ्वादिभ्यइमनिज्वा॥वावचनम
णादिसमावेशार्थम्॥र-ऋतोहलादेर्लघोः॥इष्ठेमेयःसु॥टेः॥लोपइष्ठेमेयःसु॥पृथुमृ
दुभृशकृशदृढपरिवृढानामेवरत्वम्॥पृथोर्भावःप्रथिमा॥पार्थवम्॥म्रदिमा॥मार्द
वम्॥वर्णदृढादिभ्यःष्यञ्च॥चादिमनिज्॥शौक्ल्यम्॥शुक्लिमा॥दार्ढ्यम्॥द्रढिमा॥गु
णवचनब्राह्मणादिभ्यःकर्मणिच॥चाद्भावेजडस्यभावःकर्मवाजाड्यम्॥मौढ्यम्॥
ब्राह्मण्यम्॥आकृतिगणोयम्॥चातुर्वर्ण्यादीनांस्वार्थउपसंख्यानम्॥चातुर्वर्ण्यं॥
चातुराश्रम्यम्॥त्रैस्वर्यम्॥षाड्गुण्यम्॥सैन्यम्॥सान्निध्यम्॥औपम्यम्॥त्रैलो
क्यम्इत्यादि॥स्तेनाद्यन्नलोपश्च॥नेतिसंघातग्रहणम्॥स्तेनस्यभावःकर्मवास्ते धीः
यम्॥सख्युर्यः॥सख्यः॥कपिज्ञात्योर्ढक्॥कापेयम्॥ज्ञातेयम्॥पत्यन्तपुरोहि २३

न्तादिभ्यो यक्॥ सैनापत्यम्॥ पौरोहित्यम्॥ राजासे॥ राजन्शब्दोऽसमासे यकं लभत इत्य
र्थः॥ राज्ञो भावः कर्म वा राज्यम्॥ समासे तु ब्राह्मणादित्वात्ष्यञ्॥ आधिराज्यम्॥ प्रा
णभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्॥ प्राणभृज्जातिः॥ आश्वम्॥ वयोवचनम्॥ कौ
मारम्॥ औद्गात्रम्॥ औन्नेत्रम्॥ सौष्टुवम्॥ हायनान्तयुवादिभ्योऽण्॥ द्वैहायनम्॥ हो६४१.
यौवनम्॥ स्थाविरम्॥ श्रोत्रियस्य यलोपश्च॥ श्रौत्रम्॥ कुशलनिपुणचपलपि
शुनकुतूहलक्षेत्रज्ञाः॥ युवादिषु ब्राह्मणादिषु पठ्यन्ते॥ कौशल्यम्॥ कौशलमि
त्यादि॥ इगन्ताच्च लघुपूर्वात्॥ शुचेर्भावः कर्म वा शौचम्॥ मौनम्॥ योपधाद्गुरूपो
त्तमाद्वुञ्॥ रामणीयकम्॥ आभिधानीयकम्॥ सहायाद्वा॥ साहाय्यम्॥
साहायकम्॥ द्वन्द्वमनोज्ञादिभ्यश्च॥ शैष्योपाध्यायिका॥ मानोज्ञकम्॥ ॥

इतिनञ्स्नञोरधिकारः॥ ॥धान्यानांभवनेक्षेत्रेखञ्॥मुद्गानांभवनंक्षेत्रंमौद्गीनम्॥व्रीहिशाल्योर्ढक्॥व्रैहेयम्॥शालेयम्॥यवयवकषष्टिकाद्यत्॥यव्यम्॥यवक्यम्॥षष्टिक्यम्॥विभाषातिलमाषोमाभंगाणुभ्यः॥यत्॥पक्षेखञ्॥तिल्यं॥तैलीनम्॥माष्यम्॥माषीणम्॥उम्यम्॥औमीनम्॥भग्यम्॥भागीनम्॥अणव्यम्॥आणवीनम्॥तत्सर्वादेःपथ्यंगकर्मपत्रपात्रंव्याप्नोति॥सर्वादेःपथ्याद्यन्ताद्द्वितीयान्तात्खः॥सर्वपथान्व्याप्नोतिसर्वपथीनः॥सर्वांगीणः॥सर्वकर्मीणः॥सर्वपत्रीणः॥सर्वपात्रीणः॥हैयंगवीनंसंज्ञायाम्॥नवनीतेनिपातोयम्॥तस्यपाकमूलेपील्वादिकर्णादिभ्यः॥कुणब्जाहचौ॥पीलूनांपाकः॥पीलुकुणः॥कर्णस्यमूलंकर्णजाहम्॥पक्षात्तिः॥मूलेइत्यनुवर्त्तते॥पक्षस्यमूलंपक्षतिः॥ते

नवित्तश्चुंचुप्चणपौ॥यकारःप्रत्यययोरादौलुप्तनिर्दिष्टः॥तेनचस्यनेत्वम्॥विद्य
यावित्तोविद्याचुंचुः॥विद्याचणः॥वेःशालच्छंकटचौ॥क्रियाविशिष्टसाधन
वाचकात्स्वार्थे॥विशालम्॥विशंकटम्॥संप्रोदश्चकटच्॥संकट
म्॥प्रकटम्॥उत्कटम्॥चाहिकटम्॥अलाबूतिलोमाभंगाभ्योरजस्युपसं
ख्यानम्॥अलाबूनांरजः॥अलाबूकटम्॥तिलकटम्॥गोष्ठजादयःस्था
नादिषुपशुनामभ्यः॥गवांस्थानंगोष्ठम्॥अश्वगोष्ठम्॥संघातेकटच्॥अ
वीनांसंघातःअविकटः॥विस्तारेपटच्॥अविपटः॥द्वित्वेगोयुगच्॥उष्ट्रो
उष्ट्रगोयुगम्॥षट्त्वेषड्गवत्॥अश्वषड्गवम्॥स्नेहेतैलच्॥तिलतैलम्॥सर्ष

गो

पतैलम्॥अवा कुठारच्च॥चात्कटच्॥अवाचीनः॥अवकुठारः॥अवकटः॥नतेना
सिकायाः संज्ञायांटीटञ्नाटज्भ्रटचः॥अवादित्येव॥नतंनमनम्॥नासिकायानतं
अवटीटम्॥अवनाटम्॥अवभ्रटम्॥नतयोगान्नासिकाअवटीटा॥पुरुषोअवटीटः॥
उपाधिभ्यांत्यकन्नासन्नारूढयोः॥पर्वतस्यासन्नंस्थलंउपत्यका॥आरूढंस्थलं
मधित्यका॥कर्मणिघटोऽठच्॥कर्मणिघटतेकर्मठः॥तदस्यसंजातंतारकादिभ्य
इतच्॥तारकाःसंजाताअस्यतारकितंनभः॥पण्डितः॥आकृतिगणोयम्॥प्रमाणे
द्वयसज्दघ्नञ्मात्रचः॥तदस्येत्यनुवर्त्तते॥ऊरूप्रमाणमस्यऊरुद्घ्नम्॥ऊरुद्वय
सम्॥ऊरुमात्रम्॥प्रथमश्चद्वितीयस्यऊर्ध्वमानेमतोमम॥ऊर्ध्वमानंकिलोन्मानंप
रिमाणंतुसर्वतः॥आयामस्तुप्रमाणंस्यात्संख्याबाह्यातुसर्वतः॥पुरुषहस्ति

भ्यामण्च।।पुरुषप्रमाणमस्यपौरुषम्।।पुरुषद्वयसम्।।यत्तदेतेभ्यःपरिमाणेवतुप्।।
यत्परिमाणमस्ययावान्।।तावान्।।एतावान्।।किमिदंभ्यांवोघः।।आभ्यांवतुप्वस्यच
घः।।इदंकिमोरीश्की।।दृग्दृशवतुषु।।कियान्।।इयान्।।किमःसंख्यापरिमाणेडति
च।।चाद्वतुपस्यघः।।कासंख्यायेषांतेकति।।कियंतः।।संख्यायाअवयवेतयप्।।पं
चअवयवायस्यपंचतयम्।।द्वित्रिभ्यांतयस्यायज्वा।।द्वयम्।।द्वितयम्।।त्रयम्।।त्रि
तयम्।।उभादुदात्तोनित्यम्।।उभयम्।।तदस्मिन्नधिकमितिदशान्ताड्डः।।एका
दशअधिअस्याविंशत्यां।।प्रकृतिप्रत्ययार्थयोःसमानजातित्वएवेष्यते।नेह।
एकादशमाषाअधिकाअस्मिंसुवर्णसतेशदंतविंशतेश्च।।डःस्यादुक्तेर्थे।।
त्रिंशदधिकाअस्मिंत्रिंशंशतम्।।विंशम्।।तस्यपूरणेडट्।।संख्यायाइत्येव

प्र·कौ·

॥एकादशानां पूरण एकादशः॥ नान्तादसंख्यादेर्मट्॥ उटोमडागमः॥ पंचानां पूर
रणः पञ्चमः॥ नान्तात्किम्॥ विंशः॥ असंख्यादेः किम्॥ एकादशः॥ षट्कति
कतिपयचतुरां थुक्॥ डठि॥ षण्णां पूरणः षष्ठः॥ कतिथः॥ कतिपयशब्दस्या
तएव डट्॥ कतिपयथः॥ चतुर्थः॥ चतुरश्छयतावाद्यक्षरलोपश्च॥ तुरीयः॥ तुर्यः॥ व
हुपूगगणसंघस्य तिथुक्॥ उठि॥ बहुतिथः॥ वतोरिथुक्॥ उठि॥ यावतिथः॥
द्वेस्तीयः॥ उटोपवादः॥ द्वयोः पूरणः द्वितीयः॥ त्रेः संप्रसारणं च॥ तृतीयः॥ इ
ह हत्वश्च निर्दीर्घो न॥ द्वितीयतृतीयेति निर्देशात्॥ विंशत्यादिभ्यस्तमडन्य
तरस्याम्॥ उटः॥ विंशतितमः॥ विंशः॥ एकविंशतितमः॥ एकविंशः॥ नि

२६

त्यं शतादिमासार्द्धमाससंवत्सराच्च ॥ शतस्य पूरणः शततमः ॥ मासादेरन्तस्य ब
डट ॥ मासतमः ॥ षष्ठ्यादेश्चाऽसंख्यादेः ॥ षष्ठितमः ॥ संख्यादेस्तु विंशत्यादि
भ्य इति विकल्प एव ॥ एकषष्ठः ॥ एकषष्ठितमः ॥ मतौ छः ॥ सूक्तसाम्नोः
॥ मत्वर्थे छः ॥ अच्छावाकशब्दोस्ति अस्मिन् अच्छावाकीयं सूक्तम् ॥ वारव
न्तीयं साम ॥ श्रोत्रियश्छन्दोधीते ॥ श्रोत्रियः ॥ वेत्त्यनुष्टप्तेः छान्दसः ॥ श्रा
द्धमनेन भुक्तमिनिठनौ ॥ श्राद्धी ॥ श्राद्धिकः ॥ पूर्वादिनिः ॥ पूर्वं कृतमन
नेन पूर्वी ॥ सपूर्वाच्च ॥ कृतपूर्वी ॥ इष्टादिभ्यश्च ॥ इष्टमनेन इष्टी ॥
अधीती ॥ अनुपद्यन्वेष्टा ॥ अनुपदमन्वेष्टा अनुपदी गवाम् ॥ साक्षा

वारन्तशब्दो
स्मिन्साम

वारव

द्रष्टरिसंज्ञायाम्॥साक्षाद्द्रष्टासाक्षी॥तदस्यास्त्यस्मिन्नितिमतुप्॥गावो
स्यास्मिन्वासन्तिगोमान्॥तसौमत्वर्थे॥तांतसांतौभसंज्ञौस्तः मत्वर्थेप्र
त्यये॥संप्रसारणं॥विदुष्मान्॥गुणवचनेभ्योमतुपोलुगिष्टः॥शुक्लो
गुणोस्यास्तिशुक्लःपटः॥कृष्णः॥प्राणिस्थादातोलजन्यतरस्याम्॥चू
डालः॥चूडावान्॥प्राणिस्थात्किम्॥शिखावान्दीपः॥प्राण्यंगादे
व॥नेह॥मेधावान्॥सिध्मादिभ्यश्च॥लज्वा॥सिध्मलः॥सिध्मवा
न्॥वातदन्तबलललाटानामूङ्च॥चाहृच्चा॥वातूलः॥दंतूलः॥ब
लूलः॥ललाटूलः॥वत्सांसाभ्यांकामबले॥लज्वा॥यथासंख्यंका

मवतिवलवतिचार्थेवत्सलः॥अंसलः॥फेनादिलच्च॥चात्इतच्॥अन्यत
रस्यांग्रहणमनुसुच्चयार्थमनुवर्त्तते॥फेनिलः॥फेनलः॥फेनवान्॥
लोमादिपामादिपिछादिभ्यः॥शनेलचः॥लोमादिभ्यःशः॥लोम
शः॥लोमवान्॥रोमशः॥रोमवान्॥पामादिभ्योनः॥पामनः॥अंगा
त्कल्याणे॥अंगना॥लक्ष्याअच्च॥लक्ष्मणः॥पिछादिभ्यइलच्॥पि
छिलः॥पिछवान्॥उरसिलः॥उरस्वान्॥प्रज्ञाश्रद्धार्चाभ्योणः॥प्रा
ज्ञोव्याकरणम्॥प्राज्ञा॥श्राद्धः॥आर्चः॥वृत्तेश्च॥वार्त्तः॥तपसहस्रा
भ्यांविनीनी॥विनीन्योरिकारोनकारपरित्राणार्थः॥तपस्वी॥सह

त्री॥अण्च॥तापसः॥साहस्रः॥ज्योत्स्नादिभ्यउपसंख्यानम्॥ज्यौत्स्नः
॥तामिस्रः॥सिकताशर्कराभ्यांच॥सैकतोघटः॥शार्करः॥देशेलुबिल
चौच॥चादण्॥मतुप्च॥सिकताःसन्तिअस्मिन्देशेसिकताः॥सिक
तिलः॥सैकतः॥सिकतावान्॥एवंशर्कराइत्यादि॥दन्तउन्नतउर
च्॥उन्नतादन्ताअस्यदन्तुरः॥ऊषसुषिमुष्कमधोरः॥ऊषरः॥सु
षिरः॥मुष्करः॥मधुरः॥रप्रकरणेखमुख[illegible]कुंजे
भ्यउपसंख्यानम्॥खरः॥मुखरः॥कुंजोहस्तिहनुः॥कुंजरः॥न
गपांसुपाण्डुभ्यश्च॥नगरम्॥पांसुरः॥पाण्डुरः॥कच्छ्वाह्रस्वत्वंच॥

कछुरः॥द्युद्रुभ्यांमः॥द्युमः॥द्रुमः॥केशाद्वोन्यतरस्याम्॥प्रकृतेनान्यतरस्यां
ग्रहणेनमतुपिसिद्धेपुनर्ग्रहणमिनिठनोःसमावेशार्थम्॥केशवः॥केशी
॥केशिकः॥केशवान्॥अन्येभ्योपिदृश्यते॥मणिवः॥नागविशेषः॥हि
रण्यवोनिधिविशेषः॥अर्णसोलोपश्च॥अर्णवः॥गांड्यजगात्संज्ञा
याम्॥ह्रस्वदीर्घयोर्यणातन्त्रेणनिर्देशः॥गाण्डीवम्॥गाण्डिवम्॥
अजगवंपिनाकः॥काण्डाण्डादीरन्नीरचौ॥काण्डीरः॥आण्डीरः॥र
जःकृष्यासुतिपरिषदोवलच्॥रजस्वला॥कृषीवलः॥वलचीतिदी
र्घः॥आसुतीवलः॥परिषद्वलः॥पर्षदितिपाठान्तरम्॥पर्षद्वलः॥अ

म.कौ.त. न्येभ्योपि दृश्यते ॥ भ्रातृवलः ॥ पुत्रवलः ॥ त्राभुवलः ॥ दन्तशिखायाम् ॥ दन्तावलो
हस्ती ॥ शिखावलः ॥ केकी ॥ अतइनिठनौ ॥ दण्डी ॥ दण्डिकः ॥ व्रीह्यादिभ्यश्च
॥ व्रीही ॥ व्रीहिकः ॥ तुन्दादिभ्य इलच्च ॥ चादिनिठनौ ॥ मतुपच ॥ तुन्दिलः ॥ तु
न्दी ॥ तुन्दिकः ॥ तुन्दवान् ॥ रूपादाहतप्रशंसयोर्यप् ॥ आहतं रूपमस्या १
स्तीति रूप्यः ॥ कार्षापणः ॥ प्रशस्तं रूपमस्यास्तीति रूप्यो गौः ॥ अन्येभ्यो
पि दृश्यते ॥ हिम्याः पर्वताः ॥ गुण्या ब्राह्मणाः ॥ अस्मायामेधास्रजो विनिः
॥ यसस्वी ॥ यशस्वान् ॥ मायावी ॥ व्रीह्यादिपाठात् मायी मायिकः ॥ स्रग् दुर्गे
वी ॥ शृङ्गवृन्दाभ्यामारकन् ॥ शृंगारकः ॥ वृन्दारकः ॥ फलवर्हाभ्या २९

शीतंनसह

मिनच्॥फलिनः॥वर्हिणः॥हृदयाच्चालुरन्यतरस्याम्॥हृदयालुः॥हृदयी॥हृ
दयिकः॥हृदयवान्॥शीतोष्णतृप्रेभ्यस्तदसहने॥शीतालुः॥उष्णालुः॥
तृप्रः॥पुरोडाशः॥तन्नसहतेतृप्रालुः॥तप्पर्वमरुद्भ्याम्॥पर्वतः॥मरुत्तः॥
उर्णायायुस॥उर्णायुः॥वाचोग्मिनिः॥वाग्मी॥आलजाटचौ बहुभाषिणि॥
वाचइत्येव॥कुत्सितइतिवक्तव्यम्॥कुत्सितंवहुभाषतेवाचालोवाचाटः॥
यस्तुसम्यग्वहुवदतीत्यत्रवाग्मीत्येव॥स्वामिन्नैश्वर्ये॥ऐश्वर्यवाचकात्
स्वशब्दान्मत्वर्थेआमिनिच्॥स्वामी॥अर्शआदिभ्योऽच्॥अर्शांस्यस्य
विद्यंतेऽर्शसः॥आकृतिगणोयम्॥वातातीसाराभ्यांकुक्॥वातकिनः

म·कौ·त·

॥वातकी॥अतिसारकी॥पिशाचाच्च॥पिशाचकी॥हस्ताज्जातौ॥हस्ती॥वर्णाद्
ब्रह्मचारिणि॥वर्णी॥कंशंभ्यां बभयुस्तितुतयसः॥कमित्युदकसुखयोः
शमिति सुखे॥आभ्यां सप्त प्रत्ययाः स्युः॥युस्यसोः सकारः पदत्वार्थः॥कम्बः॥
कम्भः॥कंयुः॥कन्तिः॥कन्तुः॥कन्तः॥कंयः॥एवं शंव इत्यादि॥तुन्दिबलि
वटेर्भः॥तुन्दिभः॥बलिभः॥वटिभः॥अहंशुभमोर्युस्॥अहंयुः॥अहङ्कारवान्॥
शुभंयुः॥शुभान्वितः॥ ॥इति मत्वर्थीयाः॥ ॥प्राग्दिशो विभक्तिः॥दिक्शब्दे
भ्य इत्यतः प्राक् वक्ष्यमाणाः प्रत्यया विभक्तिसंज्ञाः स्युः॥अथ स्वार्थिकाः॥ दुर्गो
किंसर्वनामबहुभ्योऽद्व्यादिभ्यः॥किमः सर्वनाम्नो बहुशब्दाच्चेति प्राग्दि ३०

ग्रोऽधिक्रियते॥पञ्चम्यास्तसिल्॥पंचम्यन्तेभ्यः किमादिभ्यस्तसिल् स्या
द्॥कु तिहोः॥किमः कुः स्यात्तादौ हादौ च विभक्तौ॥कुतः॥कस्मात्॥इ
दम इश्॥प्राग्दिशीये॥इतः॥अन्॥एतदः प्राग्दिशीये॥अनेकाल्
त्वात्सर्वादेशः॥अतः॥अमुतः॥यतः॥ततः॥बहुतः॥द्व्यादेस्तु॥द्वाभ्यां॥
पर्यभिभ्यां च॥तसिल्॥परितः॥सर्वत इत्यर्थः॥अभितः॥उभयतः॥
इत्यर्थः॥सप्तम्यास्त्रल्॥सप्तम्यन्तेभ्यः किमादिभ्यस्त्रल् स्यात्॥कु
त्रः॥यत्रः॥तत्र॥बहुत्रः॥इदमो हः॥त्रलोऽपवादः॥इह॥किमोऽत्॥वा
स्यात्॥क्वाति॥किमः॥क्व॥कुत्र॥इतराभ्योऽपि दृश्यन्ते॥पंचमीसप्त

मीतरविभक्त्यन्तादपितसिलादयोदृश्यन्ते॥दृशिग्रहणाद्भवदादियो
गेएव॥सभवान्॥ततोभवान्॥तत्रभवान्॥तंभवंतम्॥ततोभवंतम्॥
एवंदीर्घायुः॥देवानांप्रियः॥आयुष्मान्॥सर्वैकान्यकिंयत्तदःकाले
दा॥सप्तम्यन्तेभ्यएभ्यःकालार्थेदास्यात्॥सर्वस्यसोन्यतरस्यांदि॥दा
दौप्राग्दिशीयेसर्वस्यसोवा॥सर्वस्मिन्कालेसर्वदा॥सदा॥एकदा॥अ
न्यदा॥कदा॥कालेकिम्॥सर्वत्र॥देशे॥इदमोर्हिल्॥सप्तम्यन्ता
त्॥एतेतौरथोः॥इदमएतइतएतौस्तःरेफादौथकारादौचप्राग्दिशी
येपरे॥अस्मिन्कालेएतर्हि॥कालेकिम्॥इहदेशे॥अधुना॥इ

दुर्गे·

दमोनिपातोयम्॥दानींच॥इदमोदानीम्प्रत्ययःकाले॥इदानीम्॥तदोदाच॥तदानी
म्॥अनद्यतनेर्हिलन्यतरस्याम्॥कर्हि॥कदा॥यर्हि॥यदा॥तर्हि॥तदा॥एतदः॥
एतदइतएतौस्तः॥[illegible]रुादौथकारादौचप्राग्दिशीये॥एतस्मिन्कालेएतर्हि॥सद्यःपरुत्
परार्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरवरेद्युरुभयेद्युरुत्तरेद्युः॥एतेनिपा
त्यन्ते॥द्युश्चोभयाद्वक्तव्यः॥[illegible]उभयद्युः॥प्रकारवचनेथाल्॥प्रकारवृत्तिभ्यःकिमा
दिभ्यःथाल्॥तेनप्रकारेणतथा॥इदमस्थमुः॥इत्थम्॥किमश्च॥कथम्॥ ॥
इतिप्राग्दिशीयाः॥ ॥दिक्शब्देभ्यःसप्तमीपञ्चमीप्रथमाभ्योदिग्देशकालेष्वस्
स्तातिः॥सप्तम्याद्यन्तेभ्योदिशिरूढेभ्योदिग्देशकालवृत्तिभ्यःस्वार्थेऽस्तातिः॥
पूर्वाधरावराणामसिपुरधवश्चैषाम्॥एभ्योऽस्तात्यर्थेऽसिस्तद्योगेचैषांपुर

अध्अव्इत्यादेशाःस्युः॥अस्ताति च॥पूर्वादीनां पुरादयः स्युः॥पूर्वस्यां पूर्वस्याः पूर्वा
वा दिक्॥पुरः॥पुरस्तात्॥अधः॥अवस्तात्॥अवः॥विभाषावरस्य॥अस्तातौ अवः॥
अवस्तात्॥अवरस्तात्॥एवं देशे काले च॥दिक्शब्देभ्यः किम्॥ऐन्द्र्यां वसति॥स
प्तम्याद्यन्तेभ्यः किम्॥पूर्वं ग्रामं गतः॥दिगादिवृत्तिभ्यः किम्॥पूर्वस्मिन् गुरौ व
सति॥अस्ताति चेति ज्ञापकादसिरस्तातिं नवाधते॥दक्षिणोत्तराभ्यामतसुच्॥अस्ता
तेरपवादः॥दक्षिणतः॥उत्तरतः॥विभाषापरावराभ्याम्॥परतः॥परस्तात्॥
अवरः॥अवरस्तात्॥अञ्चेर्लुक्॥अञ्चत्यन्तादिक्शब्दादस्तातेर्लुक्॥प्राक्॥
उदक्॥उपर्युपरिष्टात्॥निपातावेतौ॥पश्चात्॥तथा॥उत्तराधरदक्षिणादातिः॥
॥उत्तरात्॥अधरात्॥दक्षिणात्॥एनवन्यतरस्यामदूरेऽपंचम्याः॥उत्तरेण

एनबास्यात्॥अवध्यवधिमतोःसामीप्येपंचम्यन्तान्तुन्॥उत्तरेण॥अधरेण॥दक्षिणे
न॥पक्षेयथास्वंप्रत्ययाः॥इहकेचिद्दिक्शब्दमात्रादेनपमाहुः॥पूर्वेणग्रामम्॥द
क्षिणादाच्॥अस्तातेर्विषये॥दक्षिणावसति॥अपञ्चम्याइत्येव॥दक्षिणादागतः॥
आहिचदूरे॥दक्षिणात्॥वादाच्॥दक्षिणाहि॥दक्षिणा॥उत्तराच्च॥उत्तराहि॥
उत्तरा॥संख्यायाविधार्थेधा॥क्रियाप्रकारेवर्त्तमानात्संख्यावाचकात्स्वार्थेधा
स्यात्॥चतुर्धा॥एकाद्धोध्यमुञन्यतरस्याम्॥ऐकध्यम्॥एकधा॥द्वित्र्योश्चधमु
ञ्॥आभ्यांधाइत्यस्यधमुञ्वा॥द्वैधम्॥द्विधा॥त्रैधम्॥त्रिधा॥एधाच्च॥द्वेधा॥
त्रेधा॥याप्येपाशप्॥कुत्सितोभिषक्॥भिषक्पाशः॥तीयादीकक्स्वार्थे
वावाच्यः॥द्वैतीयीकः॥द्वितीयः॥नविद्यायाः॥द्वितीयाविद्याइत्येव॥एका

दाकिनिच्चासहाये॥ चात्कन्लुकौ॥ एकः॥ एकाकी॥ एककः॥ भूतपूर्वेचरट्
॥आढ्यो भूतपूर्वः आढ्यचरः॥ षष्ठ्या रूप्य च॥ षष्ठ्यन्ताद्भूतपूर्वेर्थे रूप्यः स्याच्चरट्
च॥ कृष्णस्य भूतपूर्वो गौः॥ कृष्णरूप्यः॥ कृष्णचरः॥ अतिशायने तमबिष्ठनौ
॥अतिशायनविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः॥ अयमेषामतिशयेन आढ्यः आ
ढ्यतमः॥ लघुतमो लघिष्ठः॥ तिङश्च॥ तिङन्तादतिशये द्योत्ये तमप् स्यात्॥
तरप्तमपौ घः॥ किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे॥ किमएत्तदन्तात्तिङो
व्ययाच्च यो घस्तदन्तादामुः स्यान्न द्रव्यप्रकर्षे॥ किन्तमाम्॥ प्राह्णेतमाम्॥
प्रगेतमाम्॥ पचतितमाम्॥ उच्चैस्तमाम्॥ द्रव्यप्रकर्षे तु॥ उच्चैस्तमस्तरुः॥ द्वि
वचनविभज्योपपदे तरबीयसुनौ॥ द्वयोरेकस्यातिशये विभक्तव्ये चोपप

रामः
३३

देसुप्तिङन्तादेतौस्तः॥पूर्वयोरपवादः॥अयमनयोरतिशयेन लघुः[illegible]लघुतरो लघीः
यान्॥उदीच्याःप्राच्येभ्यः[illegible]पटुतराः॥पटीयांसः॥अजादीगुणवचनादेव॥इष्ठन्नी
यसुनौ॥नेह॥पाचकतरः॥पाचकतमः॥प्रशस्यस्यश्रः॥इष्ठेयसोःपरतः॥प्र
कृत्यैकाच्॥इष्ठादावेकाच्प्रकृत्यास्यात्॥श्रेष्ठः॥श्रेयान्॥ज्य च॥प्रश[illegible]स्यस्य
ज्यादेशःइष्ठेयसोः॥ज्येष्ठः॥ज्यादादीयसः॥आदेःपरस्य॥ज्यायान्॥वृद्धस्य च
॥ज्यादेशःअजाद्योः॥ज्येष्ठः॥ज्यायान्॥अन्तिकबाढयोर्नेदसाधौ॥अजाद्योः॥नेदि
ष्ठः॥नेदीयान्॥साधिष्ठः॥साधीयान्॥स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणांयणादि
परंपूर्वस्यचगुणः॥एषांयणादिपरंलुप्यतेपूर्वस्यचगुणइष्ठादिषु॥स्थविष्ठः
॥दविष्ठः॥यविष्ठः॥ह्रसिष्ठः॥क्षेपिष्ठः॥क्षोदिष्ठः॥एवमीयसुन्॥ह्रस्वक्षिप्र

गुणवचना
देवसूः२

क्षुद्राणां पृथ्वादित्वाद्ध्रसिमा॥ क्षेपिमा॥ क्षोदिमा॥ प्रियस्थिरस्फिरोरुवहुलगुरु
वृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्वंहिगर्वर्षित्रप्द्राघिवृन्दाः॥ प्रियादीनां
प्रादयः स्युः॥ इष्ठादिषु॥ प्रेष्ठः॥ स्थेष्ठः॥ स्फेष्ठः॥ वरिष्ठः॥ वंहिष्ठः॥ गरिष्ठः॥ वर्षि
ष्ठः॥ त्रपिष्ठः॥ द्राघिष्ठः॥ वृन्दिष्ठः॥ एवमीयसुनि॥ प्रियोरुवहुलगुरुदीर्घाणां पृ
थ्वादित्वात् प्रेमेत्यादि॥ वहोर्लोपो भू च वहोः॥ वहोः परयोरिमेयसोर्लोपः स्याद्व
होश्च भूरादेशः॥ भूमा॥ भूयान्॥ इष्ठस्य यिट् च॥ वहोः परस्य इष्ठस्य लोपः यिडा
गमश्च॥ भूयिष्ठः॥ विन्मतोर्लुक्॥ इष्ठेयसोः॥ अतिशयेन स्रग्वी स्रजिष्ठः॥ स्र
जीयान्॥ अतिशयेन त्वग्वान् त्वचिष्ठः॥ त्वचीयान्॥ प्रशंसायां रूपप्॥ सुव
न्तात्तिङन्ताच्च॥ प्रशस्तः पटुः पटुरूपः॥ पचतिरूपम्॥ ईषदसमाप्तौ कल्प

प[illegible]देशीयरः॥इषदूनोविद्वान्॥विद्वत्कल्पः॥विद्वद्देश्यः॥विद्वद्देशीयः॥पचतिकल्पम्॥प्रा
गिवात्कः॥इवेप्रतिकृतावित्यतःप्राक्काधिकारः॥अव्ययसर्वनाम्नामकच्प्राक्टेः॥का
पवादः॥तिङश्चेत्यनुवर्त्तते॥कस्यचदः॥कान्ताव्ययस्यदादेशोऽकच्च॥अज्ञाते॥कस्यायम
श्वोऽश्वकः॥उच्चकैः॥नीचकैः॥सर्वकैः॥पचतकि॥धकित्॥कुत्सिते॥कुत्सितोऽश्वोऽश्व
कः॥अल्पे॥अल्पंतैलंतैलकम्॥ह्रस्वे॥ह्रस्वोवृक्षोवृक्षकः॥अस्मिन्प्रकरणेऽजा
दौप्रत्ययेद्वितीयादचःपरस्यलोपोवावाच्यः॥देवदत्तकः॥देवकः॥लोपःपूर्वपदस्य
च॥दत्तकः॥विनापिप्रत्ययंपूर्वोत्तरपदयोर्लोपोवावाच्यः॥सत्यभामा॥भामा॥स
त्या॥कुटीशमीशुण्डाभ्योरः॥ह्रस्वाकुटीकुटीरः॥शमीरः॥शुण्डारः॥कुत्वाडुपच्॥ह्र
स्वाकुतूःकुतुपः॥कुतूःचर्मस्नेहपात्रंह्रस्वासाकुतुपः॥डमान्॥कासूगोणीभ्यांष्टु
रच्॥आयुधविशेषःकासूःह्रस्वासाकासूतरी॥वत्सोक्षाश्वर्षभेभ्यश्चतनुत्वे॥वत्स

तरः॥उक्षतरः॥अश्वतरः॥ऋषभतरः॥किंयत्तदोनिर्धारणेद्वयोरेकस्यडतरच्॥अन
योःकतरोवैष्णवः॥यतरः॥ततरः॥वाबहूनांजातिपरिप्रश्नेडतमच्॥जातिपरिप्रश्ने
तिप्रत्याख्यातमाकरे॥कतमोभवतांकठः॥यतमः॥ततमः॥वाग्रहणमकजर्थम्॥
एकाच्चप्राचाम्॥डतरच्डतमच्चस्यात्॥अनयोरेकतरोमैत्रः॥एषामेकतमः॥
॥ ॥इतिप्रागिवीयाः॥इवेप्रतिकृतौ॥कन्स्यात्॥अश्वइवप्रतिकृतिअश्वकः॥शा
खादिभ्योयत्॥शाखेवशाख्यः॥मुख्यः॥जघन्यः॥अग्र्यः॥शरण्यः॥कुशाग्रा
च्छः॥कुशाग्रीयः॥तत्प्रकृतवचनेमयट्॥प्राचुर्येणप्रस्तुतम्प्रकृतंतस्यवचनं
प्रतिपादनम्॥भावेअधिकरणेवाल्युट्॥आद्ये॥प्रकृतमन्नंअन्नमयम्॥अ
पूपमयम्॥द्वितीये॥अन्नमयोयज्ञः॥अपूपमयंपर्व॥संख्यायाःक्रिया

भ्यावृत्तिगणने कृत्वसुच्॥अभ्यावृत्तिर्जन्म॥ क्रियाजन्मगणनवृत्तेः संख्यायाः स्वार्थे कृत्वसुच्॥ पंचकृत्वो भुंक्ते॥संख्यायाः किं॥भूरिवारान्भुंक्ते॥द्वित्रिचतुर्भ्यः सुच्॥कृत्वसुचोपवादः॥द्विर्भुंक्ते॥त्रिर्भुंक्ते॥रात्सस्य॥चतुः॥एकस्य सकृच्च॥एकशब्दस्य सकृदादेशः चात्सुच्॥सकृद्भुंक्ते॥देवतान्तात्तादर्थ्ये यत्॥तदर्थ एव तादर्थ्यम्॥अत एव स्वार्थे ष्यञ्॥अग्नि देवतायै इदं अग्निदेवत्यम्॥पितृदेवत्यम्॥पादार्घाभ्यां च॥पादार्थमुदकं पाद्यम्॥अर्घ्यम्॥अतिथेर्ञ्यः॥अतिथय इदं आतिथ्यम्॥नवस्य नू आदेशः त्नप् तनप् खाश्च वाच्याः॥स्वार्थे नूत्नम्॥नूतनम्॥नवीनम्॥भागरूपनामभ्यो धेयः॥भागधेयम्॥रूपधेयम्॥नामधेयम्॥आग्नीध्रं साधारणम्॥देवात्तल्॥देव एव देवता॥अवेः कः॥अविरेव अविकः॥यावादिभ्यः कन्॥याव एव यावकः॥मणिकः॥सर्वप्रातिपदिकेभ्यः स्वार्थे कन्॥वहुतरकम्॥मृदस्तिकन्॥मृदेव मृत्तिका॥सस्नौ प्रशंसायाम्॥

आग्नीसाधारणादञ्

रूपोपवादः ॥प्रशस्तामृन्मृत्स्ना ॥मृत्सा ॥प्रज्ञादिभ्यश्च ॥अण्स्यात् ॥प्रज्ञएवप्राज्ञः ॥
दैवतः ॥बान्धवः ॥पूगाञ्ञ्योऽग्रामणीपूर्वात् ॥स्वार्थे ॥नानाजातीया ॥अनियतवृत्तयोर्थका
मप्रधानाः संघाः पूगाः ॥लौहितध्वज्यः ॥ञ्यादयस्तद्राजाः ॥तद्राजस्येति लुक् ॥लोहितध्व
जाः ॥व्रातेनेतिञ्यः ॥कापोतपाक्यः ॥कापोतपाकाः ॥कौञ्जायन्यः ॥ब्राध्नायन्यः ॥इत्यादि ॥
बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् ॥बहूनि ददाति बहुशः ॥अल्पशः ॥बह्वल्पार्थान्
मङ्गलामंगलवचनम् ॥नेह ॥बहूनि ददाति अनिष्टेषु ॥अल्पमाभ्युदयिकेषु ॥संख्यैक
वचनाच्च वीप्सायाम् ॥द्वौ द्वौ ददाति द्विशः ॥माषं माषं माषशः ॥प्रस्थशः ॥परिमाण
शब्दाद्वृत्तावेकार्थाश्च ॥संख्यैकवचनात्किम् ॥घटं घटं ददाति ॥वीप्सायां किं ॥द्वौ द
दाति ॥कारकादित्येव ॥द्वयोर्द्वयोः स्वामी ॥प्रतियोगे पंचम्यास्तसिः ॥प्रतिना कर्मप्रवच

भा

राम:
३८

नीयेनयोगेयापंचमीविहितानन्दन्तात्तसिः॥प्रद्युम्नः कृष्णतः प्रति॥आद्यादिभ्यस्तसेरुपसंख्या
नम्॥आदौ आदितः॥मध्यतः॥पृष्ठतः॥पार्श्वतः॥आकृतिगणोयम्॥स्वरेण स्वरतः॥व
र्णतः॥कृभ्वस्तियोगे संपद्यकर्त्तरि च्विः॥अभूततद्भावइतिवक्तव्यम्॥विकारात्मतांप्राप्नुव
त्यांप्रकृतौवर्त्तमानाद्विकारशब्दात्स्वार्थेच्विर्वास्यात्करोत्यादिभिर्योगे॥अस्यच्वौ॥ईत्॥
अकृष्णः कृष्णः संपद्यते तं करोति कृष्णीकरोति॥ब्रह्मीभवति॥गंगीस्यात्॥अव्ययस्य
च्वावीत्वंनेतिवाच्यम्॥दोषाभूतमहः॥दिवाभूतारात्रिः॥क्यच्व्योश्च॥हलःपरस्यअप
त्ययस्यलोपः क्ये च्वौ च परे॥गार्गीभवति॥च्वौ च॥दीर्घः॥शुचीभवति॥पटूस्यात्॥अ
रुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च॥वा च्विः॥अरूकरोति॥उन्मनीकरोति॥उच्चक्षू
करोति॥विचेतीकरोति॥विरहीकरोति॥विरजीकरोति॥विभाषा साति कार्त्स्न्ये॥च्वि

विभुयेसातिर्वास्यात्साकृत्स्न्ये॥सात्पदाद्योः॥कृत्स्नंशस्त्रमग्निःसंपद्यते अग्निसाद्भवति
अग्नीभवति॥कात्स्न्ये किम्॥एकदेशेनशुक्लीभवतिपटः॥अभिविधौसंपदाच॥
संपदा च कृभ्वस्तिभिर्योगेसातिर्वा व्याप्तौ॥पक्षेकृभ्वस्तियोगेच्विः॥संपदानुवा
क्यमेव॥अग्निसात्संपद्यते अग्निसाद्भवतिशस्त्रम्॥अग्नीभवति॥जलसाद्भव
संपद्यते तिजलीभवतिलवणम्॥तदधीनवचने॥सातिःकृभ्वस्तिभिःसंपदाचयोगे॥
राजसात्करोति॥राजाधीनमित्यर्थः॥देयेत्राच॥तदधीनेदेयेत्रास्यात्सातिश्चका
दियोगे॥विप्राधीनंदेयंकरोति विप्रत्राकरोति॥विप्रत्रासंपद्यते॥पक्षेविप्रसात्
करोति॥देयेकिम्॥राजसाद्भवतिराष्ट्रम्॥देवमनुष्यपुरुषपुरुमर्त्येभ्योद्वितीया राम:
सप्तम्योर्बहुलम्॥एभ्योद्वितीयान्तेभ्यःसप्तम्यन्तेभ्यश्चत्रास्यात्॥देवत्रावन्दे॥रमे ३७

वा ॥ वहुलोक्तेरन्यत्रापि ॥ वहुगाजीवति मनः ॥ अव्यक्तानुकरणाद्द्व्यजवरार्द्धादनितौ डाच् ॥
द्व्यजवरैर्न्यूनं ननु ततो न्यूनम् ॥ अनेकाजिति यावत् ॥ नाह्रशामर्द्धं यस्य तस्माड्डाच्कृभ्वस्तिभि
र्योगे ॥ डाचि वहुलं द्वे भवतः ॥ डाचि विवक्षिते द्वित्वम् ॥ नित्यमाम्रेडिते डाचीति वक्तव्यम् ॥
डाच्परं यदाम्रेडितं तस्मिन्परे पूर्वपरयोर्वर्णयोः पररूपं स्यात् ॥ इति तपयोः पः ॥ पटपटाक
रोति ॥ अव्यक्तानुकरणात्किम् ॥ दृषत्करोति ॥ द्व्यजवरार्द्धात्किम् ॥ श्रत्करोति ॥ अव
रेति किम् ॥ खरटखरटाकरोति ॥ अनितौ किम् ॥ पटिति करोति ॥ कृञो द्वितीयतृती
यशंववीजात्कृषौ ॥ द्वितीयादिभ्यो डाच् कृञस्य योगे कर्षणेऽर्थे ॥ वहुलोक्तेरव्यक्ता
नुकरणादन्यस्य डाचि न द्वित्वम् ॥ द्वितीयं तृतीयं कर्षणं करोति द्वितीयाकरोति ॥ तृ
तीयाकरोति ॥ शंवाकरोति ॥ वीजाकरोति ॥ संख्यायाश्च गुणान्तायाः ॥ द्विगुणाक

कर्षणेऽर्थे

अव्यक्तानुकरणस्यात इतौ · ध्वनेरनुकरणस्य योऽद्
द्स्तस्मादितौ परे पररूपमेकादेशः स्यात् पटत्इति = ४

रोतिक्षेत्रम्॥समयाच्चयापनायाम्॥कृषावितिनिष्टृत्तम्॥समयाकरोति॥कालंयाप
तीत्यर्थः॥सपत्रनिष्पत्रादतिव्यथने॥सपत्राकरोतिमृगम्॥सपुंखशरप्रवेशनेनसपत्रं
करोतीत्यर्थः॥निष्पत्राकरोति॥सपुंखस्यशरस्यापरपार्श्वेनिर्गमान्निष्पत्रंकरोती
त्यर्थः॥अतिव्यथनेकिम्॥सपत्रंनिष्पत्रंकरोतिभूतलम्॥निष्कुलान्निष्कोषणे॥
निष्कुलाकरोतिदाडिमम्॥निर्गतंकुलमंतरवयवानांसमूहोयस्मादितिवहुव्रीहिःडा
च्॥सुखप्रियादानुलोम्ये॥सुखाकरोति॥प्रियाकरोतिगुरुम्॥अनुकूलाचरणे
नानन्दयतीत्यर्थः॥दुःखात्प्रातिलोम्ये॥दुःखाकरोतिस्वामिनम्॥पीडयतीत्य
र्थः॥शूलात्पाके॥शूलाकरोति॥शूलेनपचतीत्यर्थः॥सत्यादशपथे॥सत्याकरो
तिभांडंवणिक्॥केतव्यमिति॥तथ्यंकरोतिइत्यर्थः॥शपथेतुसत्यंकरोतिवि

पुत्रः॥मद्रात्परिवापणे॥मद्रशब्दोमङ्गलार्थः॥परिवापणंमुण्डनम्॥मद्राकरोत्तिकुमा
रः॥माङ्गल्यमुण्डनेनसंस्करोतीत्यर्थः॥भद्राच्चेतिवक्तव्यम्॥भद्राकरोत्ति॥अर्थःप्रा
ग्वत्॥परिवापणेकिम्॥मद्रंकरोत्ति॥भद्रंकरोत्ति॥ * ॥इतितद्धितप्रक्रिया॥ * ॥
सर्वस्यद्वे॥इत्यधिकृत्य॥परिर्वर्जने॥परिपरिवंगेभ्योवृष्टोदेवः॥उपर्यध्यधसःसा
मीप्ये॥उपर्युपरिग्रामम्॥ग्रामस्योपरिष्टात्॥समीपेदेशइत्यर्थः॥अध्यधिसुख
म्॥सुखस्योपरिष्टात्समीपकालेदुःखमित्यर्थः॥अधोधोलोकम्॥लोकस्याध
स्तात्समीपदेशइत्यर्थः॥वाक्यादेरामंत्रितस्यासूयासंमतिकोपकुत्सनभर्त्सने
षु॥सुन्दरसुन्दरवृथातेसौंदर्यम्॥देवदेववंद्योसि॥दुर्विनीतदुर्विनीतइदानींज्ञा
स्यसि॥धानुष्कधानुष्कवृथातेधनुः॥चोरचोरघातयिष्यामित्वाम्॥एकंबहुव्री

विरहात्पीड्यमानस्येयमतिः२

हिवत्॥द्विरुक्तएकशब्दोवहुव्रीहिवत्॥तेनसुब्लोपपुंवद्भावौ॥एकैकमक्षरम्॥एकै
कया आहुत्या॥आवाधेच॥पीडायांद्वेस्तोवहुव्रीहिवच्च॥गतंगतः॥गतगता॥प्रका
रेगुणवचनस्य॥सादृश्येद्योत्येगुणवचनस्यद्वेस्तस्तच्चकर्मधारयवत्॥पटुपट्वीप
टुपटुः॥पटुशब्दादीषत्पटुरितियावत्॥आनुपूर्व्येद्वेवाच्ये॥मूलेमूलेस्थूलः॥संभ्र
मेणप्रवृत्तौयथेष्टमनेकधाप्रयोगोन्यायसिद्धः॥सर्पः२वुध्यस्व२सर्पः३वुध्य
स्व३कर्मव्यतिहारेसर्वनाम्नोद्वेवाच्ये॥समासवच्चवहुलम्॥वहुलग्रहणाद
न्यपरयोर्नसमासवत्॥इतरशब्दस्यतुनित्यम्॥असमासवद्भावेपूर्वपदस्थ
स्यसुपःसुर्वक्तव्यः॥अन्योन्यंविप्रानमंति॥अन्योन्यौ॥अन्योन्येनकृतम्॥ श्रीः
अन्योन्यस्मैदत्तमित्यादि॥स्त्रीनपुंसकयोरुत्तरपदस्थायाविभक्तेराभावोवा ३९

वाच्यः॥अन्योन्याम्।अन्योन्यम्।परस्पराम्।परस्परम्॥इतरेतराम्॥इतरेतरम्।वाइमे
ब्राह्मणाःकुलेवाभोजत्तः॥द्वन्द्वयेटावभावः॥क्लीबेवाद्विरहुःस्यमोः॥समासेसार
ल्लुकचेतिसिद्धमवाहुलकात्त्रयम्।अन्योन्यमित्यादौद्वन्द्वयेटाप्॥अइतरेतिपदद्वय
प्रः॥अन्योन्यसंसक्तमहस्त्रियामम्॥अन्योन्याश्रयः॥परस्पराक्षिसादृश्यम्॥अठ
ष्टपरस्परैरित्यादौसोर्लुक्वाप्राप्तः॥सर्वंबाहुलकात्समाधेयम्॥ ॥इतिद्विरुक्ति
प्रक्रिया॥✱॥○॥✱॥सम्वत्१९२६माघवदि१२रोज६शुभम्॥0॥जयशारदे॥

टाप्स्त्रीतिनिर्देशात्करणसामर्थ्याच्च अजादिर्विषान्तेऽजाद्यत इत्यर्थो न भवति किंतु अजा आदिर्येषां तेऽजादय इत्येव·
अजादिभिःस्त्रीत्वस्याविशेषणात् इष्यामः· स्त्रियामितिभावप्रधानोनिर्देशःस्त्रीत्वेद्योत्येइत्यर्थः१

म·कौ·स्त्री·

श्रीगणेशाय नमः॥ ॥स्त्रियाम्॥अधिकारोयंसमर्थानामितियावत्॥अजा
द्यतष्टाप्॥अजादीनामदन्तस्यवाच्यंयत्स्त्रीत्वंतत्रद्योत्येटाप्स्यात्॥अजा॥अ
जादिभिःस्त्रीत्वस्याविशेषणान्नेह॥पञ्चाजी॥अत्रहिसमासार्थसमाहार
निष्ठंस्त्रीत्वम्॥अतः॥खट्वा॥अजा॥एडका॥अश्वा॥चटका॥मूषिका॥बा
ला॥वत्सा॥होडा॥मन्दा॥विलाता॥संभस्त्राजिनशणपिण्डेभ्यःफलात्॥
संफला॥भस्त्रफला॥इत्यादि॥सदच्काण्डप्रान्तशतैकेभ्यःपुष्पात्॥स
त्पुष्पा॥प्राक्पुष्पा॥प्रत्यक्पुष्पा॥शूद्राचामहत्पूर्वाजातिः॥पुंयोगेतु॥शू

सुचिकटाह
न्यायेनात्र
तउदाहरणं

चगाडी·
१

समासप्रत्ययविधौप्रतिषेधइतिवचनात्तदन्तविधावप्राप्तौ ग्रहणाधिकारप्रतिः·॰·
अनुपसर्जनादित्यधिकारान्नेह ङीप्स्याच्चस्त्रीप्रत्ययेष्वतदन्त ॥६॥[illegible]॥

द्री ॥ अमहत्पूर्वा किं ॥ महाशूद्री ॥ कुञ्चा ॥ उष्णिहा ॥ देवविशा ॥ ज्येष्ठा ॥ कनिष्ठा ॥ म
ध्यमेति पुंयोगेपि ॥ कोकिलाजातावपि ॥ मूलान्नञः ॥ अमूला ॥ उगितश्च ॥ ङी
प् ॥ भवन्ती ॥ पचन्ती ॥ वनोरच ॥ वन्नन्तान्तदन्ताच्च ङीप्स्याद्रश्चान्तादेशः ॥ प्रत्य
यग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम् ॥ सुत्वानमतिक्रान्ता
अतिसुत्वरी ॥ अतिधीवरी ॥ शार्वरी ॥ वनोनहसः ॥ हसंताद्धातोर्विहितोयो
वन्तदन्ताच्च प्रातिपदिकात् ङीप् रश्च नेत्यर्थः ॥ अवावाब्राह्मणी ॥ राजयुध्वा ॥
बहुव्रीहौवा ॥ बहुधीवा ॥ बहुधीवरी ॥ पादोन्यतरस्याम् ॥ पाच्छब्दः कृतसमा
सान्तात्प्रातिपदिकात् ङीप् वा स्यात् ॥ द्विपदी ॥ द्विपात् ॥ टाबृचि ॥ द्विपदाऋ

कऽएकपदा ॥ मनः ॥ मन्नन्तान्नङीप् ॥ सीमा ॥ सीमानौ ॥ अनो बहुव्रीहेः ॥ अनन्ता
द्बहुव्रीहेर्नङीप् ॥ वहुयज्वा ॥ वहुयज्वानौ ॥ डावुभाभ्यामन्यतरस्याम् ॥ सूत्रद्वयो
पात्ताभ्यांडाब्वा ॥ सीमा ॥ सीमे ॥ सीमानौ ॥ दामा ॥ दामे ॥ दामानौ ॥ वहुयज्वा
॥ वहुयज्वे ॥ वहुयज्वानौ ॥ अनउपधालोपिनोन्यतरस्याम् ॥ अन्नन्ताद्बहुव्री
हेरुपधालोपिनो वाङीप्स्यात् ॥ पक्षेडाप्निषेधौ ॥ वहुराज्ञी ॥ वहुराज्ञ्यौ ॥ व
हुराजे ॥ वहुराजा ॥ वहुराजानौ ॥ प्रत्ययस्थात्कात्पूर्वस्यातइदाप्यसुपः ॥ प्रत्य
यस्थात्ककारात्पूर्वस्याकारस्येकारस्यादापिपरे सआप्सुपःपरोनचेत् ॥ स्त्री:
सर्विका ॥ कारिका ॥ अतः किं ॥ नौका ॥ प्रत्ययस्थात्किं ॥ शक्नोतीतिशका २

॥असुपः किं॥ वहुपरिव्राजका नगरी॥ का किं॥ नन्दना॥ पूर्वस्य किं॥ परस्य मा
भूत्॥ कटुका॥ तपरः किं॥ राका॥ आपि किं॥ कारकः॥ मामकनरकयोरुपसं
ख्यानं॥ मामिका॥ नरिका॥ त्यकत्यपोश्च॥ दाक्षिणात्यिका॥ इहत्यिका॥ न
यासयोः॥ यत्तदोरस्येन्न॥ यका॥ सका॥ त्यकनश्च निषेधः॥ उपत्यका॥ अ
धित्यका॥ आशिषि वुनश्च न॥ जीवका॥ भवका॥ उत्तरपदलोपे न॥ देवदत्ति
का॥ देवका॥ क्षिपकादीनां च॥ क्षिपका॥ ध्रुवका॥ चटका॥ कन्यका॥ तार
का ज्योतिषि॥ वर्णका तान्तवे॥ वर्तका शकुनौ प्राचाम्॥ अष्टका पितृदे
वत्ये॥ सूतकापुत्रिकावृन्दारकाणां वेति वक्तव्यम्॥ स्याम्वा अका

रेभवतीत्यर्थः ॥ सूतका ॥ सूतिकेत्यादि ॥ उदीचामातःस्थाने यकपूर्वायाः ॥ यक
पूर्वस्यास्थिप्रत्ययस्यातःस्थानेयोनत्सपकात्पूर्वस्येद्वाऽपि परे ॥ केराइतिह्रस्वः ॥
आर्यका ॥ आर्यिका ॥ चटकका ॥ चटकिका ॥ आतः किं ॥ सांकश्येभवा सांका
श्यिका ॥ यके तिकिं ॥ अश्विका ॥ स्त्रीप्रत्ययस्यकिं ॥ शुभंयिका ॥ अभाषितपुं
स्काच्च ॥ एतस्माद्विहितस्यातःस्थानेत इद्वा ॥ गङ्गका ॥ गंगिका ॥ आदाचा
र्याणाम् ॥ पूर्वसूत्रविषये ॥ गंगाका ॥ अनुपसर्जनात् ॥ अधिकारोयंयूनस्ति
रित्यभिव्याप्य ॥ टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः ॥ चराणी·
अनुपसर्जनं यट्टिदादितदन्तं यददन्तं ततोङीप् ॥ कुरुचरी ॥ उपसर्जन २ ३

अवयवे स्वचरितार्थौ विधिः समुदायस्योपकारं भवति को २

पं
अन्यपदार्थनिष्ठविशेष्यतानिरूपितप्रका
रताश्रयबोधकत्वमनुपसर्जनत्वं ॥१॥ ॥ ॥

संख्याया अवयवे तयप्-२

स्वाम्भोठक्

त्वान्नेह॥ बहुकुरुचरा॥ नदट्॥ नदी॥ देवट्॥ देवी॥ सौपर्णेयी॥ ऐन्द्री॥ औत्सी॥
उरुद्वयसी॥ उरुदघ्नी॥ उरुमात्री॥ पञ्चतयी॥ आक्षिकी॥ लावणिकी॥ यादृशी॥
इत्वरी॥ नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम्॥ स्त्रैणी॥ पौंस्नी॥
शाक्तीकी॥ आढ्यंकरणी॥ तरुणी॥ तलुनी॥ यञश्च॥ यञन्तात् ङीप्॥ अका
रलोपे कृते॥ हलस्तद्धितस्य॥ हल उत्तरस्योपधाभूतस्य तद्धितस्य लोप ईति॥
गार्गी॥ प्राचां ष्फ तद्धितः॥ यञन्तात् ष्फो वा॥ तद्धितत्वात् प्रातिपदिकत्वम्॥
ष्फरणे कृतेपि स्त्रीत्वे षित्वसामर्थ्यात् षिद्गौरादिभ्यश्चेति ङीष्॥ गा
र्ग्यायणी॥ वयसि प्रथमे॥ प्रथमवयोवाचिनोऽदन्तात् ङीप्॥ कुमारी॥

किसोरी

म.कौ.खी. वयस्यचरमइतिवाच्यम्॥वधूटी॥चिरंटी॥द्विगोः॥अदन्तात्ङीप्॥त्रिलोकी॥
अजादित्वात्त्रिफला॥त्र्यनीकासेना॥अपरिमाणबिस्ताचितकम्बल्येभ्योन
तद्धितलुकि॥अपरिमाणान्ताद्विस्ताद्यन्ताच्चद्विगोर्नङीप् तद्धितलुकि॥पंच
भिरश्वैःक्रीतापंचाश्वा॥आर्हीयष्ठक्॥अध्यर्धेतिलुक्॥द्वौविस्तौपचतिद्वि वि
स्ता॥द्व्याचिता॥द्विकम्बल्या॥परिमाणात्तुद्व्याढकी॥तद्धितलुकिकिम्॥स
माहारेपञ्चाश्वी॥काण्डान्तात्क्षेत्रे॥क्षेत्रेयःकाण्डान्ताद्विगुस्ततोङीप्नत
द्धितलुकि॥द्विकाण्डेप्रमाणमस्याः द्विकाण्डा॥क्षेत्रभक्तिः॥मात्रचप्रमा चरणी:
णे॰नोद्विगोर्नित्यमितिलुक्॥क्षेत्रेकिं॥द्विकाण्डीरज्जुः॥पुरुषात्प्रमाणेऽन्य ४

षोडशहस्तपरिमितारज्जुः कौ॰ग॰

तरस्याम् ॥ प्रमाणेयः पुरुषस्तदन्ताद्द्विगोर्ङीब्वा नद्धितलुकि ॥ द्वौ पुरुषौ प्रमाणा
मस्याः द्विपुरुषी· द्विपुरुषा वा परिखा ॥ ऊधसोऽनङ् ॥ ऊधोन्तस्य बहुव्रीहेर
नङ् स्त्रीयाम् ॥ बहुव्रीहेरूधसोङीष् ॥ ऊधोन्ताद्बहुव्रीहेः ॥ कुण्डोध्नी ॥ स्त्रियाम्
किम् ॥ कुण्डोधो धैनुकम् ॥ दामहायनान्ताच्च ॥ संख्यादेर्बहुव्रीहेर्दामान्तात्
हायनान्ताच्च ङीप् ॥ द्विदाम्नी ॥ द्विहायनी बाला ॥ त्रिचतुर्भ्यां हायनस्य णत्वं
वाच्यं ॥ वयोवाचकस्यैव हायनस्य ङीप् णत्वं चेष्यते ॥ त्रिहायणी ॥ चतुर्हाय
णी ॥ वयसोऽन्यत्र द्विहायना ॥ चतुर्हायना शाला ॥ अन्तर्वत्पतिवतोर्नुक् ॥
नान्तः ङीप् ॥ अन्तर्वत्नी ॥ पतिवत्नी ॥ गर्भभर्तृसंयोग एवेष्यते ॥ प्र

न्यमतु ॥ अन्तरस्त्यस्यांशालायांघटः ॥ पतिमतीपृथिवी ॥ पत्युर्नोयज्ञसंयोगे ॥
वसिष्ठस्यपत्नी ॥ विभाषासपूर्वस्य ॥ पतिशब्दान्तस्यनोवा ॥ गृहपत्नी ॥ गृ
हपतिः ॥ दृढप त्नी ॥ दृढपतिः ॥ नित्यंसपत्न्यादिषु ॥ सपत्नी ॥ एकपत्नी ॥
वीरपत्नी ॥ पूतक्रतोरैच ॥ पूतक्रतोःस्त्रीपूतक्रतायी ॥ वृषाकप्यग्निकुसित
कुसिदानामुदात्तः ॥ एषामुदात्तऐकारादेशोङीप्च ॥ वृषाकपेःस्त्रीवृषा
कपायी ॥ अग्नायी ॥ कुसितायी ॥ कुसिदायी ॥ मनोरौवा ॥ मनुशब्द
स्यौकारादेशःस्यादुदात्तैकारश्चवाङीप्च ॥ मनायी ॥ मनावी ॥ मनुः ॥ व वर्णा
र्णादनुदात्तोपधात्तोनः ॥ वर्णवाचिनस्तोपधात्तदन्ताद्वाङीप्तस्यनः ॥ एता· ५
त्ता

एनी॥ रोहिता॥ रोहिणी॥ षिद्गौरादिभ्यश्च॥ ङीष्॥ नर्त्तकी॥ गौरी॥ अनडुही॥ अनड्वाही॥
पिप्पल्यादयश्च॥ आकृतिगणोयम्॥ मत्स्यस्यङ्याम्॥ यलोपः॥ मत्सी॥ जानपदकुण्ड
गोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्रा
णास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु॥ एकादशभ्यः क्रमा
द्वृत्त्यादिष्वर्थेषु ङीष्॥ जानपदी॥ वृत्तिश्चेत्॥ अन्या जानपदी॥ प्रश्नन्तःवाङीप्वा
हुदात्तः॥ भाजी श्राणा चेत्॥ भाजान्या॥ यवागुरुष्णिका श्राणा विलेपी तरला
वसा॥ शोणात्प्राचाम्॥ शोणी॥ शोणा॥ वोतो गुणवचनात्॥ उदन्ताद्गुणवा
चिनो वा ङीष्॥ मृद्वी॥ मृदुः॥ उतः किं॥ शितिः॥ गुणोति किम्॥ आखुः॥ खरु

टिढे निङीप्

संयोगोपधान्न ॥ खरुः पाण्डुः ॥ बह्वादिभ्यश्च ॥ वाङीष् ॥ बह्वी ॥ बहुः ॥ कृदिकारादक्तिनः ॥ रात्रिः ॥ रात्री ॥ सर्वतोऽक्तिन्नर्थादित्येके ॥ शकटिः ॥ शकटी ॥ पुंयोगादाख्यायाम् ॥ या पुमाख्या पुंयोगात्स्त्रियां वर्त्तते ततो ङीष् ॥ गोपस्य स्त्री गोपी ॥ पालकान्तान्न ॥ गोपालिका ॥ अश्वपालिका ॥ सूर्याद्देवतायां चाप् ॥ सूर्यस्य स्त्री देवता सूर्या ॥ देवतायां किम् ॥ सूरी ॥ कुन्ती ॥ मानुषीयम् ॥ इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् ङीष् च ॥ इन्द्राणी ॥ हिमारण्ययोर्महत्त्वे ॥ महद्धिमं हिमानी ॥ यवाद्दोषे ॥ दुष्टो यवो यवानी ॥ यवनाल्लिप्याम् [illegible] ॥ यवनानां लिपिर्यवनानी ॥ मातुलोपाध्याययोरानुग्वा ॥ मातुलानी ॥ मातु

त्नी॥उपाध्यायनी॥उपाध्यायी॥आचार्यादणत्वंच॥आचार्यानी॥अर्यक्षत्रिया
भ्यांवास्वार्थे॥अर्याणी॥अर्या॥क्षत्रियाणी॥क्षत्रिया॥पुंयोगेतु॥अर्यी॥क्षत्रि
यी॥क्रीतात्करणपूर्वात्॥क्रीतान्तादद्न्तात्करणादेर्ङीष्॥वस्त्रक्रीती॥क्व
चिन्न॥धनक्रीता॥बहुव्रीहेश्चांतोदात्तात्॥क्तांतात्ङीष्॥उरुभिन्नी॥अस्वा
ङ्गपूर्वपदाद्वा॥पूर्वेणनित्येप्राप्तेविकल्पोयम्॥सुरापीती॥सुरापीता॥स्वाङ्गा
च्चोपसर्जनादसंयोगोपधात्॥असंयोगोपधमुपसर्जनंयत्स्वांगंतदन्ताद्वाङीष्
॥अतिकेशी॥अतिकेशा॥चन्द्रमुखी॥चन्द्रमुखा॥संयोगोपधात्तु॥सुगुल्फा
॥अद्रवम्मूर्तिमत्स्वांगंप्राणिस्थमविकारजम्॥अतत्स्थंतत्रदृष्टंचतेनचे

म·को·स्त्री

गेनयथायुतम्॥ सुस्वेदा॥ द्रवत्वात्॥ सुज्ञाना॥ प्रमूर्तत्वात्॥ सुमुखा त्रगत्ना॥ अप्रा
णिस्थत्वात्॥ सुशोफा॥ विकारजत्वात्॥ सुकेशी सुकेशा रथ्या॥ अप्राणि
स्थस्यापि प्राणिनि दृष्टत्वात्॥ सुस्तनी॥ सुस्तना याप्रतिमा॥ प्राणिवत्प्राणि
स्थ दृष्टत्वात्॥ नासिकोदरौष्ठजंघादन्तकर्णशृंगाच्च॥ वा ङीष्॥ तुङ्ग
नासिकी तुंगनासिका॥ पुछाच्च॥ सुपुछी॥ सुपुछा॥ कबरमणिविषशरे
भ्यो नित्यम्॥ कबरपुछी॥ उपमानात्पक्ष[illegible] पुछाच्च॥ उलूकपक्षी शाला
॥ उलूकपुछी सेना॥ न क्रोडादिबह्वचः॥ क्रोडादेर्बह्वचश्च स्वांगान्न ङी केशाद्यः सु
ष्॥ कल्याणक्रोडा॥ आकृतिगणोऽयम्॥ सुजघना॥ सहनञ्विद्यमान

पूर्वोक्तः ॥ न ङीष् ॥ सकेशा ॥ अकेशा ॥ विद्यमाननासिका ॥ नखमुखात्संज्ञायाम् ॥ ङीष् न ॥
शूर्पणखा ॥ गौरमुखा ॥ संज्ञायां किम् ॥ ताम्रमुखी कन्या ॥ वाहः ॥ वाहन्तान्ङीष् ॥ दित्यौ
ही ॥ सख्यशिश्वीति भाषायाम् ॥ सखी ॥ अशिश्वी ॥ जातेरस्त्रीविषयादयोपधात् ॥ जाति
वाचि यन्न च स्त्रियामेव नियतमयोपधं ततो ङीष् ॥ आकृतिग्रहणा जातिर्लिङ्गानां च न स
र्वभाक् ॥ सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥ तटी ॥ घटी ॥ वृषली ॥ औपगवी
॥ कठी ॥ जातेः किम् ॥ वलाका ॥ अयोपधात्किम् ॥ क्षत्रिया ॥ योपधप्रतिषेधे गवय
हयमुकयमनुष्यमत्स्यानामप्रतिषेधः ॥ गवयी ॥ हयी ॥ मुकयी ॥ मनुषी ॥ मत्सी ॥
पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च ॥ पाकाद्युत्तरपदजातिवाचिनः स्त्रीवि
षयादपि ङीष् ॥ ओदनपाकी ॥ शंकुकर्णी ॥ शालपर्णी ॥ शंखपुष्पी ॥ दासीफली ॥ द

म.कौ.स्त्री

भूमूली ॥ गोवाली ॥ ओषधिविशेषे तु ॥ इतो मनुष्यजातेः ॥ ङीष् ॥ दाक्षी ॥ ऊङुतः ॥ उकारान्ता
दयोपधान्मनुष्यजातिवाचिन ऊङ् ॥ कुरूः ॥ पङ्गोश्च ॥ पङ्गूः ॥ श्वशुरस्योकाराकारलोपश्च
च ऊङ् ॥ पुंयोगलक्षणङीषोपवादः ॥ श्वश्रूः ॥ ऊरूत्तरपदादौपम्ये ॥ उपमानवाचिपूर्वप
दमूरूत्तरपदं यत्तस्मादूङ् ॥ करभोरूः ॥ संहितशफलक्षणवामादेश्च ॥ संहितोरूः ॥ स
हितसहाभ्यां च ॥ सहितोरूः ॥ सहोरूः ॥ शार्ङ्गरवाद्यञो ङीन् ॥ शार्ङ्गरवादेरञो योऽकारस्तद
न्ताच्च जातिवाचिनो ङीन् ॥ शार्ङ्गरवी ॥ बैदी ॥ नृनरयोर्वृद्धिश्च ॥ नारी ॥ यङश्चाप् ॥
यङन्ताच्चाप् ॥ आम्बष्ठ्या ॥ कारीषगन्ध्या ॥ षाद्यञश्चाप् पूगाच्यः ॥ अस्माच्चाप् ॥ यञश्चे
ति ङीपोपवादः ॥ अवटश्चागर्गादिः ॥ आवट्या ॥ यूनस्तिः ॥ युवन्शब्दात्तिः ॥ युवतिः त्रान्तेः
॥ अनुपसर्जनादित्येव ॥ बहवो युवानो यस्याः सा बहुयुवा ॥ युवतीति यौतेः शगन्तान्ङीपि बो ट

ध्यं

क्षम्॥ ॥इति स्त्रीप्रत्ययाः॥ ॥षष्ठीयुक्तश्छंदसि वा॥ पतिशब्दो घिसंज्ञः॥क्षे
त्रस्य पतिना वयं॥इह येति योगं विभज्य छंदसीत्यनुवर्त्तते॥तेन सर्वे विधयश्छंदसि
वैकल्पिकाः॥बहुलं छन्दसीत्यादिरस्यैव प्रपंचः॥अयस्मयादीनि छंदसि॥साधू
नि॥भपदसंज्ञाधिकाराद्यथायोगं संज्ञाद्वयं बोध्यम्॥तथा च वार्त्तिके॥उभयसं
ज्ञान्यपीति वक्तव्यमिति॥स सुष्टुभा स ऋक्वता गणेन॥पदत्वात्कुत्वम्॥भत्वा
ज्जश्त्वाभावः॥नैनं हिन्वंत्यपि वाजिनेषु॥अत्र पदत्वाज्जश्त्वं॥भत्वात्कुत्वाभावः
॥ते प्राग्धातोः॥छन्दसि परेऽपि॥व्यवहिताश्च॥हरिभ्यां याह्योक आ॥आ
मन्द्रैरिंद्र हरिभिर्याहि॥तृतीया च होश्छंदसि॥जुहोतेः कर्मणि तृतीया स्याद्वि

वै॰
म॰कौ॰

नीषाच ॥ यवाग्वाग्निहोत्रं जुहोति ॥ मंत्रे श्वेतवहो।क्थशास्पुरोडाशोण्विन् ॥ श्वेतवहा
दीनां डस्पदस्येति वक्तव्यम् ॥ यत्र पदत्वं भावि तत्र ण्विनोपवादो डस् वक्तव्य इत्यर्थः
॥ श्वेतवाः ॥ श्वेतवाहौ ॥ श्वेतवाहः ॥ उक्थानि उक्थैर्वा शंसति उक्थशाः यजमानः ॥
उक्थशासौ ॥ पुरो दाश्यते दीयते पुरोडाशः ॥ अवेयजः ॥ अवयाः ॥ अवयाजौ ॥ अ
वयाजः ॥ अवयाः श्वेतवाः पुरोडाश्च ॥ एते संबुद्धौ कृतदीर्घा निपात्यन्ते ॥ चाडुक्
थन्नाः ॥ लिङर्थे लेट् ॥ सिब्बहुलं लेटि ॥ इतश्च लोपः ॥ परस्मैपदेषु ॥ लेटस्तिः
ङम्बा ॥ लेटोडाटौ ॥ तौ च पितौ ॥ सिब्बहुलं णिद्वक्तव्यः ॥ इष्टिः ॥ प्रणऽप्रा श्रीः
युंषि तारिषत् ॥ सुपेशसमस्करति ॥ जोषिषत् ॥ आया विसदनानाया ॥ ९

सिपङ्लोपस्यंचाभावे ॥ पतातिविद्युत् ॥ प्रियःसूर्येप्रियोऽग्ना भवाति ॥ सउत्तमस्य ॥
लेटउत्तमसस्यवालोपः ॥ करवाव ॥ करवाम ॥ टेरेत्वं ॥ आतऐ ॥ लेट ॥ आकारस्य ॥
२ सु सुतेभिःप्रयसामादयैते ॥ आतामित्याकारस्यऐ ॥ वैतोन्यत्र ॥ लेटएकारस्यऐ
स्याद्वा ॥ आतऐ इत्यस्यविषयंविना ॥ पशूनामिशैग्रहागृह्यान्तै ॥ अन्यत्रकिं ॥
सुप्रयसामादयैते ॥ उपसंवादाशंकयोश्च ॥ पणवंधेआशंकायांचलेट् ॥ अह
मेवपशूनामीशैनेजिह्मायंतोनरकंपताम ॥ व्यत्ययोवहुलम् ॥ विकरणानांछ
न्दसि ॥ आंडाशुष्णस्यभेदति ॥ भिनत्तीतिप्राप्ते ॥ जरसामरतेपतिः ॥ म्रियतेइति
प्राप्ते ॥ इन्द्रोवस्तेननेषतु ॥ नयतेर्लोट् ॥ शप्सिपोद्वौविकरणो ॥ इन्द्रेणयुजाते

श्रीः

मं.कौ. हृषेमहत्वं ॥ तरेमेत्यर्थः ॥ तरतेर्विध्यादौ लिङ् ॥ तुसिपूर्वापूर्वेतिगयोविकरणाः ॥ सुप्
तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङांच ॥ व्यत्ययमि[illegible]ति शास्त्रकृदे
षां सोपिच सिद्ध्यति बाहुलकेन ॥ धुरिदक्षिणायाः दक्षिणास्यामिति प्राप्ते ॥ चषा
ल्नं ये ऽश्वयूपायतक्षति ॥ तक्षंतीति प्राप्ते ॥ उपग्रहः परस्मैपदात्मनेपदे ॥ ब्रह्मचा
रिणमिच्छते ॥ इच्छतीति प्राप्ते ॥ प्रतीपमन्यऊर्मिर्युध्यति ॥ युध्यतइति प्राप्ते ॥ म
धोस्तृप्ताइवासते ॥ मधुनइति प्राप्ते ॥ नरः पुरुषः ॥ अभासवीरैर्दशभिर्वियूयाः ॥ वियू देवी
यादिति प्राप्ते ॥ कालः कालवाचकः प्रत्ययाः ॥ श्वोऽग्नीमाधास्यमानेन ॥ लुटोविष १०
येलृट् ॥ तमसोगाअदुक्षत ॥ अधुक्षदिति प्राप्ते ॥ मित्रावयंचसूरयः ॥ मित्रावय

मिति प्राप्ते ॥ स्वरव्यत्ययस्तु वक्ष्यते ॥ कर्तृशब्दः कारकमात्रपरः ॥ तथा च तद्वाचिनां कृत्त
द्धितानां व्ययः ॥ अन्नादाय अन्नपतिये अन्नूयडो यत्राद्वादारभ्य लिङ्याशिष्यङि ः
ति ङकारेण प्रत्याहारः ॥ तेषां व्यत्ययो भेदतीत्यादि सूक्त एवा ॥ छंदस्युभयथा ॥ धा
त्वधिकारोक्तप्रत्ययः सार्वधातुकार्द्धधातुकोभयसंज्ञः स्यात् ॥ वर्द्धंतु त्वा सुस्तुतयः ।
वर्द्धयंत्वित्यर्थः ॥ आर्द्धधातुकत्वाण्णिलोपः ॥ विशृण्विरे ॥ सार्वधातुकत्वाच्छ्नुः ॥ श्र
भावश्च ॥ हुश्नुवोरिति यण् ॥ तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यैअध्यैकध्यैन्
शाध्यैशाध्यैन्तवैतवेङ्तवेनः ॥ सेवक्षेरायः ॥ सेन् ताचा मेषे ॥ असे शारदो जी
वमेधाः ॥ ख्रसेनि तु प्राद्युदात्तः ॥ क्से प्रेषे ॥ कसेन् ॥ गवामिव श्रियसे ॥ अध्यै

वै

म·कौ·

॰प्रध्यैन्॥जठरंपृणाध्यै॥पृक्षेप्र्याघुदात्तं॥कध्यै·कध्यैन्॥आहुवध्यै·शध्यै·राधसःस
हमादयध्यै॥शध्यैन्॥वायवेपिबध्यै॥तवै॥दातवाउ॥तवेङ्॥सुतवे॥तवेन्॥कर्त्त
वै॥प्रयोरोहिष्यैअव्यथिष्यै॥एतेनिपात्यन्ते॥प्रयातुंरोढुंअव्यथितुमित्यर्थः॥दृशे
विख्येच॥निपातौ॥द्रष्टुंविख्यातुमित्यर्थः॥कृत्यार्थेतवैकेन्यत्वनः॥धातोरेतेस्युः
तवै·अन्वेतवै·केन्॥अवगाहे॥केन्य॥दिदृक्षेण्यः॥त्वन्·कर्त्वम्॥सृपितृदोः
कसुन्॥तुमर्थे॥पुराक्रूरस्यविसृपोविरप्शिन्॥पुराजतृभ्यआतृदः॥प्रकृत्यां
तःपादमव्यपरे॥ऋक्पादमध्यस्थएङ्प्रकृत्यास्यात्॥ननुवकारयकारपरे
अति॥उपप्रयन्तोअध्वरम्॥सुजातेअश्वसूनृते॥अंतःपादंकिं॥एतासएतेर्चंति·

शंकरः

११

अव्यपरेकिं॥नेऽवदन्॥अव्यादवद्यादवक्रमुरव्रतायमवंत्ववस्युषुच॥एषुव्यपरेप्य
तिरूंप्रकृत्या॥वसुभिर्नोअव्यात्॥मित्रमहोअवद्यात्॥माशिवासोअवक्रमुः॥
तेनोऽव्रत॥शतधारोऽयंमणिः॥तेनोअवन्तु॥कुशिकासोअवस्यवः॥सुपां
सुलुक्पूर्वसवर्णाच्छेयाडाड्याजालः॥ऋजवःसन्तुपन्थाः॥पंथानइतिप्राप्ते॥प
रमेव्योमन्॥व्योमनीतिप्राप्ते॥आ·धीती·मती·सुष्टुती·धीत्या·मत्या·सुष्टुत्ये
तिप्राप्तेपूर्वसवर्णः॥यासुरथीनमा॥यौसुरथौइत्यादौप्राप्ते आ॥नताद्ब्राह्मणं
॥नतमितिप्राप्तेआत्॥यादेवविद्वांस्तात्वा॥नयुष्मेवाजबंधवः॥अस्मेइन्द्राबृ
हस्पती॥युष्मासुअस्मभ्यमितिप्राप्तेशे॥उरुया॥धृष्णुया॥उरुणाधृष्णुः

नेति प्राप्ते॥ या॥ नाभा: पृथिव्या:॥ नाभौ इति प्राप्ते डा॥ नामनु द्यो व्यावयताम्॥ आ
ठेद्या॥ साधुया॥ सा॰धीति प्राप्ते॥ याच्॥ वसन्तायजेत॥ वसन्ते इति प्राप्ते॥ इयाड्॥
इयाडियाडिकरणाद्युपसंख्यानम्॥ उर्विया॥ उरुणेति प्राप्ते इया॥ सुक्षेत्रिया॥
सुक्षत्रिणेति प्राप्ते डियाच्॥ तिन सुस्कं सरसीशयानम्॥ सरस्यामिति प्राप्ते॥ ई॥
आज्जुरसेरसुक्॥ ब्राह्मणासः॥ नत्वादीनां वा यड्वडौ॥ तन्वं पुष्येम॥ तनुवं पुष्येम
विश्वं पश्य॥ विसुवं पश्य॥ स्वर्गलोकः॥ सुवर्गलोकः॥ त्र्यंवकं॥ त्रियंवकं॥ वेरे
ण्यं॥ वरेणीयम्॥ अतोभिस ऐस॥ बहुलं छन्दसि॥ अग्निर्देवेभिः॥ मर्त्येष्वा
आदेरात्मनः॥ आत्मनाव्यादेनौच आङि॥ आत्मनादेवेषु॥ अप्सोभिः॥ मा

सश्छन्दसीतिवक्तव्यम्॥माङ्ङिः॥आरङ्गिः॥प्रसमुपोदः पादपूरणे॥एषां द्वे स्तः॥प्र
प्रायमग्निः॥संसमिद्युवसे॥उपोप मे परामृश॥किन्नो दुदु हर्षेशो॥षष्ठ्याः
पतिपुत्रपृष्ठपारपदपयस्पोषेषु॥विसर्गस्य सः स्यात्॥वाचस्पतिं विश्वक
र्माणम्॥दिवस्पुत्राय सूर्याय॥दिवस्पृष्ठं भन्दमानः॥तमसस्पारमस्या
परिवीत इळस्पदे॥दिवस्पयो दिधिषाणाः॥रायस्पोषं यजमानेषु धत्तः॥
॥ ॥इति वैदिकप्रक्रिया॥ ॥धातोः अंत उदात्तः स्यात्॥अनुदात्तं पद
मेकवर्जम्॥परिभाषेयम्॥स्वरविधिविषया॥यस्मिन्पदे यस्योदात्तः स्व

रितोवाविधीयतेतमेकंवर्जयित्वाशेषंतत्पदमनुदात्तंस्यात्॥गोपायतंन॥
अगसनाद्यंताधातवइतिधातुत्वेधातुस्वरेण।यकाराकाराउदात्तः॥त्रिपदमनु
दात्तम्॥उदात्तादनुदात्तस्यस्वरितः॥इतितकाराकारःस्वरितः॥स्वरितात्संहि
तायामुदात्तानां॥एकश्रुतिस्यात्॥इतिनकाराकारःप्रचयः॥अनुदात्तस्य
चयत्रोदात्तलोपः॥यस्मिन्ननुदात्तेउदात्तोलुप्यतेतस्योदात्तः॥देवींवाचम्
॥अत्रङीबुदात्तः॥आद्युदात्तश्च॥प्रत्ययआद्युदात्तःस्यात्॥कर्त्तव्यम॥अ
नुदात्तौसुप्पितौ॥पूर्वस्यापवादः॥यज्ञस्य॥नयोपु[illegible]ति॥नृपतिपोरस्तु

दात्तत्वे स्वरितप्रचयौ॥ चितः॥ अन्त उदात्तः स्यात्॥ चितः सप्रकृतेर्बहूकजर्थम्॥ चि-
त्प्रत्यये सति प्रकृतिप्रत्ययसमुदायस्यान्तोदात्तता वाच्येत्येत्यर्थः॥ नभन्ता-
मन्यके समे॥ यके सरस्वतीम्॥ तकत्सु ते॥ तद्धितस्य॥ चितस्तद्धितस्यान्तो-
उदात्तः॥ पूर्वेण सिद्धे ञित्स्वरबाधनार्थम्॥ कौंजायनाः॥ कितः॥ तद्धि-
तस्यान्त उदात्तः॥ यदाग्नेयः॥ तित्स्वरितम्॥ क्वनूनम्॥ उपोत्तमं रिति
॥ रित्प्रत्ययान्तस्योपोत्तमनुदात्तं स्यात्॥ यदाहवनीये॥ ञ्नित्यादेर्नि-
त्यादेर्नित्यम्॥ ञिदन्तस्य निदन्तस्य चादिरुदात्तः॥ यस्मिं विश्वानि पौ

स्या॥पुंसः कर्मणि॥व्रांह्मणादित्वात्ष्यञ्॥सुतेदधिश्च नश्चनः॥चायतेर
सुन्॥चायतेरन्नोह्रस्वश्चेतिचकारादसुनोनुडागमश्च॥नित्ति॥प्रत्ययात्पू
र्वमुदात्तंस्यात्॥चिकीर्षकः॥अत्रईकारस्योदात्तता॥इत्यादिप्रयोगे
मनुसृत्यान्वाख्यातव्यम्॥ ॥इतिस्वरप्रक्रिया॥ ॥ ॥

एषावरदराजेनवाल्लानामुपकारिका॥अकारिपाणिनीयानांमध्य
सिद्धान्तकौमुदी॥१॥इतिवरदराजस्यमध्यसिद्धान्तकौमुदी॥तस्याः
संख्यानुविज्ञेयाखवाणाकरवह्निभिः२॥३२५०शुभमस्तु॥ ⁂ ॥

दिव्यदृष्टीकटिग्रीवाभग्नपृष्ठिरधौंमुखम्॥कष्टेनलिखितंग्रथंपुत्रवत्परिपा
लयेत्॥१॥स्वस्तिश्रीसम्वत् १९२६ मितिमाघवदि १२ रोज ६ शुभम्॥ ❁॥

	ट्	विधिलिङ्	लृङ्
अतति·	अतिष्यति·	अतेत् ०	आतिष्यत्
अततः·	अतिष्यतः·	अतेताम् ०	आतिष्यताम्
अतन्ति·	अतिष्यन्ति·	अतेयुः ०	आतिष्यन् ०
अतसि·	अतिष्यसि·	अतेः ०	आतिष्यः ०
अतथः·	अतिष्यथः·	अतेतम् ०	आतिष्यतम्
अतथ ०	अतिष्यथ·	अतेत ०	आतिष्यत
अतामि ०	अतिष्यामि·	अतेयम्	आतिष्यम्·
अतावः·	अतिष्यावः·	अतेव ०	आतिष्याव·
अतामः·	अतिष्यामः·	अतेम ०	आतिष्याम·

लिट्	लोट्	आशीर्लिङ्	लुङि अङ्पक्षे
आत ०	अततु ०	अत्यात् ०	अश्चुतत्
आततुः·	अततात्·	अत्यास्ताम्	अश्चुतताम्·
आतुः ०	अतताम्·	अत्यासुः·	अश्चुतन्
	अतन्तु ०	अत्याः ·	अश्चुतः·
आतिथ·	अत ०	अत्यास्तम्·	अश्चुततम्·
आतथुः·	अततात्	अत्यास्त·	अश्चुतत·
आत·	अततम्·		
आत ०	अतत ०	अत्यासम्·	अश्चुतम्
	अतानि·	अत्यास्व·	अश्चुताव·
आतिव·	अताव ०		
आतिम·	अताम ०	अत्यास्म·	अश्चुताम·

लुट्	लङ्	लुङ्	अङभावपक्षे
अतिता ०	आतत्·	आतीत् ०	
अतितारौ ०	आतताम्·	आतिष्टाम्	अश्च्योतीत्
अतितारः ०	आतन्·	आतिषुः·	अश्च्योतिष्टाम्
			अश्च्योतिषुः·
अतितासि ०	आतः·	आतीः ०	अश्च्योतीः·
अतितास्थः·	आततम्·	आतिष्टम्	अश्च्योतिष्टम्
अतितास्थ ०	आतत·	आतिष्ट ०	अश्च्योतिष्ट
अतितास्मि·	आतम्·	आतिषम्	अश्च्योतिषम्
अतितास्वः·	आताव·	आतिष्व ०	अश्च्योतिष्व·
अतितास्मः·	आताम	आतिष्म ०	अश्च्योतिष्म श्चुतिर् आसे॥

श्च्योतति· चुश्च्योत· श्च्योतिता· श्च्योतिष्यति· श्च्योततु·
अश्च्योतत्· श्च्योतेत्· श्च्युत्यात्· अश्चुतत्· अश्च्योतीत्·
अश्च्योतिष्यत्॥ श्च्योतति· चुश्च्योत· श्च्योतिता· श्च्यो-
तिष्यति· श्च्योततु· अश्च्योतत्· श्च्योतेत्· श्च्युत्यात्·
अश्च्योतीत्· अश्च्योतिष्यत्· श्च्योति

	लृट्	लिङ्	लृङ्
सेधति·	सेधिष्यति·	सेधेत·	असेधिष्यत ·
सेधतः·	सेधिष्यतः·	सेधेताम्·	असेधिष्यताम्
सेधन्ति·	सेधिष्यन्ति·	सेधेयुः·	असेधिष्यन् ·
सेधसि·	सेधिष्यसि·	सेधेः ·	असेधिष्यः
सेधथः	सेधिष्यथः·	सेधेतम्·	असेधिष्यतम्
सेधथ·	सेधिष्यथ	सेधेत ·	असेधिष्यत ·
सेधामि	सेधिष्यामि	सेधेयम्·	असेधिष्यम् ·
सेधावः	सेधिष्यावः	सेधेव·	असेधिष्याव ·
सेधामः	सेधिष्यामः·	सेधेम·	असेधिष्याम ·

लिट्	लोट्	आशीर्लिङ्
सिषेध ·	सेधतु ·	सिध्यात् ·
सिषिधतुः·	सेधताम्·	सिध्यास्ताम्
सिषिधुः ·	सेधताम्·	सिध्यासुः
सिषिधिथ	सेधन्तु· सेध ·	सिध्याः ·
सिषिधथुः	सेधतात्·	सिध्यास्तम्
सिषिध ·	सेधतम्·	सिध्यास्त ·
सिषेध ·	सेधत ·	सिध्यासम्
सिषिधिव	सेधानि· सेधाव ·	सिध्यास्व ·
सिषिधिम·	सेधाम ·	सिध्यास्म·

श्रीरामना मव
होरघुवि
रथोसीस

श्रीरामायनमः
श्रीराम

श्रीगणेशाय

लुट्	लङ्	लुङ्
सेधिता ·	असेधत्	असेधीत् ·
सेधितारौ ·	असेधताम्	असेधिष्टाम्
सेधितारः ·	असेधन्	असेधिषुः ·
सेधितासि ·	असेधः	असेधीः
सेधितास्थः	असेधतम्	असेधिष्टम्
सेधितास्थ	असेधत	असेधिष्ट ·
सेधितास्मि	असेधम्	असेधिषम्
सेधितास्वः	असेधाव	असेधिष्व ·
सेधितास्मः	असेधाम	असेधिष्म

श्रीरामाय
नमः श्री
रामायन
ममराम
रामायराम
भद्रायराम
चन्द्रायवे·
धसेरघु
नाथायन
थायसी
तायाप

श्रीरामायनमः

रङ्गसेसकलजगज्ज्ञो सङ्गो नेसाथि.कोवजग
नाकुलपुसरोनामसिद्धि ङ्गग [illegible]
दनामालिकोमगलमम्केरजकोलेख
को॥१॥आसन्नाधिगोऽस्वोछपतिम
दिनयकरुकरुदृष्टिनाकोमाथिवसालीप
कोगरुडुच्छन्दमिन्दयाऽऽ
[illegible]

मा

स्वरस्य

ानमन्

वादीवि

श्रीमार

स्वैवम

स्फुरवि

नवे

नउ

नयं।

ष्यतस्

षय

॥

ोकिप

स्तम

स्मु

क्षघः

[illegible]